तस्योर्ध्वशृङ्गे मुनिसंस्तुता स दुर्गास्थितादानवनाशनार्थम् ॥
देवाश्च सिद्धाश्च महोरगाश्च विद्याधरा भूतगणाश्च सर्वे।
सर्वाप्सरोभिः प्रतिराम यन्तःकात्यायनीं तस्थुरकेतशोकाः॥ ३७

हे महर्षि ! इस प्रकार से वह महाचलेन्द्र अगस्त्य मुनि ने नीचे शिखरों वाला कर दिया था उसके सब से ऊँचे शिखर पर मुनि के द्वारा संस्तुत दानवों के नाश करने वाली दुर्गा देवी स्थित हो गईं थीं ॥३६॥ फिर सभी देवगण, सिद्ध, महोरग, विद्याधर, समस्त भूतगण,

सब अप्सराओं के साथ शोक रहित होकर कात्यायनी देवी का संस्तवन करते हुए वहाँ पर संस्थित हो गये थे ॥३७॥

-- -- ·

१९ –देवी माहात्म्य वर्णन (२)

ततस्तु तां तत्र तदा वसन्तीं कात्यायनींशैलवरस्य शृङ्गे ।
अपश्यतां दानवसत्तमींद्वौ चण्डश्च मुण्डश्च तपस्विनीं भृशम् ॥१
दृष्ट्वैव शैलादवतीर्य शीघ्रमाजग्मतुः स्वं भवनं सुरारी ।
दृष्ट्वोचतुस्तौ महिषासुरस्य दूताविदं चण्डमुण्डौ दितीशम् ।।२
स्वस्थोभवान्कित्वसुरेन्द्रसाम्प्रतमागच्छपश्यामचतत्रविन्ध्यम् ।
तत्रास्ति देवी सुमहानुभावा कन्या सुरूपा सुरसुन्दरीणाम् ॥३
जितस्तया तोयध रोऽलकैर्हि जितः शशाङ्को वदनेन तन्व्या ।
नेत्रैस्त्रिभिस्त्रीणिहुताशनानि जितानिकण्ठेनजितस्तुशङ्खः ॥४
पीनाः सशस्त्राःपरिघोपमाश्चभुजास्तथाऽष्टादशभान्तितस्याः ॥५
पराक्रमं वै भवतो विदित्वा कामेन यन्त्रा इव ते कृतास्तु ॥६
मध्यं च तस्यास्त्रिवलीतरङ्गं विभाति दैत्येन्द्र सुरोमराजि ।
भयात्तवारोहणकातरस्य कामेन सोपानमिव प्रयुक्तम् ॥७

महर्षि पुलस्त्य ने कहा—इसके अनन्तर उस शैल श्रेष्ठ के शिखर पर वहाँ उस समय में निवास करने वाली कात्यायनी देवी को जो परम तपस्विनी के स्वरूप में स्थित थी। उस दानवों के संहार करने वाली देवी को चण्ड और मुण्ड इन दो दानवों ने बारम्बार देखा था ॥१॥ उस देवी को देखकर ये दोनों शैल से नीचे उतर कर शीघ्र ही अपने भवन में आ गये और इन दोनों महिषासुर के दूतों ने चण्ड और मुण्ड ने महिषासुर से यह वचन कहा था ॥२॥ हे असुरेन्द्र ! आप किस तरह ऐसे स्वस्थ होकर स्थित हैं। इस समय आइये, विन्ध्य पर्वत को देखें। वहाँ पर एक सुर सुन्दरियों में कन्या के स्वरूप वाली परम रूपवती सुन्दर एवं महान् अनुभावों से युक्त देवी स्थित है ॥३॥ उसके अलक ऐसे सुन्दर हैं कि उनसे उसने मेघों को भी जीत लिया है। मुख की

सुन्दरता क्या कहें उसकी सुन्दरता से चन्द्रमा भी पराजित है। तीन नेत्रों के सौन्दर्य से तीनों अग्नियों को भी नीचा दिखा दिया है। कण्ठ उसका इतना सुन्दर है जैसे कोई शंख हो।४। परम पीन अस्त्रों युक्त अठारह उसकी भुजाऐं हैं जो परिघ के समान ही हैं। ऐसा प्रतीत होता है कि आपके पराक्रम को जान कर ही कामदेव ने वे यन्त्र ही बना दिये हों।५-६। हे दैत्येन्द्र! उस परम सुन्दरी देवी का मध्य भाग तो इतना सुन्दर है कि उसमें त्रिवलियों की तरङ्गें विद्यमान हैं और बहुत ही सुन्दर रोमों की राशि शोभित है ऐसा ज्ञात है कि आपके ही भय से आरोहण में कातर कामदेव ने वह सोपानों की परम्परा रचित की हो।७।

सा रोमराजी नितरां हि तस्या बिराजते पीनकुचावलग्ना।
आरोहणे त्वद्भयकातरस्य स्वेदप्रवाहोऽसुर मन्मथस्य ॥८
नाभिर्गभीरा नितरां विभाति प्रदक्षिणाऽस्याः परिवर्तमाना।
तस्यैव लावण्यगृहस्य मुद्रा कन्दर्पराज्ञा स्वयमेव दत्ता॥९
विभाति रम्यं जघनं मृगाक्ष्याः समन्ततो मेखलयाऽवघृष्टम्।
मन्ये ह्यहं कामनराधिपस्य प्राकारगुह्यं नगरं सुदुर्गम् ॥१०
वृत्तावरोमौ च मृदू कुमार्याः शोभेत ऊरू समनुत्तमौ हि।
आवासनार्थं मकरध्वजेन जनस्य देशाविव सन्निविष्टौ ॥११
तज्जानुयुग्मं महिषासुरेन्द्र ह्यत्युन्नतं भाति तथैवतस्याः।
सृष्ट्वा विधाताहिनिरूपणायश्रान्तस्तथाहस्ततलौददौ हि ॥१२
जङ्घे सुवृत्तेऽपि च रोमहीने शुभे च दैत्येश्वर ते तदीये।
आनम्य लोकानिव निर्मिते येऽसूप विजत्यैवक्रुतेवरे हि ॥१३
पादौ च तस्याः कमलो दराभौ प्रयत्न तस्तौहिकृतौविधात्रा।
अज्ञायि तस्या नखरत्नमाला नक्षत्रमाला गगने यथैव ॥१४

वह सुन्दर रोमों की पंक्ति उसके पीन कुचों में अब लग्न होकर विराजमान है। हे असुर! ऐसा प्रतीत होता है कि आपके भय से कातर कामदेव के आरोहण के समय में मानों पसीने का प्रवाह बहकर चल दिया हो।८। उसकी गम्भीरतरा नाभि तो बहुत ही सुन्दर

मालूम होती है जो प्रदक्षिण की ओर ही परिवर्त्त माना है ऐसा प्रतीत होता है कि वह नाभि क्या है। मानों कामदेव रूपी नृप ने उस लावण्य घर की मुद्रा (मोहर) स्वयं ही लगा दी है।८। उस मृगाक्षी के सुन्दर जघन शोभा देते हैं जिनके चारों ओर मेखला (कौंधनी) आवृत है ऐसा माना जाता है कि काम रूपी राजा के सुदुर्ग नगर का कोई प्राचीर (परकोटा) जैसा बना हो ।९। अत्यन्त कोमल, वृत्ताकार, बिना रोमों वाले समान तथा अत्युत्तम ऊरु हैं जो परम शोभा वाले हैं। ऐसा मालूम होता है कि कामदेव नृप ने जनों के आवास के लिये दो देश निविष्ट कर दिये हों।११। हे महिषासुरेन्द्र! उनके दोनों घुटने अतीव उन्नत बहुत शोभा-सम्पन्न हैं। ऐसा प्रतीयमान होता है कि सृजन कार्य में श्रान्त होकर विधाता ने निरूपण के लिये दोनों हस्तों के तल दे दिये हों।१२। उसके जघन सुवृत्त होते हुए भी रोमों से हीन हैं अतएव हे दैत्येश्वर! वे परम शुभ हैं। ऐसा मालूम होता है कि लोगों को आनमित करके ही असूय को विध्वित कर उनका निर्माण किया गया है जो कि प्राप्त वरदानी हैं।१३। उस देवी के चरण तो कमल के उदर के समान हैं जिनकी रचना विधाता ने अत्यन्त ही प्रयत्नों के साथ की है। उसके नखरत्नों की माला ऐसी बनाई है जैसे गगन में नक्षत्रों की माला हो।१४।

एवं स्वरूपा दनुनाथ कन्या महोग्रशस्त्राणि च धारयन्ती।
दृष्ट्वा यथेष्टं न च वेद्मि कासासुतातथाकस्यचिद्देवज्ञा ।। ।।१५
तद्भूतले रत्नमनुत्तमं स्थितं स्वर्गं परित्यज्य महासुरेन्द्र।
गत्वाऽथ विन्ध्ये स्वयमेव पश्यकुरुष्वयत्तेऽभिमत क्षमं च ।।१६
श्रुत्वैव ताभ्यां महिषासुरस्तु देव्याः प्रवृत्तिं कमनीयरूपाम्।
चक्रे मतिं नात्र विचार्यमस्तिइत्येवमुक्त्वामहिषो महर्षे ।।१७
प्रागेव पुंसस्तु शुभाशुभानि स्थाने विधात्रा प्रतिपादितानि।
यस्मिन्यथायाति च सोऽथविप्रसनीयतेवाव्रजतिस्वयं वा ।।१८
ततोऽनु मुण्डं नमरं सचण्डं विडालनेत्रं कपिलं सबाष्कलम्।
उग्रायुधं विक्षुररक्तबीजौ समादिदेशाथ महासुरेन्द्रः ।।१९

आहत्य भेरी रणकर्कशास्ते स्वर्गं परित्यज्य महीधरं तु ।
आगम्य मूले शिबिर निवेश्यतस्थुश्चसज्जा दनुनन्दनास्ते ॥२०
ततस्तु दैत्यो महिषासुरेण संप्रेषितो दानवयूथपालः ।
मयस्य पुत्रो रिपुसैन्यमर्दी स दुन्दुभिर्दुन्दुभिनिःस्वस्तु ॥२१

हे दनुनाथ !।इस प्रकार के परम सुन्दर स्वरूप वाली वह कन्या है जिसने महान् उग्र अस्त्रों को धारण कर रक्खा है। उसको देख कर भी मैं यथार्थ रूप से नहीं जान पाया हूँ कि वह कौन है, किसकी पुत्री है और किस की बाला है ।१५। किन्तु इसमें तनिक भी सन्देह नहीं है कि वह इस भूतल में सर्वोत्तम रत्न हैं जोकि इस समय में वहाँ स्थित है । हे महासुरेन्द्र ! ऐसा प्रतीत होता है कि वह स्वर्ग का त्याग करके ही यहाँ पर आगई है । आप विन्ध्याचल पर जाकर स्वयं ही उसको देखिये फिर जो भी कुछ आपको अभिमत हो तथा जैसी भी क्षमता हो करियेगा ।१६। महिषासुर ने उन दोनों (चण्ड-मुण्ड) से देवी की प्रवृत्ति और अतिशय कमनीय सौन्दर्य को श्रवण करके हे महर्षे ! उसने इस विषय में कुछ भी विचार करने के योग्य बात है ही नहीं-यह कह कर फिर महिषासुर ने उस के प्राप्त करने की बुद्धि स्थिर करली थी ।१७। देखो, विधाता ने पुरुष के शुभ और अशुभ कर्मों के विषय में पहिले ही प्रतिपादित कर दिया है । जिसमें जिस प्रकार से वह जाया करता है। हे विप्र ! वह उसी भाँति जाता है--ले जाया करता है अथवा स्वयं ही वहाँ पहुंच जाता है ।१८। इसके अनन्तर उस महासुरेन्द्र ने चण्ड, मुण्ड, नमर, कपिल, वाष्कल, उग्रायुध, विक्षुर और रक्तबीज इन सबको आदेश दे दिये थे ।१९। भेरी बजाकर रण में महान् कठोर वे सब स्वर्ग का त्यागकर उस महीधर विन्ध्य पर आगये थे। उसके मूल में अपना पड़ाव डाल कर वे सभी दानव सुसज्जित होकर स्थित हो गये थे ।२०। इसके पश्चात् महिषासुर ने दानवों के यूथ का स्वामी-मय दैत्य का पुत्र वहाँ पर भेजा था जो शत्रुओं की सेना मर्दन करने वाला, दुन्दुभि की ध्वनि वाला था तथा जिसका नाम भी दुन्दुभि था ।२१।

अभ्येत्य देवीं गगनस्थितोऽपि स दुन्दुभिर्वाक्यमुवाच विप्र ।
कुमारिदूतोऽस्मिमहासुरस्यरम्भात्मजस्याप्रतिमस्ययुद्धे ॥२२
कात्यायनी दुन्दुभिमित्युवाच एह्येहि दैत्येन्द्र भयं विमुञ्च ।
वाक्यं च यद्रम्भसुतो बभाषे वदस्व तत्सत्यपपेतमोहः ॥२३
ततस्तुवाक्याद्दितिजःशिवायास्त्यक्त्वाऽम्बरंभूमितलेनिशण्णः ।
सुखोपविष्ठः परमासने चरम्भात्मजनोक्तमुवाचवाक्यम् ॥२४
एवं समाज्ञापयते सुरारिस्त्वां देवि दैत्यो महिषासुरस्तु ।
यथाऽमराहीनबलाःपृथिव्यांभ्रमन्तियुद्धे विजितामया ते ॥२५
स्वर्गो मही वायुपथाश्च वश्याःमातालमन्ये च महीश्वराद्याः ।
इन्द्राऽस्मिरुद्रोऽस्मिदिवाकरोऽस्मिसर्वेषुलोकेष्वधिपोऽस्मिबाले ॥२६
न सोऽस्ति नाके न महीतले वा स्वर्गेऽपिपातालतलेऽपियुद्धे ।
सर्वाणि मामद्य समागतानि वोर्यार्जितानीह विशालनेत्रे ॥२७
स्त्रीरत्नमग्र्यं भवती च कन्या प्राप्तोऽस्मि शैलंतवकारणेन ।
तस्माद्भजस्वैवजगत्पतिमांपतिस्तवार्होऽस्मिविभुःप्रभूश्च ॥२८

हे विप्र ! वह दुन्दुभि देवी के समीप में आकर आकाश में ही स्थित होते हुए यह वाक्य बोला—हे कुमारि ! मैं युद्ध में अप्रतिम-रम्भ का पुत्र महासुर का दूत हूँ। जब उस कात्यायनी ने दुन्दुभि से कहा—यहाँ आओ, आजाओ, भय का त्याग करदो। जो वचन रम्भ के पुत्र ने कहे हैं। सब मोह का त्याग करके सत्य २ कह डालो।२२-२३। इसके उपरान्त जगदम्बा शिवा का वाक्य सुनकर वह दैत्य आकाश का त्याग करके भूतल में खड़ा होगया था। वहाँ आसन पर सुख पूर्वक स्थित हो गया था और फिर रम्भ के पुत्र द्वारा कहे हुए वचन कहने लगा।२४। दुन्दुभि ने कहा—सुरारि इस प्रकार से आपको आज्ञा देता है जोकि महिषासुर नामधारी दैत्यराज है। जिस तरह से इस समय में देवगण हीन बल वाले होकर भूमि में भ्रमण किया करते हैं क्योंकि उन सभी को युद्ध में मैंने पराजित कर दिया है।२५। अब स्वर्ग, भूमि, वायु, पथ, पाताल और अन्य महीश्वरादि सब मेरे वश्य हैं। इस समय में तो मैं ही इन्द्र हूँ-मैं ही रुद्र हूँ और मैं ही दिवाकर भी

हूं। बाले ! समस्त लोकों में एक मात्र स्वामी हूं। २६। इस समय में ऐसा कोई भी नहीं है जो युद्ध में मेरा मुकाबला कर सके। न तो कोई स्वर्ग में भूमि में तथा पाताल लोक में है। क्योंकि सभी तो हे विशाल नेत्रों वाली ! मेरे अधीन हैं और सबको मैंने परास्त कर हीन-वीर्य वाले कर दिया है।२७। आप एक स्त्रियों में रत्न के समान हैं और अभी कन्या ही हैं। मैं इस समय आपके ही कारण यहाँ इस शैल पर आया हूं। इसलिये अब तुम मुझ जगत् के स्वामी की सेवा करो। मैं विभु और सर्व समर्थ प्रभु तुम्हारे पति होने के योग्य पात्र हूं।२८।

इत्येवमुक्ता दितिजेन दुर्गा कात्यायनी प्राह मयस्य पुत्रम्।
सत्यं प्रभुर्दानवराट् पृथिव्यां सत्यं च युद्धे विजितामरश्च ॥२९
किंत्वस्ति दैत्येश कुलेऽस्मदीये धर्मो हि शुल्काख्य इति प्रसिद्धः।
तं चेत्प्रदद्यान्महिषो ममाद्य भजामि सत्येनपतिंहयारिम् ॥३०
श्रुत्वाऽथ वाक्यं मयजोऽब्रवीच्च शुल्कं वदस्वायतपत्रनेत्रे।
दद्यात्स्वमूर्धानमपि त्वदर्थेकिन्नामशुल्कंचयदस्त्यलभ्यम् ॥३१
इत्येवमुक्ता दनुनायकेन कात्यायनी सस्वनमुन्नदित्वा।
विहस्य चैतद्वचनं बभाषे हिताय सर्वस्य चराचरस्य ॥३२
कुलेऽस्मदीये शृणु दैत्य शुल्कं कृतं हि यत्पूर्वतरैः प्रसह्य।
याजेष्यतेऽस्मत्कुलजांरणाग्रे तस्याःपतिःसोऽपिभवष्यतीति॥३३
तच्छ्रुत्वा वचनं देव्या दुन्दुभिर्दानवेश्वर।
गत्वा निवेदयामास महिषाय यथायथम् ॥३४
स चाभ्यगान्महातेजाः सर्वदैत्यपुरस्सरः।
आवृत्य विन्ध्यशिखरं योद्धुकामः सरस्वतीम् ॥३५

पुलस्त्य महर्षि ने कहा– इस प्रकार से दातिज के द्वारा जब वह जगदम्बा दुर्गा से कहा गया तो उस समय में कात्यायनी ने मय के पुत्र से कहा—यह बिल्कुल सत्य है कि वह दानवों का राजा है और यह भी यथार्थ है कि पृथिवी में युद्ध स्थल में उसने सभी देवगण को जीत लिया है।२९। किन्तु हे दैत्येश ! हमारे कुल में शुल्काख्य एक प्रसिद्ध धर्म है। यदि उस शुल्क को महिष आज मुझे देदेवे तो यह

सर्वथा सत्य है कि मैं हयारि को अपना पति के रूप में मान लूंगी ।३०। यह श्रवण कर उस मयपुत्र ने कहा—हे आयत पत्र नेत्रे ! वह शुल्क क्या है उसे बतलादो। वह तो आपके लिये अपना मस्तक भी देदेगा। ऐसा वह क्या शुल्क है जो अलभ्य है।३१। पुलस्त्य महर्षि ने कहा—दनु नायक के द्वारा ऐसा कहने पर वह कात्यायनी देवी ध्वनि पूर्वक उन्नदन करके तथा हंस कर समस्त चराचर के हित के लिये यह वचन बोली—श्री देवी ने कहा-हे दैत्य ! हमारे कुल में यह शुल्क है जो पूर्वजों ने कायम किया है उसे आप श्रवण करें। जो भी कोई बलपूर्वक हमारे कुल में उत्पन्न होने वाली को रणस्थल में जीत लेगा वही उसका पति हो जायगा।३२-३३। पुलस्त्य मुनि ने कहा—देवी के इस वचन को सुन कर उस दानवेश्वर दुन्दुभि ने वापिस जाकर यथातथ सब महिषासुर से निवेदन कर दिया था।३४। वह महान् तेजस्वी समस्त दैत्यों को आगे करके वहां पर आगया था और उसने विन्ध्य के शिखर को घेर लिया था। उस सरस्वती से युद्ध करने की इच्छा से ही उसने सब तैयारी करके वहाँ आगमन किया था।३५।

ततः सेनापतिर्दैत्यो विक्षुरो नाम नारद ।
सेनाग्रगामिनं चक्रे नमरं नाम दानवम् ॥३६

स चापि तेनाधिकृतश्चतुरङ्ग समर्जितम् ।
बलैकदेमादाय दुर्गां दुद्राव वेगतः ॥३७
तमापतन्तं वीक्ष्याथ देवा ब्रह्मपुरोगमाः ।
ऊचुर्वाक्यं महादेवी वर्मबन्धनमाश्रय ॥३८
अथोवाच सुरान्दुर्गा न वध्नामि च देवताः ।
कवचं कोऽत्र संतिष्ठेन्ममाग्रे दानवाधमः ॥३९

यदा न देव्या कवचं कृत शस्त्रनिवारणम् ।
तदा रक्षार्थमस्यास्तु विष्णुपञ्जरमुक्तवान् ॥४०

सा तेन रक्षिता ब्रह्मन्दुर्गा दानवसत्तमम् ।
अवध्यं दैवतैः सर्वैर्महिषं प्रत्यतेषयत् ॥४१

एवं पुरादेववरेण शंभुना तद्वैष्णवं पञ्जरमायताक्ष्याः ।
प्रोक्तं तयाचापिहिपादघातैर्निषूदितोऽसौ महिषासुरेन्द्रः ॥४२
एवप्रभावो द्विज विष्णुपञ्जरः सर्वासु रक्षास्वधिकोहिगीतः ।
कस्तस्य कुर्याद्भुविदर्पहानिंयस्यस्थितश्चेतसिचक्रपाणिः ॥४३

हे नारद ! इसके उपरान्त विक्षुर नामधारी दैत्य सेनापति ने नमर नामक दानव को सेना का अग्रगामी किया था ।३६। और वह भी उससे अधिकृत चतुरंग से परिपूर्ण एवं भली भाँति अर्जित बल के एक देश को साथ लेकर बड़े वेग से दुर्गा देवी पर आक्रमण किया था ।३७। इसके अनन्तर समस्त देवगण ने जिनमें ब्रह्माजी अग्रगामी थे उसको आक्रमण करते हुए देखकर यह देवी से प्रार्थना की थी वर्म का बन्धन कर लीजिये ।३८। इसके पश्चात् दुर्गा ने उन देवगण से कहा—मैं कवच को नहीं बाँधती हूँ । यह अधम दानव मेरे आगे क्या ठहर सकता है अर्थात् इसकी शक्ति नहीं है जो मुझ से मुकाबिला कर सके ।३६। जब देवी ने शास्त्रों के निवारणार्थ कवच धारण नहीं किया था तो उस समय में इसकी रक्षा के लिए विष्णु पञ्जर को कहा था ।४०। हे ब्रह्मन् ! उसके द्वारा रक्षित देवी दुर्गा थी । जो बड़े बड़े देवों से भी अवध्य वह दानवों में श्रेष्ठ था उस महिषासुर के प्रति प्रेषित किया था ।४१। इस प्रकार से देववर शम्भु ने वह वैष्णव पञ्जर आयताक्षी के लिए रक्षार्थ कहा था और फिर उस देवी ने भी अपने चरण के घात से ही उस महिषासुरेन्द्र का निषूदन कर डाला था ।४२। इस प्रकार के प्रभाव वाला वह विष्णु पञ्जर है । हे द्विज ! इसकी सब प्रकार की रक्षाओं में अत्यधिक प्रशंसा की गई है । जिसके चित्त में भगवान् चक्रपाणि संस्थित हों उसके दर्प की हानि करने वाला इस भूमण्डल में कौन हो सकता है ? अर्थात् कोई भी नहीं है ।४३।

—·· ——

२० —महिषासुर वध वर्णन

कथं कात्यायनी देवी सानुगं महिषासुरम् ।
सवाहनं हतवती तथा विस्तरतो वद ॥१

अयं च संशयो ब्रह्मन्हृदि मे परिवर्त्तते ।
विद्यामानेषु शस्त्रेषु यत्पद्यां तममर्दयत् ॥२
शृणुष्वावहितो भूत्वा कथामेतां पुरातनीम् ।
वृत्तां देवयुगस्यादौ पुण्यां पापभयापहाम् ॥३
स एवमसुरः क्रुद्धः समापतत वेगवान् ।
सगजाश्वरथो ब्रह्मन्दृष्टो देव्या यथेच्छया ॥४
ततो देवगणैदैत्यान्समानम्याथ कार्मुकम् ।
ववर्ष देवी बाणौघैर्द्योरिवाम्बुदवृष्टिभिः ॥५
तद्धनुर्दानवे सैन्ये दुर्गया नमितं बलात् ।
सुवर्णपुष्पं विबभौ विद्युदम्बुधरेष्विव ॥६
बाणैः सुररिपूनत्यांस्ताडयामास सुव्रत ।
गदया मुसलेनान्यान्स्वस्थानेभ्यो न्यपातयत् ॥७

देवर्षि श्रीनारद जी ने कहा– हे भगवन् ! अब आप कृपया यह बतलाइये कि उस देवी कात्यायनी ने किस प्रकार से अनुग और वाहन भयंकर महिषासुर का वध किया था । विस्तार पूर्वक इस कथा का वर्णन कीजिए ।१। हे ब्रह्मन् ! मेरे हृदय में यह वहुत अधिक संशय वर्त्तमान है कि सम्पूर्ण शास्त्रों के विद्यमान होते हुए भी उसका वध पक्षों के द्वारा ही किया गया था ।२। पुलस्त्य मुनि ने कहा––अब आप पूर्णतया सावधान होकर श्रवण करो । यह एक परम पुरातन कथा है । यह देव युग के आदि काल में घटित हुई थी और यह कथा परम पुण्य-मयी तथा सब पापों के भयों का अपहरण करने वाली है ।३। वह असुर अतीव क्रुद्ध हो कर वेग से युक्त हो आक्रमण करने वाला हुआ था । उसके साथ में हाथी-घोड़े रथ सभी थे । देवी ने यथेच्छा से उसे आते हुए देखा था ।४। इसके अनन्तर देवगणों के सहित भगवती ने कार्मुक को वितत करके बाणों के समूहों की वर्षा की थी जिस प्रकार द्यौ मेघों के द्वारा जल की वर्षा किया करता है ।५। उस धनुष को उस दानवों की सेना पर दुर्गा ने बल से नमित किया था । वह मेघों में विद्युत की भाँति सुवर्ण पुष्प धर शोभित हुआ था ।६। हे सुव्रत !

बाणों के द्वारा असुरों का ताड़न किया था जो अन्य बहुत से युद्ध करने को वहाँ आये थे। कुछ को मुसलास्त्र से अपने स्थान से नीचे गिरा दिया था।७।

एकोऽप्यसौ बहून्दैत्यान्केसरी कालसन्निभः ;
विधुन्वन्केसरसटा निषूदयति दानवान् ।।८
कुलिशाभिहता दैत्याः शक्त्या निर्भिन्नवक्षसः ।
लाङ्गूलैर्दारित्तग्रीवा द्विधा कृत्ताः परश्वधैः ।।९
दण्डनिर्भिन्नशिरसश्चक्रविच्छिन्नबन्धनाः ।
चेलुः पेतुश्च मत्ताश्च तत्यजुश्चापरे रणम् ।।१०
ते वध्यमाना रुद्रास्या दुर्गया दैत्यदानवाः ।
कालरात्रिं मन्यामाना दुद्रुवुर्भयपीडिताः ।।११
सेनान्यं भग्नमालोक्य दुर्गामग्रे तथा स्थिताम् ।
दृष्ट्वा जगाम नमरो मत्तद्विरद संस्थितः ।।१२
समागम्य च वेगेन देव्यां शक्ति मुमोच ह ।
त्रिशूलमपि सिंहाय प्राहिणोद्दानवो रणे ।।१३
तावायायान्तौ ततो देव्या हुङ्कारेणाथ भस्मसात् ।
कृतौ ततो गृजेन्द्रेण गृहीतो मध्यतो हरिः ।।१४

एक ही वह केसरी जो एक काल के समान था बहुत से दैत्यों का वध करने वाला था। अपनी केसरों की सटाओं को विधूनित करके ही दानवों को निषूदित कर रहा था।८। बहुत से दैत्य कुलिश से अभिहत हुए थे, कुछ शक्ति से निर्भिन्न वक्षः स्थल वाले थे। कुछ दैत्य सिंह के लाङ्गूल से ही कटी हुई गरदन वाले हो गये थे। और परमेश्वधों से काटकर दो टुकड़े कर दिये गये थे।९। कुछ दैत्य चक्र से कटे हुए शिरों वाले हुए थे तथा चक्र से विच्छिन्न बन्धनों वाले थे। कुछ वहाँ से चल भगे थे कुछ निपतित हो गये थे और कुछ मत्त होकर रण स्थल का ही त्याग कर चले गये।१०। वे सब वध्यमान रुद्र मुखों वाले दैत्य दानव उस भगवती दुर्गा को साक्षात् काल रात्रि मानते हुए महान् भय से पीड़ित होकर वहाँ से भाग ही गये थे।११। सम्पूर्ण सेना को भग्न

तथा भगवती दुर्गा को समक्ष में स्थित देखकर एक मत्त हाथी पर समारूढ़ नमर युद्ध करने को गया था ।१२। वहाँ आते ही उसने देवी पर बड़े ही वेग से शक्ति का मोंचन किया था । उस दानव ने रण में सिंह पर त्रिशूल का भी प्रहार किया था ।१३। उन दोनों अस्त्रों को आते हुए देख कर भगवती ने अपनी एक हुंकार से ही उनको भस्मसात् कर दिया था । इसके पश्चात् गजेन्द्र के द्वारा वह सिंह मध्य भाग से गृहीत किया गया था ।१४।

अथोत्पत्य च वेगेन तलेनाहृत्य दानवम् ।
गतासुं कुञ्जरस्कन्धात्क्षिप्य देव्य निवेदितः ॥१५
गृहीत्वा दानवं युद्धे ब्रह्मन्कात्यायनी रुषा ।
सव्येन पाणिनाऽऽभ्राम्या वादयत्पटहं यथा ॥१६
ततोऽट्टहास मुमुचे तादृशे वाद्यतां गते ।
हास्यात्समुद्भवंस्तस्या भूता नानाविधाः क्रमात् ॥१७
केचिद्व्याघ्रमुखा रौद्रा वृकाकारास्तथाऽपरे ।
हयास्या महिषास्याश्च वराहवदनाः परे ॥१८
आखुकुक्कुटवक्त्राश्च गोजाविक मुखास्तथा ।
नानावक्त्राक्षिचरणा नानायुधधरास्तथा ॥१९
गायन्त्यन्ये हसन्त्यन्ये क्रीडन्त्यन्ये तु सहताः ।
वादयन्त्यपरे तत्र स्तुवन्त्यन्ये तथाम्बिकाम् ॥२०
सा तैर्भूतगणैर्देवी सार्धं तद्दानव बलम् ।
शातयामास चङ्क्राम्य यथा तृण्यां महाशानिः ॥२१

इसके अनन्तर उस सिंह ने बड़े भारी वेग से उछल कर तथा तले से दानव को आहत करके गतप्राण वाले उसको कुञ्जर के स्कन्ध से फैंककर देवी को निवेदित कर दिया था ।१५। उस युद्ध में हे ब्रह्मन् ! कात्यायनी ने दानव को पकड़ कर क्रोध से अपने सव्य कर से घुमाकर पटह की भाँति वादन किया था ।१६। उस प्रकार के वाद्य होने पर फिर उसने एक महान् अट्टहास किया था । उसके उस हास्य से अनेक भूतक्रम से समुत्पन्न हो गये थे ।१७। उनमें कुछ तो व्याघ्र के समान

मुखों वाले बहुत ही रौद्र रूप वाले थे। कुछ वृक के समान आकार वाले थे उनमें कुछ अश्व के समान मुख से युक्त तथा कुछ महिष के मुखों वाले और कुछ सूकर के तुल्य मुखों वाले थे।१८। मूषक, कुक्कुट गो, अजाविक के समान, अनेक भाँति के मुख, नेत्र और चरणों वाले तथा नाना आयुधों के धारण करने वाले थे।१९। कुछ गायन करते थे, कुछ हँसते थे और कुछ संद्रुत् होकर क्रीड़ा करते थे। दूसरे कुछ उनमें से वादन करते थे और कुछ वहाँ पर अम्बिका देवी का स्तवन कर रहे थे।२०। उन समस्त भूतगणों के साथ उन्हीं भगवती जगदम्बा ने उस दानवों के बल को नष्ट कर दिया था जिस प्रकार से तृणों के समूह को अशनि नष्ट भ्रष्ट कर दिया करता है।२१।

सेनान्ये निहते तस्मिस्तथा सेनाग्रगामिभिः।
चिक्षुरः सैन्यपालस्तु योधयामास देवताः ॥२२
कार्मुकं दृढमाकर्णमाकृष्य रथिनां वरः।
ववर्ष शरजालानि यथा मेघो वसुन्धराम् ॥२३
तान्दुर्गा स्वशरैश्छित्त्वा शरसंघान्सुपर्वभिः।
सावर्णपुङ्खानपराञ्छराञ्जग्राह षोडश ॥२४
ततश्चतुर्भिश्चतुरस्तुरङ्गानपि भामिनी।
हत्वा सारथिमेकेनध्वजमेकेन चिच्छिदे ॥२५
ततस्तु सशरं चाप चिच्छेदैकेषुणाम्बिका।
छिन्ने धनुषि खड्गं च चर्म चादत्तवान्बली ॥२६
तं खड्गं चमणा सार्द्धं दैत्यस्याधुन्वतो बलात्।
शरैश्चतुर्भिश्चिच्छेद ततः शूलं समाददे ॥२७
समुद्यम्य महाशूलं प्राद्रवत्म तथाऽम्बिकाम्।
क्रोष्टुको मुदितोऽरण्ये मृगराजवधूं यथा ॥२८

उस सम्पूर्ण सेना के निहत हो जाने पर तथा सेना के अग्र गामियों के नष्ट होने पर फिर सैन्यपाल चिक्षुर ने उन देवगण के साथ युद्ध किया था।२२। उस रथियों में श्रेष्ठ ने धनुष को दृढ़ता के साथ कान तक आकृष्ट करके शरों के जाल की वर्षा की थी जैसे मेघ भूमि पर

वृष्टि किया करता है ।२३। उन सब शरों को अपने सुपर्व शरों के द्वारा देवी दुर्गा ने छेदन कर दिया था। फिर उस दानव ने दूसरे सुवर्ण के पुंख वाले शरों को ग्रहण किया था। इसके अनन्तर उस भामिनी ने चारों शरों से चारों अश्वों को-एक से सारथि को और एक से ध्वज को छिन्न कर दिया था ।२४-२५। फिर अम्बिका ने एक वाण से शरों के सहित उसके चाप को छिन्न कर दिया था। धनुष के छेदन होने पर उस बली ने खंग और चर्म ग्रहण किया था ।२६। बड़े बल से उस खंग और ढाल को घुमाते हुए उस दैत्य के उस आयुध को भी देवी ने शरों से छेदन कर दिया था फिर उसने शूल लिया था ।२७। उस महाशूल को लेकर वह एक दम अम्बिका पर आक्रमण करने लगा था जिस तरह कोई श्रृगाल अरण्य में सिंहनी पर प्रसन्न होकर धावा बोलता हो ।२८।

तस्याभिपततः पादौ कर शीर्षं च पञ्चभिः।
शरैश्चिच्छेद संक्रुद्धा न्यपतत्स हतोऽसुरः ॥२९
तस्मिन्सेनापतौ क्षुण्णे तदोग्रास्यो महासुरः।
समाद्रवत वेगेन करालास्यास्तु दानवाः ॥३०
बाष्कलश्चोद्धतश्चैव उग्रास्योऽथोग्रकार्मुकः।
दुर्द्धरो दुर्मुखश्चैव बिडालनलनोऽपरः ॥३१
एतेऽन्ये च महात्मानो दावना बलिनां वराः।
कात्यायनीमाद्रवन्त नानाशस्त्रास्त्रपाणयः ॥३२
तान्दृष्ट्वा लीलया दुर्गा वीणां जग्राह पाणिना।
वादयामास हसती तथा डमरुकं वरम् ॥३३
यथा यथा वादयते देवी वाद्यानि तानि च।
तथा तथा भूतगणा नृत्यन्ति च हसन्ति च ॥३४
ततोऽसुराः शस्त्रधराः समभ्येत्य सरस्वतीम्।
अभ्यघ्नस्तांश्च सा देवी जग्राह परमेश्वरी ॥३५

इस तरह आक्रमण करने वाले उस दानव के दोनों पैर और हाथों तथा मस्तक को पाँच शरों से अम्बिका ने अत्यन्त क्रुद्ध होकर काट

डाला था और वह असुर गतप्राण होकर भूमि पर गिर गया था ।२९। उस सेनापति के निपतित हो जाने पर फिर उस समय में उग्रास्य महान् असुर बड़े वेग से धावा करने लगा । उसके साथी दानव भी कराल मुखों वाले थे ।३०। जिनके नाम ये हैं—वाष्फल, उद्धत, उग्रास्य, उग्र-कार्मुक, दुर्द्धर, दुर्मुख, विडाल नयन ।३१। बलशालियों में परम श्रेष्ठ ये और अन्य भी बहुत से दानवगण कात्यायनी पर धावा करके चढ़ आये थे जिनके परम नाना भाँति के शस्त्र-अस्त्र थे ।३२। दुर्गा देवी ने उन सबको देखकर लीला से अपने हाथ में वीणा ग्रहण करली थी और उसका वादन तथा डमरु का वादन हँस कर कर रही थीं ।३३। देवी जैसे उनका वादन करती थी उन वाद्यों के वादन को सुनकर वैसे ही समस्त भूतगण भी नृत्य करने लगे थे तथा हँस रहे थे ।३४। इसके पश्चात् शस्त्रों के धारण करने वाले असुर गण सरस्वती के समीप में आकर प्रहार करने लगे तथा उस परमेश्वरी देवी ने उन सब को पकड़ लिया था ।३५।

प्रगृह्य केशेषु महासुरांस्तानुत्पत्य सिंहात्तु नगस्य सानुम् ।
ननर्त्त वीणां परिवादयन्ती पपौ च पानं जगतां जनित्रीः ॥३६
ततस्तु देव्या बलिनो महासुरा दोर्दण्डनिर्धूतविशीर्णदर्पाः ।
विशस्त्रवस्त्राव्यसवश्च जातास्ततस्तुतान्वीक्ष्य महासुरेन्द्रान् ॥
देव्या महौजा महिषासुरस्तु व्यद्राव यद्भूतगणान्सुराग्रैः ।
तुण्डेन पुच्छेन तथौजसाऽन्यान्निःश्वासवातेनचभूतसंघान् ॥३८
विषाणकोट्या च परान्प्रमथ्य दुद्राव सिंहं प्रतिहन्तुकामः ।
ततोऽम्बिका क्रोधवशं जगाम चिक्षेपदैत्यंसहसैवलीलया ॥३९
ततः स कोपादथ तीक्ष्णशृङ्गः क्षिप्रं गिरीन्भूमिमशीर्णयच्च ।
संक्षोभयंस्तोवनिधीन्घनांश्च विध्वंसयन्प्राद्रवताथ दुर्गाम् ॥४०
सा चाथ पाशेन बबन्धु दुष्टं स चाप्यभूद्भिन्नकटः करीन्द्रः ।
करं प्रचिच्छेद चहस्तिनोऽग्रसचापिभूयो महिषोऽभिजातः ॥४१
ततोऽस्य शूलं व्यसृजद्भवानी स शीर्णमूलो न्यपतत्पृथिव्याम् ।
शक्तिं प्रचिक्षेप हुताशवक्त्रां सा कुण्ठिताग्रा न्यपतन्महर्षे ॥४२

उनकी चोटी पकड़ कर उन सब महासुरों को उछाल कर पर्वत की चोटी पर सिंह के खाने के लिये फेंक दिया था। वह जगत् को जन्म देने वाली अम्बिका अपनी वीणा का परिवादन करती हुई मदिरा का पान कर रही थी।३६। इसके अनन्तर देवी के द्वारा वे सब महाबली महान् असुर दोर्दण्ड से निर्धूत एवं विशीर्ण दर्प वाले हो गये थे। शस्त्र तथा वस्त्र से हीन होकर वे सभी गत प्राण हो गये थे। ऐसी दशा उन महासुरों की देख कर वह महिषासुर देवी पर तथा उन भूतगणों पर खुरों के अग्र भागों से प्रहार करता हुआ चढ़कर आया था। वह तुण्ड, पुच्छ और ओज से एवं निःश्वास की वायु से समस्त भूत समुदाय को प्रमथित करने लगा था। विषाणों से वह सबको मारता हुआ देवी के वाहन सिंह को भी मारने की इच्छा करने लगा था। इसके पश्चात् देवी को बड़ा भारी क्रोध आया था और फिर उस भगवती ने उस दैत्य को लीला ही से सहसा फेंक दिया था ।३७-३९। इसके अनन्तर कोप से तीक्ष्ण सींगों वाले ने शीघ्र ही पर्वत और भूमि को विशीर्ण कर दिया था। तथा मेघों एवं सागरों को भी विध्वस्त करते हुए दुर्गा पर उसने आक्रमण किया था।४०। उस देवी ने पाश से उस दुष्ट को बाँध दिया था तो वह भिन्न कर वाला करीन्द्र हो गया था। जब उस हस्ती का कर (सूँड़) काट दी तो वह फिर महिष हो गया था।४१। इसके अनन्तर भवानी ने उस पर शूल से प्रहार किया था तब वह शीर्ण मूल वाला होकर भूमि पर गिर गया था। हे महर्षे! हुताश मुख वाली शक्ति का प्रक्षेप किया था, वह भी कुण्ठित अग्रभाग वाली होकर गिर गई थी।४२।

चक्रं हरेर्दानवचक्रहन्तुः क्षिप्रं च वक्रत्वमुपागतं हि।
गदांसमाविध्यधनेश्वरस्यक्षिप्ताऽऽशुभग्नान्यपतत्पृथिव्याम् ।।४३
जलेशपा शोऽपि महासुरेण विषाणतुण्डाग्रखुरप्रणुन्नः।
निरस्यताकोपितयाचमुक्तोदण्डस्तुयाम्योबहुखण्डतांगतः ।।४४
वज्रं सुरेन्द्रस्य च विग्रहेस्य मुक्तं सुसूक्ष्मत्वमुपाजगाम।
संत्यज्य सिंहं महिषासुरस्य दुर्गाधिरूढा सहसैव पृष्ठम् ।।४५

पृष्ठस्थितायां महिषासुरोऽपि पोप्लूयते वीर्यमदान्मृडान्याम् ।
साचापिपद्भ्यांमृदुकोमलाभ्यांममर्द तं क्लिन्नमिवाजिनं हि।।४६
स मृद्यमानो धरणीधराभो देव्या बली हीनबलो बभूव ।
ततोऽस्यशूलेनबिभेदकण्ठंतस्मात्पुमान्खड्गधरोविनिर्गतः ।।४७
निष्क्रान्तमात्र हृदये यदा तमाहत्य संगृह्य कचेषु कोपात् ।
शिरः प्रचिच्छेद वरासिनाऽस्यहाहाकृतंदैत्यबलंतदाऽभूत् ।।४८
सचण्डमुण्डा समयाः सताराः सहासिलोम्ना भयकातराक्षाः ।
संताड्यमानाः प्रमथैर्भवान्याःपातालमेवाविविशुर्भयार्ताः।।४६

दानवों के समुदाय के हनन करने वाले हरि भगवान् का चक्र भी तुरन्त वक्रता को प्राप्त हो गया था। धनेश्वर की गदा को समाविद्ध कर फेंका तो वह भी शीघ्र ही भग्न हो गई थी और भूमि पर गिर गई थी।४३। वरुण का पाश भी महासुर के द्वारा विषाण-तुण्ड के अग्र-भाग और खुरों से प्रणुम हो गया था। अत्यन्त कोप से युक्त होकर यमराज के दण्ड को छोड़ा गया था तो वह भी बहुत से टुकड़ों में होकर गिर गया था। सुरेन्द्र का वज्र भी इस दानव के शरीर में छोड़ा गया था तो वह भी सूक्ष्मता को प्राप्त हो गया था। उसी समय में समस्त महान् प्रभावशाली आयुधों की ऐसी कुण्ठित दशा देखकर दुर्गा देवी ने सिंह का त्याग कर सहसा उस महिषासुर की पीठ पर समारूढ़ हो गई थी।४४-४५। जब महिषासुर ने देखा कि देवी मेरी पीठ पर ही समा-रूढ़ हो गई है वीर्य के मद से वह बहुत ही पोप्लूयमान हुआ था किन्तु उस भगवती ने भी अपने मृदु तथा कोमल चरणों से उसका क्लिन्न अश्व की भाँति मर्दन किया था।४६। इस प्रकार से जब बहुत अधिक मर्दित हुआ तो धरणी धर के समान आभा वाला बली वह भी देवी के द्वारा हीन बल वाला हो गया था। इसके अनन्तर इसका कण्ठ शूल से भेदन किया गया था तो उससे एक खड्गधारी पुमान निकला था। जबकि वह निकला ही था कि उसके हृदय में आहत करके उसके केश क्रोध से पकड़ लिये और खड्ग से उसका शिर काट दिया था। उसी समय में दैत्य सेना में हाहाकार छा गया था।४७-४८। फिर तो सब

को बड़ा भारी भय हो गया था । चण्ड, मुण्ड, तार, असि लोभ आदि समस्त भय से अत्यन्त कातर होकर तथा भवानी के प्रमथों के द्वारा संताड़ित होकर पाताल लोक में प्रवेश कर गये थे ।४६।

देव्या जयं देवगणा विलोक्य स्तुवन्ति देवीं स्तुतिभिर्महर्षे ।
नारायणीं सर्वजगत्प्रतिष्ठां कात्यायनी घोरमुखींसुरूपाम् ।।५०
संस्तूयमाना सुरसिद्धसंघैः कात्यायनी सा हरपादमूले ।
भूयो भविष्याम्यमरार्थनेवमुक्त्वासुरांस्तान्प्रविवेश दुर्गा ।।५१

उस समय में देवी का जप देखकर समस्त देवगण हे महर्षे ! देवी की स्तुति करने लगे थे जो भवानी नारायणी—सम्पूर्ण जगत् की प्रतिष्ठा स्वरूपा, घोर मुख वाली, सुन्दर रूप वाली कात्यायनी थी ।५०। इस प्रकार से सुर और सिद्धों के संघ द्वारा संस्तूयमान होती हुए वह कात्यायनी दुर्गा हर के पाद-मूल में यह कहकर प्रवेश कर गई थी कि मैं पुनः देवगण के कार्य के लिये होऊँगी और उसने सब सुरों को वहाँ पर ही छोड़ दिया था ।५१।

२१—उमासम्भव वर्णन

पुलस्त्य कथ्यतां तावद्भूयो देव्याः समुद्भवः ।
महत्कौतूहलं मेऽद्य विस्तराद्ब्रह्मवित्तम ।।१
श्रूयतां कथयिष्यामि भूयोऽस्याः संभवं मुने ।
शुम्भासुरवधार्थाय लोकानां हितकाम्यया ।।२
या सा हिमवतः पुत्री भवेनोढा तपोधन ।
उमा नाम्ना च तस्याः सा कोशज्जाता तु कौशकी ।।३
संभूय विन्ध्यं गत्वा च भूयो भूतगणैर्वृता ।
शुम्भं चैव निशुम्भं च वधिष्यति वरायुधैः ।।४
ब्रह्मंस्त्वया ममाख्याता मृता दक्षात्मजासती ।
सजाता हिमवत्पुत्रात्येवं मे वक्तुमर्हसि ।।५

यथा हि पार्वती कोशात्समुद्भूता हि कौशिकी ।
यथा हतवतीं शुम्भं निशुम्भं च महासुरम् ।।६
कस्य चेमौ सुतौ वीरौ ख्यातौ शुम्भनिशुम्भकौ ।
एतन्मेतत्त्वतः सर्वं यथावद्वक्तुमर्हसि ।।७
भगवंस्त्वत्प्रसादेनदेव्याश्चरितमुत्तमम् ।
श्रुत विस्तरतो ब्रूहि पावत्याः संभवं मुने ।।८

देवर्षि नारद ने कहा—हे मुनीन्द्र पुलस्त्य ! अब आप भगवती का फिर जो जन्म हुआ था उसका वर्णन कीजिए हे ब्रह्म वित्तम ! मेरे हृदय में इस सम्बन्ध में बड़ा भारी कौतूहल उत्पन्न हो रहा है । अतएव इसको विस्तार पूर्वक ही कहिए ।१। पुलस्त्य मुनि ने कहा—हे मुने ! आप सुनिए, मैं इस देवी का पुनः जो जन्म हुआ था उसे वर्णन करता हूं जो कि शुम्भासुर के वध करने के लिये और लोकों के हित की कामना से ही हुआ था ।२। हे तपोधन ! जो हिमवान् की पुत्री थी और भगवान् भव ने जिसके साथ विवाह किया था उसका उमा यह नाम था क्योंकि वह कोश से समुत्पन्न हुई थी अतएव कौशिकी भी नाम है ।३। इस प्रकार से जन्म ग्रहण करके और पुनः समस्त मुनि भूतादि गणसे परिवृत्त होती हुई विन्ध्याचल में जाकर अपने श्रेष्ठ आयुधों से दैत्य शुम्भ और निशुम्भ का वध करेगी । श्री देवर्षि नारद ने कहा—हे ब्रह्मन् ! आप ने तो मुझे बतलाया था कि वह प्रजापति दक्ष की पुत्री सती मृत्युगत होगई थी । फिर वह हिमवान् की पुत्री होकर प्रसूत हुई थी, इसका पूर्ण वर्णन मुझे करके श्रवण कराने के आप योग्य हैं ।४-५। जिस तरह से यह पार्वती कोश से समुत्पन्न होकर कौशिकी हुई और जिस भाँति शुम्भ तथा निशुम्भ जैसे महान् असुरों का हनन किया था ।६। ये दोनों जो शुम्भ और निशुम्भ नामों से विख्यात हुए थे किसके वीर पुत्र थे—इस पूरी कथा को मेरे सामने अब आप तात्त्विक रूप से वर्णन करने के योग्य हैं ।६। हे मुने ! हे भगवन् ! आपकी कृपा एवं परम प्रसन्नता से मैंने भगवती जगदम्बा का अत्युत्तम चरित सुना है किन्तु अब पार्वती का चरित विस्तार पूर्वक बताइये कि इसका जन्म कैसे हुआ था ।८।

दिष्ट्या संकथयिष्यामि पार्वत्याः संभवं मुने ।
शृणुष्वावहितो भूत्वा स्कन्दोत्पत्तिं च शाश्वतीम् ॥६

रुद्रः सत्यां प्रनष्टायां ब्रह्मचारिव्रते स्थितः ।
निराश्रमत्वमापन्नस्तपस्तप्तुं व्यवस्थितः ॥१०

स चासीद्देवसेनानीर्दैत्यदर्प्पविनाशनः ।
शिव रूपत्वमास्थाय सैनापत्यं समुत्सृजत् ॥११

ततो विनाकृता देवाः सेनानाथेन शंभुना ।
दानवेन्द्रेण विक्रम्य निशुम्भेन पराजिताः ॥१२

ततो जग्मुः सुरेशानं द्रष्टुं चक्रगदाधरम् ।
श्वेतद्वीपे महाहंसं प्रपन्नाः शरणं हरिम् ॥१३

तानागतान्सुरान्दृष्ट्वा ततः शक्रपुरोगमान् ।
विहस्य मेघगम्भीरं प्रोवाच पुरुषोत्तमः ॥१४

महर्षि पुलस्त्य ने कहा—हे मुने ! बहुत ही आनन्द का विषय है, अब मैं पार्वती का जन्म तुम्हें बतलाता हूं। आप परम सावधान होकर सुनो। शाश्वती भगवान् स्कन्द की उत्पत्ति भी बतलाता हूँ।६। भगवान् रुद्र जब सती का शरीर नष्ट हो गया था तो वह ब्रह्मचर्य व्रत में संस्थित होकर रहने लगे थे तथा निराश्रय को प्राप्त हो गये थे और उनने तपश्चर्या करने की व्यवस्था कर ली थी।१०। वह देवगण के सेनानी थे और दैत्यों के सर्वदा दर्प का नाश किया करते थे। फिर उनने शिव रूपता धारण कर वह सेनापति का जो पद सँभाल रखा था पूर्ण रूप से त्याग ही दिया क्योंकि मन में वैराग्य हो गया था।११। इसके अनन्तर ऐसा हुआ था कि समस्त देवगण सेना के स्वामी शम्भु ने बिना सेनानी वाले बना दिये थे। उसी समय में दानवेन्द्र निशुम्भ ने आक्रमण करके समस्त देवता पराजित कर दिये थे।१२। इसके पश्चात् सब देवता सुरों के स्वामी चक्र गदा धारी प्रभु के समीप में पहुंचे थे। श्वेत द्वीप में महान् परम हंस भगवान् श्री हरि की शरणागति सब ने ग्रहण की थी।१३। उस समागत, देवगणों को देखकर जिनमें इन्द्र नायक थे

भगवान् पुरुषोत्तम हंस कर कहने लगे थे। उस समय उनकी वाणी मेघ के समान गम्भीर थी।१४।

किं जिताः स्थ सुरेन्द्रेण निशुम्भेन दुरात्मना।
येन सर्वेसमेत्यैव मम पार्श्वमुपागताः ॥१५
तद्युष्माकं हितार्थाय यद्वदामि सुरोत्तमाः।
तत्कुरुध्व जयो यद्धि समाश्रित्य भवेत्ततः ॥१६
य एते पितरो देवास्त्वग्निष्वात्तेति विश्रुताः।
अमीषां मानसी कन्या मेना नाम्नाऽस्ति देवता ॥१७
तामाराध्य महा तिथ्यां श्रद्धया परयाऽमराः।
प्रार्थयध्वं सतीमेनां प्रालेयाद्रिमहार्थतः ॥१८
तस्यां सा रूपसंयुक्ता भविष्यति तपस्विनी।
दक्ष कोपाद्यया मुक्तं मलवज्जीवितं प्रियत् ॥१९
सा शंकरात्सतेजोंऽशं जनयिष्यति यं सुतम्।
स हनिष्यति दैत्येन्द्रं शुम्भं च सपदानुगम् ॥२०
तस्माद्गच्छत पुण्यं तत्कुरुक्षेत्रं महाफलम्।
तत्र पृथूदके तीर्थे पुज्यन्तां पितराऽव्ययाः ॥२१

भगवान् ने कहा—क्या असुरेन्द्र निशुम्भ ने आप सबको जीत लिया है। वह तो बहुत ही दुष्ट है? इसीलिये शायद आप लोग सब इकट्ठे होकर इस समय मेरे पास आये हैं।१५। हे सुरोत्तमो! अब मैं आपके हित के लिये जो भी कुछ बतलाता हूँ उसे आप करिये। उसी प्रकार से समाश्रय करने पर आपकी जीत हो जायगी।१६। जो ये पितर गण हैं हे देवगण! कि अग्निष्वात्ता—इस नाम से प्रसिद्ध हैं। इनकी एक मानसी कन्या मेना नाम से प्रसिद्ध है। यह देव रूपिणी है।१७। उसका आप लोग महातिथि में परम श्रद्धा से समाराधन करो। इस सती से आप लोग प्रार्थना करो कि प्रालेयाद्रि के महान् अर्थ का वह सम्पादन करे।१८। उसी में वह परम रूप-लावण्य में समन्वित होकर तपस्विनी समुत्पन्न होगी। दक्ष पर कोप से जिसने अपना प्रिय जीवन मल की भाँति त्याग दिया था।१९। वही देवी शङ्करांश से सतेज अंश स्वरूप

पुत्र समुत्पन्न करेंगी। वही शम्भु पुत्र समदानुग उस शुम्भ दैत्य का हनन करेगा।२०। इसलिये अब आप सब महान् फल वाले परम पुण्यमय कुरुक्षेत्र में चले जाओ। उस पृथूदक तीर्थ में उन अविनाशी पितरों की समर्चा करो।२१।

महातिथ्यां महापुण्ये यदि शत्रुपराभवम्।
भवनाथात्मना सर्वे इच्छथ क्रियतामिति ॥२२
इत्युक्त्वा वासुदेवेन देवाः शक्रपुरोगमाः।
कृताञ्जलिपुटा भूत्वा पप्रच्छुः परमेश्वरम् ॥२३
किं तत्कुरुक्षेत्रमिति यत्र पुण्य पृथूदकम्।
उद्भवं तस्य तीर्थस्य भगवान्प्रब्रवीतु नः ॥२४
केयं प्रोक्ता महापुण्या तिथीनामुत्तमा तिथिः।
यस्यां हि पितरो दिव्या अद्भिः पूज्याः प्रयत्नतः ॥२५
ततः सुराणां वचनान्मुरारिः कैटभार्द्दनः।
कुरुक्षेत्रोद्भवं पुण्यं प्रोक्तवांस्तां तिथीमपि ॥२६
सोमवंशोद्भवो राजा ऋक्षो नाम महाबलः।
कृतस्यादौ समभवदृक्षात्संवरणोऽभवत् ॥२७
स च पित्रा निजे राज्ये बाल एवाभिषेचितः।
बाल्येऽपि धर्मनिरतो मद्भक्तश्च सदाऽभवत् ॥२८

महातिथि में महापुण्य में यदि शत्रु का पराभव आप चाहते हैं तो भवनाथ के पुत्र के द्वारा ही पूर्ण होगा। ऐसा ही आप करें।२२। पुलस्त्य मुनि ने कहा—इस प्रकार से वासुदेव के द्वारा कहने पर शक्र आदि समस्त देवगण हाथ जोड़कर पुनः प्रभु से पूछने लगे थे।२३। देवगण ने कहा—हे भगवन्! वह कुरुक्षेत्र क्या है जहाँ पर परम पुण्यमय पृथूदक है? आप उस तीर्थ की उत्पत्ति कृपाकर हम सबको बतला दीजिए।२४। यह कौन सी महापुण्य मयी तिथियों में परम उत्तम तिथि होती है? जिसमें दिव्य पितर गण प्रयत्न पूर्वक पूजा के योग्य होते हैं।२५। इसके अनन्तर कैटभ के अर्दन करने वाले भगवान् मुरारि सुरों के इन वचनों को सुनकर कुरुक्षेत्र में उत्पन्न उस पुण्यमय तीर्थ तथा

उस महातिथि को कहने लगे थे ।२६। श्रीभगवान् ने कहा—पहिले एक सोम वंश में समुत्पन्न ऋभ नाम वाला महान् बलशाली राजा हुआ था। यह कृतयुग के आदि में ही हुआ था और ऋक्ष से संवरण था।२७। उसके पिता के द्वारा वह बाल्य काल में ही अपने राज्यासन पर अभि-षिक्त कर दिया गया था किन्तु उस बचपन की दशा में भी वह सदा धर्म में निरत रहता तथा सदा मेरा परम भक्त हुआ था।२८।

पुरोहितस्तु तस्यासीद्वसिष्ठो वरुणात्मजः ।
स तमध्यापयामास साङ्गान्वेदानुदारधीः ॥२६
ततो जगाम चारण्ये त्वनध्याये नृपात्मजः ।
सर्वकर्मसु निक्षिप्य वसिष्ठं तपसां निधिम् ॥३०
ततो मृगस्य व्याक्षेपादेकाकी वाजिना वनम् ।
वैभ्राजं स जगामाथ मनोन्मादेन तन्मुने ॥३१
ततस्तु कौतुकाविष्टः सर्वर्तुकुसुमे बने ।
अवितृप्तः त्रगन्धस्य समन्ताद्व्यचरद्वनम् ॥३२
सवनान्तंददर्शाथ फुल्लकोकनदावृतम् ।
कल्हारपद्मकुमुदैः कमलेन्दीवरैरपि ॥३३
तत्र क्रीडन्ति सततमप्सरोऽमरकन्यकाः ।
तासां मध्ये ददर्शाथ कन्यां संवरणोऽधिकाम् ॥३४
दर्शनादेव स नृपः काममार्गणपीडितः ।
तथा सा तं समीक्ष्यैव कामबाणातुराऽभवत् ॥३५

उस राजा का पुरोहित वरुण का पुत्र वसिष्ठ था। वही उस बाल नृप को साङ्ग वेदों का अध्यापन कार्य किया करते थे और वह पुरोहित बहुत ही उदार बुद्धि वाले थे ।२६। एक बार जब कि अनध्याय का दिन था वह नृपात्मज अरण्य में चला गया था अपने समस्त कार्यों का भार तपोनिष्ठ वसिष्ठ पर छोड़ गया था।३०। वहाँ पर हे मुने ! मृग के व्याक्षेप से अश्व के द्वारा वैभ्राज वन में अकेला मनोन्माद से पहुँच गया था।३१। इसके अनन्तर वहाँ पर कौतुक में समाविष्ट हो गया था। वह वन ऐसा अद्भुत था कि उसमें हर समय में सभी ऋतुऐं विद्यमान

रहती थीं। वहाँ की परमोत्तम सुगन्ध से वह तृप्त नहीं हुआ था और वहाँ पर चारों ओर विचरण करने लगा था।३२। उसने उस वनान्त को भली भाँति देखा था जो विकसित कोक नदों से समावृत्त था। उसमें कह्लार-कुमुद-पद्म-कमल-इन्दीवर आदि विविध पुष्पों की गन्ध भरी हुई थी।३३। वहाँ पर सर्वदा अमर कन्याऐं अप्सरागण क्रीड़ा किया करती थीं। उन्हीं के मध्य में एक संवरणाधिक कन्या उसने देखी थी।३४। उसको देखते ही वह नृप कामदेव के बाणों से सम्पीड़ित हो गया था। इसी भाँति वह कन्या भी उस नृप को देखकर काम बाण से आतुर हो गई थो।३५।

उभौ तौ पीडितौ मोहं जग्मतुः काममार्गणः।
राजा चलासनो भूम्यां निपपात तुरङ्गमात् ॥३६
तमभ्येत्य महात्मानो गन्धर्वाः कामरूपिणः।
सिपिचुर्वारिणा तेन लब्धसंज्ञोऽभवत्क्षणात् ॥३७
सा चाप्सरोभिरुत्पाट्य नीता पितृकुलं निजम्।
ताभिराश्वासिता चापि मधुरैर्वचनाम्बुभिः ॥३८
सा चाप्यरुह्य तुरगं प्रतिष्ठानं पुरोत्तमम्।
गतस्तु मेरुशिखरं कामाचारी यथाऽमरः ॥३९
यदा प्रभृति सा दृष्टा चक्षुषा तपती गिरौ।
तदा प्रभृति नाश्नाति दिवा स्वपिति वा निशि ॥४०
ततः सर्वविदव्यग्रो विदित्वा वरुणात्मजः।
तपतीतापितं वीरं पार्थिवं तपसां निधिः ॥४१
समुत्पत्य महायोगी गगनं रविमण्डलम्।
विवेश देवं तिग्मांशुं ददर्श स्यन्दने स्थितम् ॥४२

वे दोनों ही परम पीड़ित हो गये थे और काम के बाणों से समाविद्ध होकर मोह को प्राप्त होगये थे। राजा चलासन होकर एकदस भूमि पर ही अश्व से गिर गया था।३६। महान् आत्मा वाले कामरूपी गन्धर्व उसके समीप से उसको संज्ञा प्राप्त हुई थी और उसी समय में वह होश में आगया था।३७। और वह जो अप्सरा थी उसको अप्सराओं

ने उठाकर अपने पिता के कुल के समीप में प्राप्त कर दिया था और वहाँ पर वह श्रुति मधुर वचनों के द्वारा जो एक परम शीतल जल के समान थे भली भाँति आश्वासित की गई थी ।३८। वह भी अपने अश्व पर समारूढ़ होकर पुरोत्तम प्रतिष्ठान को चला गया था जैसे देवगण काम से ही चरण करने वाले मेरुपर्वत के शिखर पर चले जाया करते हैं ।३९। जब से लेकर वह गिरिवर में तपश्चर्या करती हुई वह नेत्र से देखी थी तब तक दिन में भोजन नहीं और रात में शयन का अभाव हो गया था ।४०। इसके अनन्तर सर्ववेत्ता वरुणात्मज अव्यग्र जाग्रनकर तपती तापित वीर पार्थिव का ज्ञान प्राप्त करके वह तपोनिधि महान् योगी ऊपर उड़कर रवि मण्डल गगन में प्रविष्ट होगया था और वहाँ रथ में स्थित निग्मांशु सूर्य्य का दर्शन किया था ।४१-४२।

तं दृष्ट्वा भास्करं देवं ननाम द्विजसत्तमः ।
प्रतिप्रणमितश्चासौ भास्करेणाप्यसावृषिः ॥४३
ज्वलज्जटाकलापोऽसौ दिवाकरसमीपगः ।
शोभते वारुणिः श्रीमान्द्वितीय इव भास्करः ॥४४
ततः संपूजितोऽर्घाद्यैर्भास्करेणा तपोधनः ।
पृष्टश्चागमने हेतुं प्रत्युवाच दिवाकरम् ॥ ५
समायातोऽस्मि देवेश याचितुं त्वां महाद्युते ।
सुतां संवरणस्यार्थे त्वं च तां दातुमर्हसि ॥४६
ततो वसिष्ठाय दिवाकरेणं निवेदिता सा तपती तनूजा ।
गृहागताय द्विजपुंगवाय राज्ञोऽर्थतः संवरणस्य चैव ॥४७
सावित्रमासाद्य वचो वशिष्ठः स्वमाश्रमं पुण्यमुपाजगाम ।
सा चापिसंस्मृत्यनृपात्मजतंकृत ञ्जलिर्वारुणिमाहदेवी ॥४८
ब्रह्मन्मयाखेदमुपेत्य यो हि सहाप्सरोभिः परिचारिकाभिः ।
दृष्टोह्यरण्येऽमरगर्भतुल्यो नृपात्मजो लक्षणतोऽपि जाने ॥४९

वहाँ उस द्विजों में परम श्रेष्ठ ने भुवन भास्कर सूर्य्य का दर्शन कर उन्हें प्रणाम किया था और प्रणमित होकर उस रविदेव ने भी उस ऋषिवर को प्रणाम किया था ।४३। जाज्वल्यमान जटाओं के कलाप

से समन्वित यह दिवाकर के समीप में जाकर वारुणि दूसरे भास्कर के समान ही शोभा को प्राप्त हो रहे थे ।४४। इसके अनन्तर सूर्य्य के द्वारा पूजन आदि से तपोनिधि का समुचित सत्कार किया गया था और फिर दिवाकर देव ने वहाँ आगमन का उनसे कारण पूछा था । इस पर वह सूर्य्य से बोले ।४५। हे देवेश ! आप तो अतीव महान् द्युति से समन्वित हैं। मैं आप से एक याचना करने के लिये ही उपस्थित हुआ हूं । आप उस सुता को संवरण के लिये देने में समर्थ होते हैं ।४६। इस के पश्चात् दिवाकर ने वह तपती तनूजा वसिष्ठ के लिए निवेदित की थी । गृह में आये हुए उस द्विज श्रेष्ठ के लिये राजा संवरण के अर्थ से सविता के वचन को प्राप्त कर वसिष्ठ पुनः अपने परम् पुण्य आश्रम में आगया था और वह भी देवी उस नृप के पुत्र का स्मरण करके हाथ जोड़ कर उस वारुणि से बोली ।४७-४८। तपती ने कहा—हे ब्रह्मन् ! मैंने खेद को प्राप्त करके अपनी परिचारिका अप्सराओं के साथ जो देव के समान नृपात्मज अरण्य में देखा था उसे मैं लक्षणों से भी भली भांति जानती हूँ ।४९।

पादो शुभौ चक्रगदासिचिह्नौ जङ्घे तथोरू करिहस्ततुल्यौ ।
कटिर्यथा केसरिणस्तथैव क्षामं च मध्यत्रिवलीनिबद्धम् ।।५०
ग्रीवास्यशङ्खाकृतिमादधाति भुजौ च पीनौकठिनौसुदीर्घौ ।
हस्तौ यथा पद्मदलोद्भवङ्कौछत्राकृतिस्तस्यशिरोविभाति ।।५१
नीलाश्च केशाःकुटिलाश्चतस्य कर्णौसमांसौ सुसमा च नासा ।
दीर्घाश्चतस्याङ्गुलयःसुपर्वाःपभ्द्यांकराभ्यांदशनाश्चशुभ्राः।।५२
समुन्नतः षड्भिरुदारवीर्यस्त्रिभिर्गभीरस्त्रिषु च प्रलम्बः ।
रक्तस्तथा सप्तसु राजपुत्रः कृष्णश्चतुर्भिस्त्रिभिरानतोऽपि ।।५३
द्वाभ्यां च शुक्लः सुरभिश्चतुर्भिः सन्त्येवपद्मानिदशैवचास्यः ।
वृतः स भर्त्ता भगवन्हि पूर्वं त राजपुत्रं परमं विचिन्त्य ।।५४
ददस्व मां नाथ तपस्विमुख्य गुणोप पन्नाय समीहिताय ।
स्नेहात्प्रकामंप्रवदन्तिसन्तोदातुं तथाऽन्यस्यविभोक्षमस्त्वम्। ५५

इत्येवमुक्तः सवितुश्च पुत्र्या ऋषिस्तदा ध्यानपरो बभूव।
जाने तमेवर्क्षसुतं सकामं मुदा युतो वाक्यमिदं जगाद ।।५६

उसके चरण परम शुभ थे जिनमें गदा और खंग के चिह्न उपस्थित थे। उसकी जाँघें और ऊरु भी हाथी की सूँड के समान सुन्दर थे। उसकी कटि तो बिल्कुल केसरी ही की कटि के ही समान थी। उसका मध्यभाग अतिक्षाम एवं त्रिवली से निबद्ध था। उसकी ग्रीवा तो शंख के आकार के समान ही परम सुन्दर थी। उसकी दोनों भुजाएँ पुष्ट तथा कठिन एवं अत्यन्त सुदृढ़ थीं। उसके दोनों हाथ पद्म दल से समुत्पन्न चिह्न वाले थे और उसका शिर छत्र के आकार के समान परम सुशोभित हो रहा था। उसके नीले वर्ण वाले कुटिल आकृति से युक्त केश थे एवं दोनों कान सम तथा सुन्दर नासिका थी। उसकी अंगुलियाँ दीर्घ तथा सुन्दर पर्वों वाली थीं। उसके हाथ और चरण सभी सुन्दर थे तथा दर्शन बहुत ही शुभ्र थे। वह उदार वीर्य्य वाला महापुरुष छै अंगों से समुन्नत—तीन से गम्भीर और तीनों में प्रलम्ब था। सातों में रक्त वह राजपुत्र चारों से कृष्ण तथा तीन से समान था। दो अंगों से शुक्ल-चारों से सुरभि और दश तो इसके पद्म ही थे! हे भगवन्! मैंने तो उस राजपुत्र को परम सुलक्षण एवं सुन्दर विचार कर अपना स्वामी वरण कर लिया है।५०-५४। हे नाथ! आप उस गुणगण से समन्वित और समीहित के लिये ही मुझे प्रदान करें आप तो तपस्वियों में प्रमुख हैं। सन्त पुरुष स्नेह से यही भली भाँति कहा करते हैं। आप अन्य को भी देने की क्षमता रखते हैं।५५। देवदेव ने कहा-इस प्रकार से सविता की पुत्री के द्वारा कहे जाने पर वह ऋद्धि ध्यान में तत्पर होगये थे। मैं उस ऋक्ष पुत्र को भली भाँति जानता हूँ कि वह सकाम है—यह वचन ऋषि ने बड़ी प्रसन्नता के सहित उस समय में कहे थे।५६।

स एव पुत्रि क्षितिपात्मजस्त्वया दृष्टः पुरा कामयसे यमद्य।
स एष चायाति ममाश्रमं वै ऋक्षात्मजःसंवरणोहिनाम्ना।।५७

अथाजगामैव नृपस्य पुत्रस्तदाश्रमं ब्राह्मणपुंगवस्य ।
दृष्ट्वा वसिष्ठं प्रणिपत्य मुर्ध्ना स्थितां त्वपश्यत्तपतींनरेन्द्रः ॥५८
दृष्ट्वा च तां पद्मविशालनेत्रां सद्दृष्टपूर्वेयमिति व्यचिन्तयम् ।
पप्रच्छ केयं ललना द्विजेन्द्र स वारुणिःप्राहनराधिपेन्द्रम् ॥५९
इयं विवस्वद्दुहिता नरेन्द्र नाम्ना प्रसिद्धा तपती पृथिव्याम् ।
मयातवार्थायदिवाकरोऽर्थितःप्रादान्मयात्वश्रममापितेयम् ॥६०
तस्मात्समुत्तिष्ठ नरेन्द्र देव्याः पाणिं तपत्या विधिवद्गृहाण ।
इत्येवमुक्तो नृपतिः प्रहृष्टो जग्राह पाणिं विधिवत्तपत्याः ॥६१
सा तं पतिं प्राप्य मनोऽभिरामं सूर्यात्मजा शक्रसमप्रभावम् ।
रेमे च तेनैव गृहोत्तमेषु यथा महेन्द्रेण पुलोमजादिवि ॥६२

पहिले हे पुत्रि ! वही राजपुत्र तुमने देखा है जिसको आज तुम चाहती हो। वह ऋक्षात्मन से वरण नाम वाला अभी मेरे आश्रम में आ रहा है।५७। इसके अनन्तर वह नृप का पुत्र उसी समय में ब्राह्मणों में श्रेष्ठ के उसी आश्रम में आगया था। वहाँ आकर उसने वसिष्ठ के दर्शन किये थे तथा मस्तक के बल पर उन्हें सादर प्रणाम किया था और उस नरेन्द्र ने वहीं पर स्थित उस तपती को भी देखा था।५८। वहाँ पर पद्म के समान विशाल एवं अतीव सुन्दर नेत्रों वाली को देखकर उसने मनमें विचार किया था कि यह वही है जिसको मैंने पहिले देखा था। फिर उसने पूछा था—हे द्विजेन्द्र ! यह ललना कौन है ? तब उस वारुणि ने नृपेन्द्र से कहा था।५९। हे नरेन्द्र ! यह विवस्वान् की पुत्री है और इसका नाम पृथिवी में तपती ऐसा प्रसिद्ध है। मैंने इसको इस समय में अपने आप आपके लिये भगवान् सूर्य्य देव से प्रार्थना की थी। उन्होंने मुझे प्रदान कर दिया है और यह इस समय में आश्रम में आ गई है।६०। इसलिये हे नरेन्द्र ! आप अब उठिए और इस तपती देवी का विधिपूर्वक पाणि ग्रहण कीजिए। इस प्रकार से जब उस राजा से कहा गया तो उस नृपेन्द्र ने परम प्रसन्न होकर उस तपती का बिधान पूर्वक पाणिग्रहण कर लिया था।६१। उस सूर्य्य देव की पुत्री ने इन्द्र के समान रूप-लावण्य एवं ऐश्वर्य सम्पन्न

परम सुन्दर मनोभिराम अपना स्वामी प्राप्त कर फिर उस देवी ने उसी के साथ अपने उत्तम गृहों में दिवलोक में प्रलोमजा जैसे महेन्द्र के साथ रमणानन्द का अनुभव लेती है। रमण किया था।६२।

२२—सरोवर माहात्म्य वर्णन

तस्यां तपत्यां नर सत्तमेन जातः सुतः पार्थिवलक्षणस्तु।
स जात कर्मादिभिरेवसंस्कृतोह्यवर्धताज्येनहुतायथाऽग्निः ॥१
कृतं च चूडाकरणं तु देवा विप्रेण मित्रावरुणात्मजेन।
नवाब्दिकस्य व्रतबन्धनं च वेदे च शास्त्रेविधिपारगोऽभूत् ॥२
ततश्चतुः षड्भिरपीह वर्षैः सर्वज्ञतामभ्यगमत्ततोऽसौ।
ख्यातः पृथिव्यांपुरुषोत्तमोऽसौनाम्नाकुरुःसंवरणास्यपुत्राः ॥६
ततो नरपतिर्दृष्ट्वा पुत्रं तं षोडशाब्दिकम्।
दारक्रियार्थमकरोद्यत्नं शुभकुले ततः ॥४
सौदाम्नीं च सुदम्नस्तु सुतां रूपाधिकां नृपः।
कुरोरर्थाय वृतवान्स प्रादात्कुरवेऽपि ताम् ॥५
स तां नृपसुतां लब्ध्बा स्वधर्मानविरोधयन्।
रेमे तन्व्या सह तया पौलोम्या मघवानिव ॥६
ततो नरपतिः पुत्रं राज्यभारक्षमं बली।
विदित्वा यौवराज्याय विधानेनाभ्यषेचयत् ॥७

देवदेव ने कहा—उस तपती में उस नरश्रेष्ठ के द्वारा एक पार्थिव के लक्षणों से सुसम्पन्न पुत्र समुत्पन्न हुआ था। उसका जात कर्म आदि सभी संस्कार सम्पन्न किया गया था और फिर घृत की आहुतियों से अग्नि की भांति बढ़कर बड़ा हो गया था।१। हे देवगण! फिर वरुणात्मज विप्र के द्वारा उसका चूड़ाकरण संस्कार किया गया था। जब वह नौ वर्ष का हो गया तो उसका व्रत बन्धन किया गया था और फिर वह वेद में तथा शास्त्र में पारगामी विद्वान् हो गया था।२। फिर वह

चार छै वर्षों में ही सर्वज्ञता को प्राप्त हो गया। इसके अनन्तर वह भूमण्डल में संवरण का कुरु इस नाम से प्रसिद्ध हो गया था।३। इसके अनन्तर उस नरपति ने उस अपने पुत्र को सोलह वर्ष का देखकर किसी शुभ कुल में उसकी दारक्रिया अर्थात् पत्नी प्राप्त करने का कार्य करने में यत्न किया था।४। उस राजा ने सुदामा की सौदाम्नी नाम वाली कन्या को जो रूप लावण्य में परम सुन्दरी थी कुरु के लिये वरण किया था और उसके पिता ने उस अपनी पुत्री को कुरु को प्रदान भी कर दिया था।५। वह कुरु उस नृप की सुता को प्राप्त कर अपने धर्म का विरोध न करते हुए उसने उस तन्वी के साथ रमणानन्द प्राप्त किया था जिस प्रकार से इन्द्रदेव अपनी पौलोमी इन्द्राणी के साथ रमण किया करते हैं।६। इसके अनन्तर उस बलवान् नृप ने अपने पुत्र को राज्य शासन के भार को ग्रहण करने में समर्थ देखकर फिर विधान पूर्वक उसे यौवराज्य देकर अभिषिक्त कर दिया था अर्थात् अपने राज्य शासन का भार उसे सौंप दिया था।७।

ततो राज्येऽभिषिक्तस्तु कुरुः पित्रा निजे पदे।
स पालयामास महीं पुत्रवच्च प्रजाः स्वयम् ॥८
स एव क्षेत्रपालोऽभूत्पशुपालः स एव हि।
स एव राजपालश्च अजापालो महाबलः ॥९
ततोऽस्य बुद्धिरुत्पन्ना ह्यस्मिँल्लोके गरीयसी।
यावत्कीर्तिः सुसंस्था हि तावद्वासस्तया सह ॥१०
अस्त्वेवं नृपतिश्रेष्ठो याथातथ्यममन्यत।
विचचार महीं सर्वां कीर्त्यर्थं तु नराधिपः ॥११
ततो द्वैतवनं नाम पुण्यं लोकचरो वशी।
तदाऽसावतिसंतुष्टो विवेशाभ्यन्तरं ततः ॥१२
तत्र देवीं ददर्शाथ पुण्यां पारविमोचिनीम्।
प्लक्षजां ब्रह्मणः पुत्रीं हरिजिह्वां सरस्वतीम् ॥१३
सुदर्शनस्य जननीं ह्रदं कृत्वा सुविस्तृतम्।
तस्यास्तज्जलमासाद्य स्नात्वाप्रीतोऽभवन्नृपः ॥१४

फिर पिता के द्वारा राज्यासन पर अभिषिक्त कुरु ने अपने पुत्र की भाँति प्रजा तथा मही का पालन पोषण किया था ।८। वह ही क्षेत्रपाल हो गया था और पशुपाल तथा राजपाल तथा अजापाल होगया क्योंकि वह महान् बलवान् था ।९। फिर उसको यह बुद्धि समुत्पन्न हुई थी कि इस लोक में जब तक बहुत ऊंची कीर्ति सुसंस्थित रहे तभी तक उसके साथ निवास करना उचित है।१०। ऐसा ही हो-इस प्रकार से इसकी यथार्थता को उसने स्वीकार कर लिया था और फिर उस नराधिप ने अपनी कीर्त्ति का विस्तार करने के लिए सम्पूर्ण भूमि पर विचरण करना आरम्भ कर दिया था।११। इसके पश्चात् वह वशी लोक में विचरण करता हुआ एक द्वैत वन नाम वाले परम पुण्यमय स्थल में पहुंचा था। वहाँ पर यह उस समय में अत्यधिक प्रसन्न हुआ और फिर उसके भीतर उसने प्रवेश किया था।१२। वहाँ पापों का विमोचन करने वाली अतिशय पुण्यमयी देवी का दर्शन किया था जो ब्रह्मा की प्लक्षजा हरिजिह्वा पुत्री सरस्वती थी ।१३। वह सुदर्शन की जननी थी। वहाँ एक सुविस्तृत ह्रद की रचना कर उसके जल को प्राप्त कर नृप उसमें स्नान करके परम प्रसन्न हुआ था।१४।

समाजगाम च पुनर्ब्रह्मणो वेदिमुत्तराम् ।
स्यमन्तपञ्चकं नाम धर्मस्थानमनुत्तमम् ॥१५
आसमन्ताद्योजनानि पञ्च पञ्च च सर्वतः ।
किमन्या वेदयो देव ब्रह्मणः पुरुषोत्तम ॥१६
येनोत्तरतया वेदी गदिता सर्वपञ्चके ।
वेदयो लोकनाथस्य पञ्चधर्मस्य सर्वतः ॥१७
यासु चेष्टं सुरेशेन लोकनाथेन शंभुना ।
प्रयागो मध्यमा वेदिः पूर्वा वेदिगया शिरः ॥१८
विरजा दक्षिणा वेदिरनन्तफलदायिनी ।
प्रतीची पुष्करा वेद्रिस्त्रिभि कुण्डैरलंकृता ॥१९
स्यमन्तपञ्चके चोक्ता वेदिरेवोत्तरा तथा ।
तदमन्यत राजर्षिरिदं क्षेत्रं महाफलम् ॥२०

करिष्यामि कृषिष्यामि सर्वान्कामान्यथेप्सितम् ।
इति सचिन्त्य मनसा त्यक्त्वा स्यन्दनमुत्तमम् ॥२१

इसके अनन्तर फिर वह ब्रह्मा की उत्तरा वेदी आगया था जो स्यम-न्तक पञ्चक नाम वाला अतीव उत्तम धर्म स्थान था ।१५। वहाँ चारों ओर पाँच-पाँच योजन तक सभी तरफ धर्म स्थान का पूर्ण प्रभाव फैला हुआ था। देवगण ने कहा—हे पुरुषोत्तम ! ये अन्य क्या वेदियाँ थीं जो कि वहाँ पर ब्रह्मा की थीं ? ।१६। आपने अभी सर्व पञ्चक में एक उत्तरा वेदी का वर्णन किया था। हरि ने कहा—लोकनाथ की सभी ओर पञ्च धर्म की वेदियाँ हैं ।१७। जिनमें सुरेश लोकनाथ शम्भु ने अभीष्ट किया है। प्रयाग मध्यमा वेदी है और पूर्वा वेदी गया शिर है ।१८। विरजा दक्षिणा वेदो है जो कि अनन्त फलों के दान करने वाली है। पुष्करा वेदी पश्चिम में है जो तीन कुण्डों से विभूषित है ।१९। स्वमन्तक पञ्चक में उत्तरावेदी बतलाई गई है। उस राजर्षि ने उस क्षेत्र को ही महान् फल वाला माना था ।२०। मैं यहाँ पर अपने समस्त कामनाओं को पूर्ण करूंगा और अवश्य ही करूंगा—ऐसा उसने अपने मन में चिन्तन करके फिर अपने उत्तम स्पन्दन का त्याग कर दिया था ।२१।

चक्रे कीर्त्यर्थमतुलं स्थानं तत्पार्थिवर्षभः ।
कृत्वा सीरं ससौवर्णं गृह्य रुद्रवृष प्रभुः ॥२२
वोढारं याम्यमहिष स्वयं कर्षितुमुद्यतः ।
तं कर्षन्तं नरवरं समभ्येत्य शतक्रतुः ॥२३

प्रोवाच राजन्किमिदं भवान्कर्तुमिहोद्यतः ।
राजाऽब्रवीत्सुरवरं तपः सत्यं क्षमां दयाम् ॥२४
कृषामि शौचदाने च योगं च ब्रह्मचारिताम् ।
तं चोवाच हरिर्देवः कस्माद्बीजं नरेश्वर ॥२५

लब्धं त्वयेति सहसा ह्यवस्य गतस्ततः ।
गतेऽपि शक्रे नृपतिरहन्य हनि सीरधृक् ॥२६

कृषतेऽन्यत्समन्ताच्च सप्त क्रोशान्महीपतिः ।
ततोऽहमब्रुवं गत्वा कुरो किमिदमित्यथ ॥२७
तदाऽष्टाङ्ग महाधर्मं समाख्यातं नृपेण हि ।
ततो मयाऽस्य गदितं नृप बीजं क्व तिष्ठति ॥ ८

उस पार्थिवों में परम श्रेष्ठ ने यहाँ उस स्थान को अपनी कीर्ति के लिए अनुपम स्थल कर लिया था। फिर उसने सुवर्ण का हल बनवाकर रुद्र को वृष बनाया था।२२। यमराज का महिष जो वोढा था और स्वयं कर्षण कर्म करने के लिए उद्यत होगया था। कर्षण करने वाले नर श्रेष्ठ के समीप में स्वयं इन्द्रदेव आये थे।२३। इन्द्र ने कहा था— हे राजन् ! आप यहाँ पर यह करना चाहते हैं। तब उस राजा ने सुरश्रेष्ठ इन्द्र से कहा था कि तप-सत्य-क्षमा—दया-शौच-दान-योग और ब्रह्मचर्य्य इनकी समुत्पत्ति के लिये कर्षण कर रहा हूँ । उससे फिर इन्द्रदेव ने कहा—हे नरेश्वर ! इनका बीज कहाँ से प्राप्त किया है।२४-२५। क्या इनका बीज आपको प्राप्त होगया है—इस तरह कहते हुए अपहास करके इन्द्रदेव वहाँ से चले गये थे। इन्द्र के चले जाने पर भी राजा दिन प्रतिदिन सीर को धारण किये रहते थे।२६। वह चारों ओर नृपति सात कोश तक कर्षण करता है। इसके अनन्तर मैंने वहाँ जाकर उससे कहा था—हे कुरो ! यह क्या हो रहा है ? उस समय राजा ने अष्टाँग महाधर्म कहा था। तब मैंने इससे कहा था—हे नृप ! बीज कहाँ पर स्थित है।२७-२८।

स चाह मम देहस्थं बीज तमह मब्रुवम् ।
देह्यदं वापयिष्यामि सीरं कृषतु वै भवान् ॥२९
ततो नृपतिना बाहुर्दक्षिणः प्रसृतः कृतः ।
प्रसृतं तं भुजं दृष्ट्वा महाचक्रेण वेगतः ॥३०
सहस्रधा प्रचिच्छेद यस्मादेकभुजोऽभवत् ।
ततः सव्यो राज्ञा दत्तश्छिन्नोऽप्यसौ मया ॥३१
तथैवोरुयुगं प्रान्मया च्छिन्नौ च तावुभौ ।
ततः समेशिरः प्रादात्तेन प्रीतोऽस्मि तस्य च ॥३२

वरदोऽस्मीत्यथेत्युक्ते कुरुर्वरमयाचत ।
यावदेतन्मया कृष्टं धर्मक्षेत्रं तदस्तु वः ॥३३

स्नातानां च मृतानां च महापुण्यफलंत्विह ।
उपवासश्च दानं च स्नानं जप्यं च माधव ॥३४

होमयज्ञादिकं चान्यच्छुभं वाऽप्यशुभं विभो ।
त्वत्प्रसादाद्धृषीकेश शङ्खचक्रगदाधर ॥३५
अक्षयं प्रवरे क्षेत्रे भवत्वत्र महाफलम् ।
तथा भवान्सुरैः सार्द्धं समं देवेन शूलिना ॥३६

वसात्र पुण्डरीकाक्ष मन्नामव्यञ्जकेऽच्युतः ।
इत्येवमुक्तस्तेनाह राज्ञा बाढमुवाचतम् ॥३७

उसने फिर मुझ से कहा था कि वह बीज मेरे देह में स्थित है। तब मैंने उससे कहा था कि उसे मुझे दो ! मैं उस बीज का वपन करूँगा और आप हल का कर्षण करना ।२६। इसके पश्चात् उस राजा ने अपना दक्षिण बाहु प्रसृत कर दिया था। उस फैलाये हुए भुजा को देखकर महान् चक्र से वेग के साथ सहस्र टुकड़ों में काट दिया था और फिर वह राजा एक ही भुजा वाला रह गया था। इसके पश्चात् उस राजा ने अपना सव्य भुजा भी दे दिया था। उसको भी मैंने छिन्न कर दिया था ।३०-३१। उसी भाँति उसने अपने दोनों ऊरु भी दे दिये थे और मेरे द्वारा वे भी काट डाले गये थे। इसके अनन्तर उसने अपना शिर देदिया था। उससे मैं परम प्रसन्न उस पर हुआ था ।३२। मैं वरद हूँ---ऐसा उससे कहने पर उस कुरु ने मुझसे वरदान माँगा था-- कुरु ने कहा---जितना भी यह मैंने भू भाग कर्षित किया है वह आपका धर्मक्षेत्र हो जाये। ३३। यहाँ पर जो भी स्नान करने वाले हों अथवा मृत्युगत हों उनके लिए यह स्थल महान् पुण्य फल देने वाला हो जावे। हे माधव ! यहाँ पर उपवास, दान, स्नान, जाप और होम यज्ञादिक तथा हे विभो ! अन्य भी शुभ कर्म अथवा अशुभ कर्म भी आपके प्रसाद से अक्षय एवं महान् फल वाला हो जावे । यही इस प्रवर क्षेत्र का

तत्र सा रन्तुकं प्राप्य पुण्यतोया सरस्वती।
कुरुक्षेत्रं समाप्लाव्य प्रयाता पश्चिमां दिशम् ॥२
तत्र तीर्थसहस्राणि ऋषिभिःसेवितानि च।
तान्यहं कीर्त्तयिष्यामि प्रसादात्परमेष्ठिनः ॥३
तीर्थानां स्मरणं पुण्यं दर्शनं पापनाशनम्।
स्नानं पुण्यकरं प्रोक्तमपि दुष्कृतकर्मणः ॥४
ये स्मरिष्यन्ति तीर्थानांदेवताः प्रीणयन्ति च।
स्नान्ति च श्रद्दधानाश्च ते यान्ति परमां गतिम् ॥५
अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा।
यः स्मरेत्पुण्डरीकाक्षं सबाह्याभ्यन्तरः शुचिः ॥६
कुरुक्षेत्रं गमिष्यामि कुरुक्षेत्रे वसाम्यहम्।
अप्येतां वाचमुत्सृज्य सर्वपापैः प्रमुच्यते ॥७

महर्षि लोमहर्षण ने कहा—परम धीमान् मार्कण्डेय ऋषि के इस भाँति वचन का श्रवण कर वह प्रवाह से संयुक्त नदी कुरुक्षेत्र में प्रविष्ट होगई थी।१। वहाँ पर उसने रन्तुक को प्राप्त कर पुण्यमय जल वाली सरस्वती नदी ने कुरुक्षेत्र को सम्प्लावित करके फिर पश्चिम दिशा में प्रयाण किया था।२। वहां पर सहस्रों तीर्थ हैं जो ऋषियों के द्वारा सेवित हैं। अब हम उन्हीं तीर्थों को बतलायेंगे और उन तीर्थों की व्याख्या परमेष्ठी के प्रसाद से ही होगी।३। तीर्थों का स्मरण करने ही से महान् पुण्य होता है तथा तीर्थों के दर्शन करने से सम्पूर्ण पापों का नाश हो जाता है। तीर्थों का स्नान तो पुण्य करने वाला होता ही है

जो भी कोई दुष्कृत कर्म वाले होते हैं उनके पापों का क्षय करने वाला स्नान को वताया गया है ।४। जो भी कोई पुरुष तीर्थों का स्मरण किया करते हैं उन पर देवगण परम प्रसन्न होते हैं। जो तीर्थों में स्नान किया करते हैं वे मनुष्य परम गति को प्राप्त हो जाते हैं ।५। चाहे कोई अपवित्र हो या पवित्र हो अथवा कैसी ही अवस्था में विद्यमान क्यों न हो, जो भी भगवान् पुण्डरीकाक्ष का स्मरण किया करता है वह उनके स्मरण मात्र से ही वाहिर—भीतर से पवित्र होजाया करता है ।६। मैं कुरुक्षेत्र में जाऊँगा —ऐसी भी वाणी यदि कोई पुरुष कह देता है तो इतने कथन मात्र से ही वह सब पापों से मुक्त हो जाया करता है ।७।

ब्रह्मज्ञानं गया श्राद्धं गोग्रहे मरणं ध्रुवम् ।
वासः पुंसां कुरुक्षेत्रे मुक्तिरुक्ता चतुर्विधा ॥८
सरस्वतीदृषद्वत्योर्द्वयोर्नद्योर्यदन्तरम् ।
तं देवनिर्मितं देशं ब्रह्मावर्त्तं प्रचक्षते ॥९

दूरस्थोऽपि कुरुक्षेत्र गमिष्यामि वसाम्यहम् ।
एवं यः सततं ब्रूयात्सोऽपि पापैः प्रमुच्यते ॥१०
तत्रैव च वसन्धीरः सरस्वत्यास्तटे स्थितः ।
तस्य ज्ञानं ब्रह्ममयं भविष्यति न संशयः ॥११
देवता ऋषयः सिद्धाः सेवन्ते कुरुजाङ्गलम् ।
तस्य संसेवनान्नित्यं ब्रह्म चात्मनि पश्यति ॥१२
वसन्ति नियतात्मानो येऽपि दुष्कृतकारिणः ॥१३
ते विमुक्ताश्च कलुषैरनेकजन्मसंभवैः ।
पश्यन्ति निर्मलं देवं हृदयस्थं सनातनम् ॥१४

ब्रह्म के स्वरूप का ज्ञान प्राप्त कर लेना—गया तीर्थ में जाकर पितरों का श्राद्ध करना गोग्रह में मृत्यु प्राप्त करना तथा कुरुक्षेत्र में पुरुषों का निवास करना ये चार प्रकार की मुक्ति बतलाई गई है ।८। सरस्वती और दृषद्वती-इन दोनों नदियों का जो अन्तर भाग है

उसी भाग को देवों द्वारा निर्मित ब्रह्मावर्त्त कहा जाता है ।९। यद्यपि मैं यहाँ पर दूर देश में स्थित हूँ तथापि मैं कुरुक्षेत्र में जाऊँगा और वहाँ पर निवास करूँगा-इस प्रकार से जो निरन्तर बोला करता है वह सब पापों से मुक्त हो जाता है ।१०। वहाँ पर ही निवास करता हुआ जो कोई धीर पुरुष सरस्वती नदी के तट पर स्थित रहता है उसको ब्रह्ममय ज्ञान हो जाया करता है--इसमें लेश मात्र भी संशय नहीं है ।११। देवगण—ऋषिवृन्द, और सिद्ध लोग कुरुजाङ्गल का सेवन किया करते हैं । उसके भली भाँति सेवन करने से पुरुष नित्य ही अपनी आत्मा में ब्रह्म का दर्शन किया करता हैं ।१२। यह मनुष्यत्व अर्थात् मनुष्य जीवन बड़ा चंचल है । ऐसे इस जीवन को प्राप्त करके जो मोक्ष की आकाङ्क्षा रखने वाले हैं वे नियतात्मा होकर निवास किया करते हैं चाहे वे दुष्कृतों के करने वाले भी रहे हों ।१३। वे जो वहाँ निवास करने वाले होते हैं अनेक जन्मों में होने वाले पापों से भी विमुक्त हो जाते हैं और फिर शुद्ध होकर हृदय कमल में संस्थित सनातन निर्मल देव का दर्शन कर लिया करते हैं ।१४।

ब्रह्मवेदिः कुरुक्षेत्र पुण्यं सन्निहितं सरः ।
सेवमाना नरा नित्यं प्राप्नुवन्ति परं पदम् ।।१५

ग्रहनक्षत्रताराणांकालेन पतनाद्भयम् ।
कुरुक्षेत्रमृतानां च पतनं नैव विद्यते ।।१६
यत्र ब्रह्मादयो देवा ऋषयः सिद्धचारणाः ।
गन्धर्वाश्चाप्सरो यक्षाः सेवन्ते स्थानकाङ्क्षिणः ।।१७

गत्वा तु श्रद्धया युक्तः स्नात्वा स्थाणुमहाह्लदे ।
मनसा चिन्तितं कामं लभते नात्र संशयः ।।१८
नियमं च नरः कृत्वा सरः कृत्वा प्रदक्षिणम् ।
रन्तुकं च समासाद्य क्षामयित्वा पुनः पुनः ।।१९

सरस्वत्यां नरः स्नात्वा यक्षं दृष्ट्वा प्रणम्य च ।
पुष्प धूपं च नैवेद्यं दत्वा वाचमुदीरयेत् ।।२०

तव प्रसादाद्यक्षेन्द्र वनानि सरितस्तथा ।
भ्रमिष्यामि च तीर्थानि ह्यविघ्नं कुरु मे सदा ।।२१

ब्रह्मवेदि कुरुक्षेत्र पुण्य सर सन्निहित है उस सर को सेवन करते हुए मनुष्य नित्य परम पद को प्राप्त करते हैं ।।१५।। ग्रह-नक्षत्र और तार का काल आ जाने पर पतन होने से भय होता है किन्तु जो कुरु क्षेत्र में प्राण त्याग किया करते हैं उनका कभी भी पतन नहीं होता है ।।१६।। जहाँ पर ब्रह्मा प्रभृति देव, ऋषिगण और सिद्ध तथा चारण लोग, गन्धर्व, अप्सराऐं एवं यक्ष उस सर का स्थान की आकाङ्क्षा करते हुए सेवन किया करते हैं ।।१७।। वहाँ पहुँच कर श्रद्धा भाव से युक्त होकर स्थाणु महाह्लद में स्नान करे तो भी मन के द्वारा कामना का चिन्तन किया जाता है उसको अवश्य ही मनुष्य प्राप्त कर लेता है—इसमें कुछ भी संशय नहीं है ।।१८।। मनुष्य वहाँ पर नियम धारण करे और उस सर की परिक्रमा देवे तथा रन्तुक के समीप में जाकर बारम्बार क्षमापन करे ।।१९।। सरस्वती नदी में स्नान करके मनुष्य दक्ष का दर्शन करे तथा उनको प्रणाम करे फिर पुष्प, धूप और नैवेद्य समर्पित करके यह वाणी बोले ।।२०।। हे यक्षेन्द्र ! आपके ही प्रसाद से इन समस्त वनों को तथा सरिताओं को भ्रमण कर देखूंगा और तीर्थों का भी पर्यटन कर दर्शन करूंगा । आप सदा मेरे आने वाले विघ्नों को दूर कर देवें ।।२१।।

३४—स्नान तीर्थ माहात्म्य वर्णन

वनानि सप्त नो ब्रूहि सप्त नद्यश्च काः स्मृताः ।
तीर्थानि च समग्राणि तीर्थस्नानफलं तथा ।।१
येन येन विधानेन यस्य तीर्थस्य यत्फलम् ।
तत्सर्वं विस्तरेणेह ब्रूहि पौराणिकोत्तम ।।२
शृणु सप्त वनानीह कुरुक्षेत्रस्य मध्यतः ।
येषां नामानि पुण्यानि सर्वपापहराणि च ।।३

काम्यकं च वनं पुण्यं तथाऽदितिवनं महत् ।
व्यासस्य च वनं पुण्यं फलकीवनमेव च ॥४
तथा सूर्यवनं स्थानं तथा मधुवनं महत् ।
पुण्यशातवनं नाम सर्वकल्मषनाशनम् ॥५
वनान्येतानि वै सप्त नदीः शृणुत मे द्विजाः ।
सरस्वती नदी पुण्या तथा वैतरणी नदी ॥६
आपगा च महा पुण्या गङ्गा मन्दाकिनी नदी ।
मधुश्रवा अम्लुनदी कौशिकी पापनाशिनी ॥७

ऋषियों ने कहा—हे भगवन् ! आप अब उन सात वनों को वतलाइये तथा हमको यह भी वतला दीजिए कि वे सात नदियाँ कौन सी बताई गई हैं ? समस्त तीर्थों को तथा तीर्थों के स्नान का क्या फल होता है यह भी वतलाइये ॥१॥ जिस-जिस विधान से जिस-जिस तीर्थ का जो भी फल होता है, हे पौराणिकों में सर्व शिरोमणे ! वह सभी यहाँ पर अब विस्तार पूर्वक हमको बतला देवें ॥२॥ लोमहर्षण मुनि ने कहा—हे ऋषि गण ! अब आप लोग सुनिए, यहाँ पर कुरुक्षेत्र के मध्य में ये सात वन हैं जिनके नाम परम पुण्यमय हैं और समस्त पापों के हरण करने वाले हैं ॥३॥ एक वन का नाम काम्यक वन है जो परम पुण्यमय है । दूसरा महान् अदिति वन नाम वाला है । एक पुण्यमय व्यास वन है तथा एक फल की वन है ॥४॥ एक सूर्य्य वन नाम वाला स्थान है तथा महान् मधुवन है । पुण्य शीत वन नाम का एक है जो समस्त कल्मषों का नाश करने वाला है ॥५॥ हे द्विजगण ! ये सात वन हैं जिनके नाम अभी आपको वतलादिये हैं । अब मुझसे सात नदियों के नामों का श्रवण करो । एक तो सरस्वती महान् पुण्यमयी नदी है । दूसरी वैतरिणी नदी है ॥६॥ महान् पुण्य वाली एक आपगा नदी है । एक पुण्य मन्दाकिनी गंगा नदी है । मधुश्रवा—अम्लु नदी और पापों का नाश करने वाली एक कौशिकी नदी है ॥७॥

दृषद्वती महापुण्या तथा हिरण्वती नदी ।
वर्षाकालवहाः सर्वा वर्जयित्वा सरस्वतीम् ॥८

एतासामुदकं पुण्यं प्रावृट्काले प्रकीर्तितम् ।
रजस्वलात्वमेतासां विद्यते न कदाचन ।
तीर्थस्य च प्रभावेण पुण्या ह्येताः सरिद्वराः ॥९
शृण्वन्तु मुनयः प्रीतास्तीर्थस्नानफलं महत् ।
गमनं स्मरणं चैव सर्वकल्मषनाशम् ॥१०
रन्तुकं च नरो दृष्ट्वा द्वारपाल महाबलम् ।
यक्षं समभिवाद्यैव तीर्थयात्रां समारभेत् ॥११
ततो गच्छेद्धि विप्रेन्द्रा नाम्नाऽदितिवनं महत् ।
आदित्या यत्र पुत्रार्थे कृतं घोरं महत्तपः ॥१२
तत्र स्नात्वा च संपूज्यह्यदितिं देवमातरम् ।
पुत्रं जनयते शूरं सर्वदोषविवर्जितम् ।
आदित्यशतसंकाशं विमानं चाधिरोहति ॥१३
ततो गच्छेद्धि विप्रेन्द्रा विष्णुस्थानमनुत्तमम् ।
सतत नाम विख्यातं तत्र सन्निहितो हरिः ॥१४

महापुण्यमयी दृषद्वती तथा हिरण्वती नदी है । केवल सरस्वती नदी को छोड़कर अन्य सभी नदियां वर्षा ऋतु के समय में ही बहने वाली हैं ॥८॥ इन सबका जल वर्षा के समय में भी परम पुण्यमय कहा गया है । इन नदियों को रजस्वलात्व कभी भी नहीं होता है । तीर्थ के प्रभाव से ये श्रेष्ठ नदियाँ परम पुण्यमयी है ॥९॥ अब हे मुनिगण ! आप परम प्रीति से युक्त होकर तीर्थों के स्नान करने का फल सुनिये । इस पर गमन करना तथा इनका स्मरण करना भी सब कल्मषों का नाश करने वाला है ॥१०॥ सबसे प्रथम महान् बलशाली द्वारपाल रन्तुक का दर्शन करके तथा फिर यक्ष का समभिवादन करके मनुष्य तीर्थ यात्रा का आरम्भ करे ॥११॥ हे विप्रेन्द्रगण ! इसके अनन्तर महान् जो अदिति वन है उस पर जाना चाहिए जहाँ पर कि देव माता अदिति ने पुत्र प्राप्ति के लिए महान् घोर तपश्चर्या की थी ॥१२॥ वहाँ पर स्नान करके तथा अदिति देवी की अर्चना करके जोकि देवगण की माता है समस्त दोषों से रहित शूरवीर पुत्र के जन्म को प्राप्त किया

करता है वह पुत्र सौ आदित्यों के समान तेज से युक्त होता है तथा विमान पर अधिरोहण किया करता है ।।१३।। इसके उपरान्त हे विप्रेन्द्रों ! अतीव उत्तम विष्णु स्थान को जाना चाहिए । उसका नाम निरन्तर विख्यात है जहाँ पर कि हरि भगवान् नित्य ही सन्निहित रहा करते हैं ।।१४।।

विमले च नरः स्नात्वा दृष्ट्वा च विमलेश्वरम् ।
निर्मलः स्वर्गमायाति रुद्रलोकं च गच्छति ।।१५
हरिं च बलदेवं चाप्येकादश्यां समन्वितौ ।
दृष्ट्वा दोषैर्विमुच्येत कलिकल्मषसंभवैः ।।१६
ततः पारिप्लवं गच्छेत्तीर्थं त्रैलोक्यविश्रुतम् ।
तत्र स्नात्वा च दृष्ट्वा च ब्रह्माणं वेदसंयुतम् ।।१७
ब्रह्मयज्ञफलं प्राप्य निर्मलः स्वर्गमाप्नुयात् ।
तत्रापि संगमं रम्यं कौशिक्यास्तीर्थसंभवम् ।।१८
संगमे च नरः स्नात्वा प्राप्नोति परमं पदम् ।
अरण्ये चापराधा ये कृता हि पुरुषेण वै ।
सर्वास्तान्क्षमते तत्र स्नातमात्रस्य देहिनः ।।१९
ततो दक्षाश्रमं गत्वा दृष्ट्वा दक्षेश्वरं शिवम् ।
अश्वमेधस्य यज्ञस्य फलं प्राप्नोति मानवः ।।२०
ततः शालूकिनं गच्छेत्स्नात्वा तीर्थे द्विजोत्तमः ।
हरिं हरेण संयुक्तं पूजयित्वा तु भक्तितः ।
प्राप्नोत्यभिमतं लोकं सर्वपापविवर्जितः ।।२१

विमल तीर्थ में स्नान करके और विमलेश्वर का दर्शन करके मनुष्य बिल्कुल विशुद्ध हो जाता है वह फिर स्वर्ग लोक को और रुद्रलोक को प्राप्त होता है ।।१५।। एकादशी तिथि में समन्वित भगवान् और बलदेव का दर्शन करके मनुष्य कलियुग के कलमषों से समुत्पन्न दोषों से विमुक्त हो जाया करता है ।।१६।। इसके पश्चात् त्रिलोकी में महान् प्रसिद्ध परिप्लव तीर्थ में जाना चाहिए । वहाँ पर स्नान करके वेदों से संयुत भगवान् ब्रह्माजी का दर्शन प्राप्त करे ।।१७।। इससे उसे ब्रह्म यज्ञ का

फल प्राप्त हो जाता है और वह निर्मल होकर सीधा स्वर्ग की प्राप्ति किया करता है। वहाँ पर भी कौशिकी का तीर्थ सम्भव अति सुन्दर सङ्गम होता है।१८। उस सङ्गम में मनुष्य स्नान करके परम पद को प्राप्त करता है। जिस किसी पुरुष ने अरण्य में जो भी कोई अपराध किये हैं वहाँ पर केवल स्नान करने ही से देहधारी उन सबको नष्ट कर देता है।१९। इसके अनन्तर दक्षाश्रम में जाकर दक्षेश्वर भगवान् शिव का दर्शन करे तो मनुष्य अश्वमेध यज्ञ का फल प्राप्त किया करता है।२०। इसके पश्चात् फिर शालूकी को जाना चाहिए। वहाँ पर द्विजोत्तम को उस तीर्थ में स्नान करना चाहिए। वहाँ हर के साथ हरि का भक्ति भाव से पूजन करके सब पापों से रहित होकर अभिमत लोक की प्राप्ति किया करता है।२१।

सर्पिर्दधि समासाद्य नागानां तीर्थमुत्तमम्।
तत्र स्नानं नरः कृत्वा मुक्तो नागभयाद्भवेत्।।२२
ततो गच्छच्च विप्रेन्द्रा नरकोद्धाररन्तुकम्।
तत्रापि रजनीमेकां स्नात्वा तीर्थवरे शुभे।।२३
तत्र द्वितीयं संपूज्य द्वारपालं प्रयत्नतः।
ब्राह्मणान्भोजयित्वा च प्रणित्य क्षमापयेत्।।२४
तद प्रसादाद्यक्षेन्द्र मुक्तोऽहं सर्वकिल्विषैः।
सिद्धिर्मयाऽभिलषिता संसारे तां लभाम्यहम्।।२५
एवं प्रसाद्य यक्षेन्द्रं ततः पञ्चनदं व्रजेत्।।२६
पञ्चनद्यश्च रुद्रेण कृता दाववभीषणाः।
तेन सर्वेषु लोकेषु तीर्थं पञ्चनदं स्मृतम्।।२७
कोटितीर्थानि रुद्रेण समाजह्रे यतस्ततः।
तेन त्रैलोक्यविख्यातं कोटितीर्थं प्रचक्षते।।२८
तस्मिस्तीर्थे नरः स्नात्वा दृष्ट्वा कोटीश्वरं हरम्।
पञ्चयज्ञानवाप्नोति नित्यं श्रद्धासमन्वितः।।२९

सर्पिर्दधि पर पहुँच कर जो नागों का अत्युत्तम तीर्थ है। वहाँ मनुष्य स्नान करके नागों के भय से विमुक्त हो जाया करता है।२२।

इसके उपरान्त हे विप्रेन्द्रगण ! नरकोद्धार रन्तुक में जावे । वहाँ पर भी उस परम शुभ एवं श्रेष्ठ तीर्थ में एक रात्रि तक ठहरे और स्नान करे ।२३। वहाँ प्रयत्न पूर्वक द्वितीय द्वारपाल का पूजन करे और ब्राह्मणों को भोजन करा कर प्रणिपात पूर्वक अपराधों का क्षमापन करे ।२४। यह प्रार्थना करे—हे यक्षेन्द्र ! आपके प्रसाद से मैं समस्त किल्विषों से मुक्त हो गया हूँ । अब मैं यही चाहता हूँ कि संसार में जो भी सिद्धि मेरी अभिलषित है उसको मैं प्राप्त कर लूँ ।२५। इस भाँति यक्षेन्द्र को प्रसन्न करके फिर पञ्चनद तीर्थ को जाना चाहिए ।२६। भगवान् रुद्र ने दानवों के लिये महाभीषण पाँच नदियां विरचित की हैं । इसी कारण से सब लोकों में पञ्चनद नामक तीर्थ कहा गया है ।२७। भगवान् रुद्र ने क्योंकि कोटि तीर्थों का समाहरण किया था इसीलिये त्रैलोक्य में कोटि तीर्थ विख्यात होकर कहा जाता है ।२८। उस तीर्थ में नर स्नान करके और कोटीश्वर भगवान् हर का दर्शन करके पाँच यज्ञों का फल नित्य ही श्रद्धा के समन्वित रहने वाला प्राप्त करता है ।२९।

तत्रैव वामनो देवः सर्वदेवैः प्रतिष्ठितः ।
तत्रापि च नरः स्नात्वा ह्यग्निष्ठोमफलं लभेत् ।।३०
अश्विनोस्तीर्थमासाद्य श्रद्धावान्यो जितेन्द्रियः ।
रूपवान्भाग्ययुक्तश्च स यशस्वी न संशयः ।।३१
वराहतीर्थमाख्यातं विष्णुना परिकल्पितम् ।
तस्मिन्स्नात्वा श्रद्दधानः प्रयाति परमां गतिम् ।।३२
तत्र गच्छेच्च विप्रेन्द्राः सोमतीर्थमनुत्तमम् ।
यत्र सोमस्तपस्तप्त्वा व्याधिमुक्तोऽभवत्पुरा ।।३३
तत्र सोमेश्वरं दृष्ट्वा स्नात्वा तीर्थवरे शुभे ।
राजसूयस्य यज्ञस्य फलं प्राप्नोति मानवः ।।३४
व्याधिभ्यश्च विनिर्मुक्तः सर्वदोषविवर्जितः ।
सोमलोकमवाप्नोति चन्द्रेण रमते चिरम् ।।३५

वहीं पर वामन देव भी हैं जो समस्त देवों के द्वारा प्रतिष्ठित किये गये हैं । वहां पर भी मनुष्य स्नान करके अग्निष्टोम यज्ञ के फल को

प्राप्त किया करता है ।३०। अश्विन तीर्थ पर पहुंच कर जो श्रद्धावान् और इन्द्रियों को जीतने वाला पुरुष है वह रूपवान् तथा सौभाग्य से युक्त एवं यशस्वी होता है—इसमें कुछ भी संशय नहीं है ।३१। वराह तीर्थ आख्यात है जिसको भगवान् विष्णु ने परिकल्पित किया है। उस तीर्थ में स्नान करने से श्रद्धा वाला पुरुष परम गति को प्राप्त हो जाता है ।३२। हे विप्रेन्द्र वृन्द ! वहाँ पर परमोत्तम सोम तीर्थ में जाना चाहिए जहाँ पर सोम (चन्द्र) ने तपस्या करके पहिले व्याधि से विमुक्त हुआ था ।३३। वहाँ सोमेश्वर प्रभु का दर्शन करके तथा स्नान करके जोकि वहाँ पर शुभ तीर्थ है, राजसूय यज्ञ का फल मनुष्य पाजाता है ।३४। व्याधियों से मुक्त होकर सब दोषों से रहित हो जाता है और सोम लोक को प्राप्त करता है तथा चन्द्र के साथ रमण किया करता है ।३५।

भूतेश्वरं च तत्रैव ज्वालामामेश्वरं तथा ।
तच्च लिङ्ग समभ्यर्च्य न भूयो जन्म चाप्नुयात् ॥३६
एकहंसे नरः स्नात्वा गोसहस्रफलं लभेत् ।
कृतशौचं समासाद्य तीर्थसेवी द्विजोत्तमः ॥३७
पौण्डरीकमवाप्नोति कृतशौचो भवेन्नरः ।
ततो मुञ्जवटं नाम महादेवस्य धीमतः ॥३८
उपोष्य रजनीमेकां गाणपत्यमवाप्नुयात् ।
तत्रैव च महाभागा यक्षिणी लोकविश्रुता ॥३९
स्नात्वाऽभिगम्य तत्रैव महापातकनाशनम् ।
कुरुक्षेत्रस्य तद्द्वारं विश्रुतं पुण्यवर्द्धनम् ॥४०
प्रदक्षिणमुपावर्त्य ब्राह्मणान्भोजयेत्ततः ।
पुष्करं च ततो गत्वा ह्यभ्यर्च्य पितृदेवताः ॥४१
जामदग्न्येन रामेण कृतं तच्च महात्मना ।
कृतकृत्यो भवेद्राजा अश्वमेधं च विन्दति ॥४२

वहीं हर भगवान् भूतेश्वर हैं तथा ज्वाल मालेश्वर प्रभु भी विराजमान हैं। उस लिंग का अभ्यर्चन करे तो फिर दुबारा इस संसार में

जन्म ग्रहण मनुष्य नहीं किया करता है।३६। एक हंस नामक तीर्थ में मनुष्य को स्नान करके एक सहस्र गायों के दान का फल प्राप्त होता है। द्विजोत्तम को शौच(शुद्धि) करके ही तीर्थ पर पहुँचकर उसका सेवन करना चाहिए।३७। कृत शौच मनुष्य पौण्डरीक को निश्चय ही प्राप्त किया करता है। इसके पश्चात् धीमान् महादेव का मुञ्जवर नाम वाला तीर्थ है।३८। वहाँ पर एक शत उपवास करके गाणपत्य के पद को प्राप्त करता है। वहाँ पर ही महान् भाग वाली यक्षिणी है जो सम्पूर्ण लोक में विख्यात है।३६। वहाँ स्नान और अभिगमन करके महान् पातकों का नाश हो जाता है। वहाँ कुरुक्षेत्र का द्वार पुण्यों की वृद्धि करने वाला प्रसिद्ध है।४०। उसकी वहां प्रदक्षिणा करके फिर ब्राह्मणों को भोजन करावे। इसके पश्चात् पुष्कर में जावे और पितरों का जो देवरूप है अभ्यर्चन करे।४१। उसको जामदग्न्य और महात्मा राम ने विरचित किया है। राजा यहाँ कृत-कृत्य हो जाता है तथा अश्वमेध यज्ञ के महान् पुण्यमय फल को प्राप्त किया करता है।४२।

कन्यादानं च यस्तत्र कार्त्तिक्यां वै करिष्यति।
प्रसन्ना देवतास्तस्य दास्यन्त्यभिमतं फलम् ॥४३
कपिलश्च महायक्षो द्वारपालः स्वयं स्थितः।
विघ्नं करोति पापानां दुर्गतिं च प्रयच्छति ॥४४
पत्नी तस्य महायक्षी नाम्नोलूखलमेखला।
आहत्य दुन्दुभि सा तु भ्रमते नित्यमेव हि ॥४५
सा ददर्श स्त्रियं चैकां सपुत्रां पापदेशजाम्।
तामुवाच तदा यक्षी आहत्य निशि दुन्दुभिम् ॥४६
युगन्धरे दधि प्राश्य उषित्वा चाच्युतस्थले।
तद्वद्भूतालये स्नात्वा सपुत्रा वस्तुमिच्छसि ॥४७
दिवा मया ते कथितं रात्रौ भक्ष्यामि निश्चितम्।
एतच्छ्रुत्वा तु वचनं प्राणिपत्य च यक्षिणीम् ॥४८

उवाच दीनया वाचा प्रसादं कुरु भामिनि ।
ततः सा यक्षिणी तां तु प्रोवाच कृपयाऽन्विता ।।४९
यदा सूर्यस्य ग्रहणं कालेन भविता क्वचित् ।
सरस्वत्यां तदा स्नात्वा पूता स्वर्गं गमिष्यसि ।।५०

वहाँ पर जो कोई कार्त्तिकी में किसी एक कन्या का दान करता है उस पर समस्त देवगण अत्यन्त ही प्रसन्न हो जाया करते हैं और उसको उसका जो भी कुछ अभिमत मनोरथ होता है वही फल प्रदान कर देते हैं ।४३। और महायक्ष कपिल स्वयं वहाँ द्वारपाल होकर संस्थित रहता है । वह पापों का विघ्न किया करता है और दुर्गति को भी प्राप्त कर देता है ।४४। उसकी पत्नी महायक्षी है और वह नाम से उलूखल मेखला है उसने दुन्दुभि का हनन किया था । वह वहाँ पर नित्यमेव भ्रमण किया करती है ।४५। उसने एक पुत्रवती पाप देश में जन्म लेने वाली स्त्री को देखा था । उस महायक्षी ने रात्रि में दुन्दुभि का हनन करके उसी समय में उस स्त्री से कहा था ।४६। युगन्धर में दधि खाकर के और अच्युत स्थल में निवास करके उसी की भाँति भूतालय में स्नान करके वह पुत्र के सहित वास करने की इच्छा करती है ।४७। मैंने यह बात दिन में तो कह दी है किन्तु रात्रि में निश्चित रूप से भक्षण कर जाऊंगी । यह उस महायक्षिणी का वचन सुन कर उस स्त्री ने यक्षिणी को प्रणि पात किया था ।४८। फिर उसने उससे दीन वचनों में प्रार्थना की थी—हे भामिनि ! प्रसन्नता करो । इसके उपरान्त वह यक्षिणी उस स्त्री से बोली तथा कृपा से समन्वित हुई थी ।४९। जब किसी समय में काल से सूर्य्य का ग्रहण कहीं पर होगा उस समय में सरस्वती नदी में स्नान करके पूत होती हुई स्वर्ग को चली जावेगी ।५०।

———

३५—नाना तीर्थ एवं वन माहात्म्य वर्णन

ततो रामह्रदं गच्छेत्तीर्थं सेवी द्विजोत्तमः ।
तत्र रामेण विप्रेण तरसा दीप्ततेजसा ।।१

क्षत्रमुत्साद्य विप्रेण ह्रदाः पञ्च निवेशिताः ।
पूरयित्वा नरव्याघ्र रुधिरेणेति नः श्रुतम् ॥२
पितरस्तर्पितास्तेन तथैव च पितामहाः ।
ततस्ते पितरः प्रीता राममूचुर्द्विजोत्तमाः ॥३
राम राम महाबाहो प्रीताः स्मस्तव भार्गव ।
अनया पितृभक्त्या च विक्रमेण च ते विभो ॥४
वरं वृणीष्व भद्रं ते कमिच्छसि महायशः ।
एवमुक्तस्तु पितृभी रामः प्रभवतां वर ॥५
अब्रवीत्प्राञ्जलिर्वाक्यं स पितृन्गगनस्थितान् ।
भवन्तो यदि मे प्रीतास्तदनुग्राह्यतामयम् ॥६
पितृप्रसादादिच्छेयं तपसोऽस्यापनं पुनः ।
यतो रोषाभिभूतेन क्षत्रमुत्सादितं मया ॥७

महर्षि लोमहर्षण ने कहा—इसके अनन्तर फिर तीर्थों के सेवन करने वाले द्विजश्रेष्ठ को रामह्रद में जाना चाहिए। वहाँ पर विप्र राम ने जो परम दीप्त तेज से युक्त थे क्षत्रियों का उत्पादन करके पाँच ह्रद निवेशित किये थे। हे नर व्याघ्र! हमने ऐसा सुना है कि उन्हें रुधिर से पूरित किया था।१-२। उसीसे उसने अपने पितरों तथा पितामहों को तृप्त किया था। इसके पश्चात् वे पितृगण तृप्त होकर हे द्विजवृन्द! राम से बोले थे।३। हे राम! हे भार्गव! हम सब लोग तुमसे बहुत ही प्रसन्न हुए हैं क्योंकि हे विभो! तुम्हारा प्रशंसनीय विक्रम है एवं यह पितृभक्ति भी परम श्लाघनीय है।४। अब तुम हमसे कोई भी वरदान माँगलो तुम्हारा कल्याण होगा। तुम कौनसा महान् यश चाहते हो? इस तरह से पितरों के द्वारा कहे जाने पर प्रभाव वालों में श्रेष्ठ राम हाथ जोड़कर गगन में स्थित पितृगण से यह वाक्य बोले थे—आप लोग यदि मुझ पर परम प्रीति वाले प्रसन्न हैं तो मुझ पर यह अनुग्रह करिये।६। पितरों के प्रसाद से मैं पुनः तप का स्थापन करना चाहता हूं क्योंकि शेश में अभिभूत होकर मैंने क्षत्रियों का उत्सादन कर दिया है।७।

ततस्तु पापान्मुच्येयं युष्माकं तेजसा ह्यहम् ।
ह्रदाश्च ते तीर्थभूता भवेयुर्भुवि विश्रुताः ॥८
एवं श्रुत्वा शुभं वाक्यं रामस्य पितरस्तदा ।
प्रत्यूचुः परमप्रीता राम हर्षपुरस्कृताः ॥९
तपस्ते वर्द्धतां पुत्र पितृभक्त्या विशेषतः ।
यच्च रोषाभिभूतेन क्षत्रमुत्सादित त्वया ॥१०
ततश्च पापान्मुक्तस्त्वं पातितास्ते स्वकर्मभिः ।
ह्रदाश्च तेऽद्य तीर्थत्वं गमिष्यन्ति न संशयः ॥११
ह्रदेष्वेतेषु यः स्नात्वा स्वान्पितृंस्तर्पयिष्यति ।
तस्य दास्यन्ति पितरो यथाऽभिलषितं फलम् ॥१२
ईप्सितान्मानसान्कामान्स्वर्गवास च शाश्वतम् ।
एव दत्त्वा वरान्विप्रा रामस्य पितरस्तदा ॥१३
रामं सुभार्गवं प्रीतास्तत्रैवान्तर्दधुस्तदा ।
एवं रामह्रदाः पुण्या भार्गवस्य महात्मनः ॥१४

इसके अनन्तर ही आपके तेज से मैं इस पाप से मुक्त होऊंगा। ये जो ह्रद मैंने निर्मित किये हैं वे सब तीर्थभूत होकर भूमण्डल में विश्रुत हो जावें ॥८॥ उस समय में समस्त पितृगण राम के इस परम शुभ वचन को सुनकर हर्ष से प्रफुल्लित होकर परम प्रीति युक्त होते हुए राम से बोले थे ॥९॥ हे पुत्र ! विशेष रूप से पितृभक्ति से तुम्हारा तप वर्द्धित हो जावेगा जो कि तुमने क्रोध से अभिभूत होकर क्षत्रियों का समुत्सादन किया है ॥१०॥ उस पाप से आप मुक्त हो जावेगे। वे सभी क्षत्रिय अपने ही कर्म्मों से नियातित हुए हैं। ये तुम्हारे द्वारा विनिर्मित ह्रद तीर्थ का स्वरूप धारण कर लेंगे-इसमें कुछ भी संशय नहीं है ॥११॥ जो पुरुष इन ह्रदों में स्नान करके अपने पितरों का तर्पण करेगा उसको उसके पितृगण अवश्य ही अभिलाषा वाले फल प्रदान कर देंगे ॥१२॥ उस समय में राम के पितर देवविप्रगण ! ईप्सित मानस कामनाओं को प्रदान कर तथा शाश्वत स्वर्ग वास देकर भार्गव राम पर

अत्यन्त प्रसन्न हुए थे और फिर वे वहीं पर अन्तर्धान होगये थे। इस प्रकार से महात्मा भार्गव में वेराम ह्रद पुण्य शाली हुए थे ॥१३-१४॥

स्नात्वा ह्रदेषु रामस्य ब्रह्मचारी शुचिव्रतः।
रामं समभ्यर्च्य तथा विन्देव्दहु सुवर्णकम् ॥१५
वंशमूलं समासाद्य तीर्थसेवी सुसयतः।
स्ववंशमुद्धरेद्विप्राः स्नात्वा चंव समूलकम् ॥१६
कायशोधनमासाद्य तीर्थं त्रैलोक्य विश्रुतम्।
शरीरशुद्धिमाप्नोति स्नातस्तस्मिन्न संशयः ॥१७
शुद्धिदेहश्च संयाति यस्मान्नावर्त्तते पुनः।
तावभ्द्रमन्ति तीर्थेषु सिद्धास्तीथपरायणाः।
यावन्न प्राप्नुवन्तीह तीर्थं तत्कायशाधनम् ॥१८
तस्मिस्तीर्थे च संप्लाव्य कायं संयतमानसः।
परं पदमवाप्नोति यस्मान्नावर्त्तते पुनः ॥१९
ततो गच्छेच्च विप्रेन्द्रास्ताथं त्रैलोक्यविश्रुतम्।
लोका यत्रोद्धृताः वें विष्णुना प्रभविस्णुना ॥२०
लोकोद्धारं समासाद्य तीर्थं स्मरणतत्परः।
स्नात्वा तोर्थवरे तस्मिँल्लोकं पश्यति शाश्वतम् ॥२१

ब्रह्मचर्य व्रत ग्रहण कर शुचिव्रत वाला पुरुष राम के रचित ह्रदों में स्नान करके तथा राम का अभ्यर्चन करके बहुत-सा सुवर्ण का लाभ प्राप्त किया करता है ।।१५।। वंश मूल को ग्रहण कर तीर्थों का सेवन करने वाला सुसंयत होकर धूल के सहित स्नान करके हे विप्रगण! अपने वंश का उद्धार करना चाहिए ।।१५।। यह तीर्थ त्रैलोक्य में परम प्रसिद्ध है। काया का शोधन करके इसका सेवन करे। इसमें स्नान करके शरीर की शुद्धि प्राप्त होती है—इसमें कुछ भी संशय नहीं है ।।१७।। वह परम शुद्ध होकर यहाँ से परलोक में जाता है जहां से पुनः पुनः इस लोक में वह आवर्त्तन नहीं किया करता है तीर्थ परायण सिद्ध लोग तभी तक तीर्थों में भ्रमण किया करते हैं जब तक यहाँ तीर्थ में अपनी काया का भली भाँति शोधन प्राप्त नहीं किया करते हैं

॥१८॥ संयत मन वाला पुरुष उस तीर्थ में अपनी काया को सम्प्लावित करके परम पद की प्राप्ति कर लेता है जहाँ से पुनः उसे जन्म ग्रहण नहीं करना पड़ता है ॥१९॥ हे विप्रेन्द्रो ! इसके बाद समस्त त्रिलोक में विश्रुत तीर्थ पर जाना चाहिए जहाँ पर प्रभु विष्णु भगवान् विष्णु सब लोकों का उद्धार किया था ॥२०॥ लोकोद्धार तीर्थ को प्राप्त कर स्मरण में तत्पर रहता हुआ तीर्थ वर स्नान करे जिससे वह फिर शाश्वत लोक की प्राप्ति कर लेता है ॥२१॥

यत्र विष्णु स्थितो नित्यं शिवो देवश्च शाश्वतः ।
तौ देवौ प्रणिपातेन प्रसाद्य मुक्तिमाप्नुयात ॥२२
श्रीतीर्थं तु ततो गच्छेच्छा लग्राममनुत्तमम् ।
यत्र स्नातस्य सान्निध्यं सदा देवः प्रयच्छति ॥२३
कपिलाह्रदमासाद्य तीर्थं त्रैलोक्यविश्रुतम् ।
तत्र स्नात्वाऽर्चयित्वा च दैवतानि पितृंस्तथा ॥२४
कपिलानां सहस्रस्य फलं विन्दति मानवः ।
तत्रस्थितं महादेवं कपिलं वपु राश्रितम् ॥२५
दृष्ट्वा मुक्तिमवाप्नोति ऋषिभिः तूजितं शिवम् ।
सूर्यतीर्थं समासाद्य स्नात्वा नियतमानसः ॥२६
अर्चयित्वा पितृन्देवानुपवासपरायणः ।
अग्निष्टोममवाप्नोति सूर्यलोकं च गच्छति ॥२७
सहस्राकिरणं देवं भानुं त्रैलोक्यविश्रुतम् ।
दृष्ट्वा मुक्तिमवाप्नोति नरो ज्ञानसमन्वितः ॥२८

जहाँ पर विष्णु और शाश्वत देव शिव नित्य ही स्थित रहा करते हैं। उन देवों को प्रणिपात करके प्रसन्न कर लेने पर मानव मुक्ति को प्राप्त कर लेता है ॥२२॥ इसके उपरान्त फिर श्री तीर्थ पर जाना चाहिए। जहाँ सर्वोत्तम शालग्राम है। जहाँ पर स्नान कर लेने पर उस पुरुष को देव सदा ही सान्निध्य प्रदान किया करते हैं ॥२३॥ फिर कपिला ह्रद को प्राप्त करे जो तीर्थ त्रिलोकी में प्रसिद्ध है। वहाँ स्नान करके देवों और पितरों का अभ्यर्चन करना चाहिए ॥२४॥

वहाँ स्नानाभ्यर्चन से एक सहस्र कपिला गौओं के दान करने का पुण्य-फल मनुष्य प्राप्त किया करता है। सत्र में संस्थित महादेव कपिल के वपु में समाश्रित हैं ॥२५॥ उन ऋषिगण के द्वारा समर्चित भगवान् शिव का दर्शन करके मनुष्य मुक्ति प्राप्त कर लेता है। फिर सूर्य्य तीर्थ को प्राप्त करे और वहाँ नियत मन वाला होकर स्नान करे ॥२६॥ वहाँ पितरों तथा देवों का पूजन करके उपवास तत्पर हो जाना चाहिए। ऐसा करने वाला मनुष्य अग्निष्टोम याग का फल पाता है और सूर्यलोक चला जाया करता है ॥२७॥ सहस्र किरणों वाले और त्रैलोक्य में विख्यात देव भानु का दर्शन करके मनुष्य ज्ञान से संयुत होता हुआ मुक्ति की प्राप्ति किया करता है ॥२८॥

भवानीवनमासाद्य तीर्थसेवी यथाक्रमम् ।
तत्राभिषेकं कुर्वाणा गोसहस्रफल लभेत् ॥२९
पितामहस्य पिवतो ह्यमृतं पूर्वमेव हि ।
उद्गारात्सुरभिर्जाता सा च पातालमाश्रिता ॥३०
तस्याः सुरभयो जाता मातरो लोकमातरः ।
ताभिस्तत्संकलं व्याप्तं पातालं सुनिरन्तरम् ॥३१
पितामहस्य यजतो दक्षिणार्थमुपाहृताः ।
आहूता ब्राह्मणास्ते च विभ्रान्ता विवरेण हि ॥३२
तस्मिन्विवरद्वारे सु स्थितो गजपतिः स्वयम् ।
यं दृष्ट्वा सकलान्कामान्प्राप्नोति नियतेन्द्रियः ॥३३
सङ्गिनीं तु समासाद्य तीर्थं मुक्तिसमाश्रयम् ।
देव्यास्तीर्थे नरः स्नात्वा लभते रूपमुत्तमम् ॥३४
अनन्तां श्रियमाप्नोति पुत्रपौत्रैः समन्वितः ।
भोगांश्च विपुलाँल्लब्ध्वा प्राप्नोतिपरमं पदम् ॥३५

इसके उपरान्त भवानी वन में पहुंच कर जो तीर्थों का सेवन करने वाला पुरुष है वह क्रमानुसार वहाँ स्नान करके एक हजार गौओं के दान का पुण्य-फल प्राप्त किया करता है ॥२९॥ जिस समय पितामह अमृत का पान पूर्व में ही कर रहे थे तो उनके उद्धार से एक सुगन्ध

उत्पन्न हुई थी और वह पाताल लोक में समाश्रित हो गई थी ॥३०॥ उससे फिर माताएँ तथा लोक माताएँ ये सुरभियाँ उत्पन्न हुई थी और उनसे सम्पूर्ण पाताल लोक निरन्तर व्याप्त हो गया था ॥३१॥ यजन करने वाले ब्रह्मा से दक्षिणा के लिये उपाहृत वहुत से ब्राह्मण थे। उन समाहूत ब्राह्मणों ने उस विवर को देखा तो वे विभ्रान्त हो गये थे ॥३२॥ उस विवर के दरवाजे पर भगवान् गणपति स्वयं समास्थित थे। जिन गणपति का दर्शन करके मनुष्य समस्त लोकों को प्राप्त कर लेता है किन्तु नियतइन्द्रियों वाला होना चाहिए ॥३३॥ संगिनी नामक तीर्थ पर पहुंच कर मनुष्य मुक्ति का समाश्रय ग्रहण कर लेता है। उस देवी के तीर्थ मनुष्य स्नान करके उत्तम रूप को लब्ध कर लेता है ॥३४॥ वह मनुष्य अनन्तश्री की प्राप्ति किया करता है और पुत्र तथा पौत्रों से भी समन्वित हो जाता है। वहुत-से भोगों का लाभ करके अन्त में यह परम पद की प्राप्ति कर लेता है ॥३५॥

ब्रह्मावर्ते नरः स्नात्वा ब्रह्मज्ञानसमन्वितः ।
जायते नात्र संदेहः प्राणान्मुञ्चति चेच्छया ॥३६
ततो गच्छेद्धि विप्रेन्द्रा द्वारपालं च रन्तुकम् ।
तत्र तीर्थे सरस्वत्या यक्षेन्द्रस्य महात्मनः ॥३७

तत्र ज्ञानं समासाद्य ह्युपवासपरायणः ।
यक्षस्य च प्रसादेन लभते कामिकं फलम् ॥३८
ततो गच्छेद्धि विप्रेन्द्रा ब्रह्मावर्त्तं मुनिस्तुतम् ।
ब्रह्मावर्त्ते नरः स्नात्वा ब्रह्म चाप्नोति निश्चितम् ॥३९

ततो गच्छेच्च विप्रेन्द्राः सुतीर्थकमनुत्तमम् ।
तत्र सन्निहिता नित्यं पितरो दैवतैः सह ॥४०
तत्राभिषेकं कुर्वीत पितृदेवार्चने रतः ।
अश्वमेधमवाप्नोति पितृन्प्रीणान्ति शाश्वतम् ॥४१

ततोऽवन्त्यां च धर्मज्ञ समासाद्य यथाक्रमम् ।
कामेश्वरस्य तीर्थे तु स्नात्वा श्रद्धासमन्वितः ॥४२

ब्रह्मावर्त्त तीर्थ में मनुष्य स्नान करके ब्रह्म ज्ञान से युक्त हो जाता है, इसमें किञ्चिनमात्र भी सन्देह नहीं है और यह भी क्षमता प्राप्त होती कि वह अपनी ही इच्छा से अपने प्राणों का त्याग किया करता है ॥३६॥ हे विप्रेन्द्रगण ! इसके पश्चात् द्वारपाल रन्तुक के समीप में जाना चाहिए जोकि वहाँ पर तीर्थ में सरस्वती के महात्मा यक्षेन्द्र का रहता है ॥३७॥ वहाँ ज्ञान की प्राप्ति कर उपवास में परायण हो जावे। फिर यक्ष के प्रसाद से कामिक फल प्राप्त कर लेता है ॥३८॥ इसके बाद हे विप्रेन्द्रो ! मुनियों के द्वारा संस्तुत ब्रह्मावर्त्त में जाना चाहिए। उस ब्रह्मावर्त्त तीर्थ में मनुष्य स्नान करके निश्चतरूप से ब्रह्म की प्राप्ति किया करता है ॥३६॥ हे विप्रेन्द्र वृन्द ! इसके पश्चात् सर्वोत्तम सुतीर्थक में पहुंचे। वहाँ पर नित्य ही देवताओं के साथ पितर सन्निहित रहा करते हैं ॥४०॥ वहां पर पितृगण तथा देव वृन्द के अभ्यर्चन में रति रखकर अभिषेक करना चाहिए। इसका ऐसा पुण्यफल होता है कि वह अश्वमेध यज्ञ का फल बिना ही किये पा लेता है और निरन्तर पितृगण को प्रसन्न कर लेता है ॥४१॥ हे धर्म के ज्ञाता ! फिर अवन्तीपुरी में पहुंचकर यथाक्रम कामेश्वर के तीर्थ में श्रद्धा के भाव से युक्त होकर स्नान करे ॥४२॥

सर्वव्याधिविनिर्मुक्तो ब्रह्म चाप्नोति निश्चितम् ।
मातृतीर्थे च तत्रैव यत्र स्नातस्य भक्तितः ॥४३

प्रजा विवर्द्धते नित्यमनन्तां चप्नुयाच्छ्रियम् ।
ततः सीतावनं गच्छेन्नियतो नियताशनः ॥४४

तीर्थं तत्र च विप्रेन्द्रा महदन्यत्र दुर्लभम् ।
पुनाति दर्शनादेव पुरुषानेकविंशतिम् ॥४५

केशानभ्युक्ष्य चैकस्मिन्पूतो भवति पापतः ।
तत्र तीर्थं वरं चान्यच्छ्वुनां लोमापहं महत् ॥४६

तत्र विप्रा महाप्राज्ञा विद्वांसस्तीर्थतत्पराः ।
श्वविलोमापहे तीर्थे विप्रास्त्रैलोक्यविश्रुते ॥४७

प्राणायामैर्निर्हरन्ति स्वलोमानि द्विजोत्तमाः ।
पूतात्मानश्च ते विप्राः प्रयान्ति परमां गतिम् ॥४८
दशाश्वमेधिकं चैव तत्र तीर्थं सुविश्रुतम् ।
तत्र स्नात्वा भक्तियुक्तस्तदेव लभते फलम् ॥४९

इसका यह फल होता है कि वह समस्त प्रकार की व्याधियों से मुक्त हो जाता है और निश्चित् रूप से ब्रह्म की प्राप्ति कर लेता है। वहीं पर मातृतीर्थ है उसमें भक्ति के साथ स्नान करने वाले पुरुष को सब प्रकार की वृद्धि होती है ॥४३॥ नित्य ही उसकी सन्तान बढ़ती हैं और अनन्त श्री की प्राप्ति भी होती है। इसके अनन्तर सीता वन नामक तीर्थं में नियत होकर तथा नियत भोजन वाला होकर ही जावे ॥४४॥ हे विप्रेन्द्र वृन्द वहाँ पर ऐसा महान् तीर्थ है जो कि अन्यत्र वहुत ही दुर्लभ है। उसके दर्शन मात्र से ही वह इक्कीस पुरखों को पवित्र कर देता है ॥४५॥ एक में अपने केशों का अभ्युक्षण करके पाप से पवित्र हो जाता है अर्थात् पाप छूट कर शुद्धता प्राप्त होती है। वहाँ पर एक अन्य महान् शुभों का लोमा यह श्रेष्ठतम तीर्थ है ॥४६॥ वहाँ पर हे विप्रगण! महान् विद्वान् तथा अत्यन्त विशाल प्रज्ञा वाले, तीर्थों में परायण ब्राह्मण उस श्व-विलोमा यह तीर्थ में जो कि त्रैलोक्य में परम विख्यात है ॥४७॥ वहाँ पर ही दशाश्व मेधिक नामक तीर्थं अति प्रसिद्ध है। वहाँ जाकर भक्ति के भाव से स्नान करने पर वही फल प्राप्त होता है अर्थात् दश अश्व मेध यज्ञों का फल मिल जाता है ॥४९॥

ततो गच्छेद्धि श्रद्धावान्मानुषं लोकविश्रुतम् ।
दर्शनात्तस्य तीर्थस्य मुक्तो भवति किल्बिषैः ॥५०
पुरा कृष्णमृगास्तत्र व्याधैस्तु शरपीडिताः ।
अवगाह्य सरस्यस्मिन्मानुषत्वमुपागताः ॥५१
ततो व्याधाश्च ते सर्वे मानपृच्छन्द्विजोत्तमान् ।
मृगाः क्व ऋषयो याता अस्माभिः शरपीडिताः ॥५२
निमग्नास्ते सरः प्राप्य किं तद्ब्रूत द्विजोत्तमाः ।
तेऽब्रूवंस्तत्र वै पृष्टा वयं ते च द्विजोत्तमाः ॥५३

अस्य तीर्थस्य महात्म्यान्मानुषत्वमुपागताः ।
तस्माद्यूयं श्रद्दधानाः स्नात्वा तीर्थे विमत्सराः ।।५४
सर्वपापविनिर्मुक्ता भविष्यथ न संशयः ।
ततः स्नाताश्च ते सर्वे शुद्धदेहा दिवं गताः ।।५५
एतत्तीर्थस्य माहात्म्यं मानुषस्य द्विजोत्तमाः ।
ये शृण्वन्ति श्रद्दधानास्तेऽपि यान्ति परांगतिम् ।।५६

इसके अनन्तर श्रद्धाभाव रखने वाला मनुष्य लोक प्रसिद्ध मानुष तीर्थ पर जावे । उस तीर्थ के दर्शन से समस्त किल्विषों से मनुष्य मुक्त हो जाया करता है ।।५०।। पहले समय में वहां पर काले हरिण व्याधों के द्वारा शरों से पीड़ित किये गये थे । वे सब इस सर में अवगाहन (स्नान) करके मानुपत्व को प्राप्त हो गये थे ।।५१।। इसके पश्चात् उन व्याधों ने उन द्विजोत्तमों से पूछा था हमारे शरों से पीड़ित होकर ऋषिरूप में आने वाले हे मृगो ! कहां आप लोग चल दिये हैं ? ।।५२।। हे द्विजोत्तमो ! आप लोग इस सर को प्राप्त कर निमग्न हो गये थे न ? फिर यह क्या हुआ ? इसे आप हमको स्पष्ट बतलाइये । उन द्विजोत्तमों से जब इस तरह पूछा गये तो कहा कि हम वे ही मृग हैं ।।५३।। यह इस तीर्थ का ही महान् माहात्म्य है इसी से हमने यह मानुषत्व प्राप्त कर लिया है । इसलिये आप लोग भी श्रद्धा भाव-समन्वित होकर इस तीर्थ में स्नान करने से मात्सर्य से रहित हो जाओगे ।।५४।। तथा समस्त पापों से भी छुटकारा पा जाओगे इसमें कुछ भी संशय नहीं है । इसके पश्चात् उन सब ने भी स्नान किया था और शुद्ध देह वाले होकर वे समस्त व्याध दिवलोक में चले गये थे । हे द्विजोत्तमो ! इस मानुष तीर्थ का यही माहात्म्य है । जो इस तीर्थ के माहात्म्य का श्रवण किया करते हैं और श्रद्धा के भाव से समन्वित होते हैं । वे भी परम गति को प्राप्त हो जाया करते हैं । इसमें लेश मात्र भी सन्देह का कोई अवसर ही नहीं है ।।५५-५६।।

———

३६—तीर्थ माहात्म्य वर्णन (१)

मानुषस्य तु पूर्वेण क्रोशमात्रे द्विजोत्तमाः ।
आपगा नाम विख्याता नदी द्विजनिषेविता ॥१
श्यामाकं पयसा सिद्धमाज्येन च परिप्लुतम् ।
ये प्रयच्छन्ति विप्रेभ्यस्तेषां पापं न विद्यते ॥२
ये तु श्राद्धं करिष्यन्ति प्राप्य तामापगां नदीम् ।
ते सर्वकामसंयुक्ताभविष्यन्ति न संशयः ॥३
स्मरन्ति पितरस्तस्य स्मरन्ति च पितामहाः ।
अस्माकं च कुले पुत्रः पौत्रो वाऽपि भविष्यति ॥४
य आपगां नदीं गत्वाऽस्मांस्तिलैस्तर्पयिष्यति भवेत् ।
तेन तृप्ता भविष्यामो यावत्कुलशतं भवेत् ॥५
नभस्ये मासि संप्राप्ते कृष्णपक्षे विशेषतः ।
चतुर्दश्यां तु मध्याह्न पिण्डदो मुक्तिमाप्नुयात् ॥६
ततो गच्छेच्च विप्रेन्द्रा ब्रह्मणः स्थानमुत्तमम् ।
ब्रह्मोदुम्बरमित्येवं सर्वलोकेषु विश्रुतम् ॥७

महर्षिलोम हर्षण ने कहा—हे द्विजोत्तम वृन्द ! इन मानुष तीर्थ के पूर्व में एक कोश दूरी पर आपका नाम वाली विख्यात नदी है है जिसका कि द्विजगण सेवन किया करते हैं ।१। आज्य से परिप्लुत और पय के द्वारा सिद्ध किया हुआ श्यामाक को ब्राह्मणों के लिये जो दान किया करते हैं उनको फिर कोई भी पाप शेष ही नहीं रहा करता है ।२। उस आपगा नदी पर पहुंच कर जो भी कोई मनुष्य अपने पितरों का श्राद्ध करेंगे वे सब अपनी कामनाओं से संयुक्त होकर सफल हो जायगे इसमें कुछ भी संशय नहीं है ।३। उसके पितृगण तथा पितामह लोग स्मरण किया करते हैं कि हमारे कुल में जो भी कोई पुत्र अथवा पौत्र होगा ।४। जो आपगा नदी पर जाकर हमको तिलों के द्वारा तृप्त करेगा अर्थात् हमारा तर्पण करेगा उससे हम ऐसे तृप्त हो जायेंगे कि जब तक उसके सौ कुल (अर्थात् सौ पीढ़ियां) होंगे तब

तक बराबर हमारी तृप्ति बनी रहेगी ।५। नभस्य मास के प्राप्त होने पर विशेष करके कृष्ण पक्ष में चतुर्दशी के दिन मध्याह्न में जो पिण्ड दान करता है वह मुक्ति को प्राप्त हो जाता है ।६। इसके पश्चात् हे विप्रेन्द्रगण ! ब्रह्माजी के उत्तम स्थान में जाना चाहिए । वह सब लोकों में 'ब्रह्मोदर' इसी नाम से विख्यात है ।७।

तत्र ब्रह्मर्षिकुण्डेषु स्नातस्य द्विज सत्तमाः ।
सप्तर्षीणां प्रसादेन सप्तसोमफलं लभेत् ॥८
भरद्वाजो गौतमश्च जमदग्निश्च कश्यपः ।
विश्वामित्रो वसिष्ठश्च अत्रिश्च भगवानृषिः ॥९
एते समेत्य तत्कुण्डं कलितं भुवि दुर्लभम् ।
ब्रह्मणा सेवितं तस्माद्ब्रह्मोदुम्बरमुच्यते ॥१०
तस्मिंस्तीर्थवरे स्नात्वा ब्रह्मणोऽव्यक्तजन्मनः ।
ब्रह्मलोकमवाप्नोति नात्र कार्या विचारणा । ११
देवान्पितॄन्समुद्दिश्य यो विप्रं पूजयिष्यति ।
पितरस्तस्य सुखिता दास्यन्ति भुवि दुर्लभम् ॥१२
सप्तर्षींश्च समुद्दिश्य पृथक्स्नानं समाचरेत् ।
ऋषीणां च प्रसादेन सप्तलोकाधिपो भवेत् ॥१३
कपिलस्थेति विख्यातं सर्वपातकनाशनम् ।
यस्मिन्स्थितः स्वयं देवो वृद्धकेदारसञ्ज्ञितः ॥१४

वहां पर ब्रह्मर्षि कुण्डों में हे द्विजगण ! जो भी कोई स्नान करता है वस सप्तर्षियों के प्रसाद से सात सोमों के पुण्य-फल को प्राप्त किया करता है ।८। वे सात ऋषि ये हैं—भरद्वाज, गौतम, जमदग्नि, कश्यप, विश्वामित्र, वसिष्ठ, अत्रि ये सात ऋषि सप्तर्षि कहे जाते हैं ।९। इन सबने वहाँ एकत्रित होकर भूमण्डल में अति दुर्लभ वह कुण्ड बनाया है । ब्रह्माजी के द्वारा सेवित है इसी लिये ब्रह्मोदुम्बर इस नाम से कहा जाया करता है ।१०। उस तीर्थ में स्नान करके जोकि परम श्रेष्ठ तीर्थ है अव्यक्त जन्मा ब्रह्मा के ब्रह्मलोक में अवश्य ही प्राप्त हो जाता है—इसमें कुछ भी विचार या संशय नहीं करना चाहिए ।११।

देवों और पितरों का उद्देश्य लेकर जो विप्रों की पूजा करेगा उससे उसके पितरों को परम सुख प्राप्त होगा और फिर वे उन परमोत्तम पदार्थों को प्रदान करेंगे जो इस भूलोक में अति दुर्लभ हैं ।१२। सप्तर्षियों का उद्देश्य लेकर पृथक् स्नान करना चाहिए। ऋषियों के प्रसाद से मनुष्य सातों लोकों का अधिपति हो जाता है ।१३। कपिलस्थ इस नाम से विख्यात तीर्थ समस्त पाठकों का नाश करने वाला होता है जिसमें वृद्ध केदार संज्ञा वाले स्वयं देव संस्थित हैं ।१४।

तत्र स्नात्वार्चयित्वा च रुद्रं दण्डिसमन्वितम् ।
अन्तर्द्धानमवाप्नोति शिवलोके स मोदते ।।१५
यस्तत्र तर्पणं कृत्वा पिबते कुलकत्रयम् ।
देवदेवं नमस्कृत्य केदारस्य फलं लभेत् ।।१६
यस्तत्र कुरुते श्राद्धं शिवमुद्दिश्य मानवः ।
चैत्रशुक्ल चतुर्दश्यां प्राप्नोति परमं पदम् ।।१७
कलस्यां तु ततो गच्छेद्यत्र देवी च संस्थिता ।
दुर्गा कात्यायनी भद्रा निद्रा माया सनातनी ।।१८
कलस्यां च नरः स्नात्वा दृष्ट्वा दुर्गां तटस्थिताम् ।
संसारगहनं दुर्गं निस्तरेन्नात्र संशयः ।।१९
ततो गच्छेद्धि सरकं त्रैलोक्यस्थापि दुर्लभम् ।
कृष्णपक्षे चतुर्दश्यां दृष्ट्वा देवं महेश्वरम् ।।२०
लभते सर्वकामांश्च शिवलोकं स गच्छति ।
तिस्रः कोट्यस्तु तीर्थानां सरके द्विजसत्तमाः ।।२१

वहाँ पर स्नान करके तथा अभ्यर्चन करके अर्थात् दण्ड समन्वित भगवान् रुद्रदेव का पूजन करके अन्तर्धान को प्राप्त होता है और फिर वह शिवलोक में आनन्द प्राप्त किया करता है ।१५। जो वहाँ पर तर्पण करके तीन चुल्लू जलका पान किया करता है और देवों के भी देव को नमस्कार किया करता है वह केदार के पुण्य-फल को प्राप्त करलेता है ।१६। जो मानव भगवान् शिव का उद्देश्य लेकर वहाँ पर श्राद्ध करता है और वह भी चैत्र मास के शुक्ल पक्ष की चतुर्दशी

तिथि में करता है वह परम पद की प्राप्ति करता है ।१७। इसके उपरान्त कलस्वी में जाने वहां पर देवी विराजमान है । वही देवी दुर्गा-कात्यायनी, भद्रा, निद्रा, माया और सनातनी हैं ।१८। कलसी में स्नान करके मनुष्य तट पर स्थित दुर्गा का दर्शन करे तो इस गहनतम संसार के दुर्ग का निस्तरण प्राप्तकर लेता है—इसमें कुछ भी संशय नहीं है ।१९। इसके बाद फिर सरक नामक तीर्थ में गमन करे जोकि त्रैलोक्य में भी परम दुर्लभ तीर्थ है । कृष्ण पक्ष की चतुर्दशी तिथि में महेश्वर देव का वहाँ पर दर्शन करे तो अपने समस्त मनोरथों की पूर्त्ति करता है और अन्त में वह मनुष्य शिवलोक को चला जाता है । हे द्विज श्रेष्ठो ! इस सरक तीर्थ में तीन करोड़ तीर्थ विद्यमान रहते हैं ।२०-२१।

रुद्रकोटिस्तथा कूपे सरोमध्ये व्यवस्थिता ।
तस्मिन्सरसि यः स्नात्वा रुद्रकोटि स्मरेन्नरः ॥२२
पूजयित्वा रुद्रकोटिं भविष्यति न संशयः ।
रुद्राणां च प्रसादेन सर्वदोषविवर्जितः ॥२३
ऐन्द्रयानेन संयुक्तः परं पदमवाप्नुयात्ः ।
इडास्पदं च तत्रैव तीर्थं पापभयापहम् ॥२४
यस्मिन्मुक्तिमवाप्नोति दर्शनादेव मानवः ।
तत्र स्नात्वाऽर्चयित्वा च पितृदेवगणानपि ॥२५
न दुर्गतिमवाप्नोति चिन्तितं मनसाऽऽप्नुयात् ।
केदारं च महातीर्थं सर्वकल्मषनाशनम् ॥२६
तत्र स्नात्वा तु पुरुषः सर्वदानफलं लभेत् ।
किं रूपं च महातीर्थं तत्रैव भुवि दुर्लभम् ।
तस्मिन्स्नातस्तु पुरुषः सर्वयज्ञफलं लभेत् ॥२७
सरकस्य तु पूर्वेण तीर्थं त्रैलोक्यविश्रुतम् ।
अस्य जन्म भुवि ख्यातं सर्वपापप्रणाशनम् ॥२८

कूप में रुद्र कोटि है तथा सर के मध्य में व्यवस्थित है । उस सर में स्नान करके जो कोई मनुष्य रुद्र कोटि का स्मरण करता है ।२२।

जो रुद्र कोटि का स्मरण करता है वह रुद्रों के प्रसाद से समस्त दोषों से रहित हो जाता है—इसमें कुछ भी संशय नहीं है ।२३। ऐन्द्रयान से संयुक्त होकर परम पद की प्राप्ति किया करता है। वहीं पर एक इडास्पद नाम वाला तीर्थ है जो पापों के भय को नष्ट कर देने वाला है ।२४। वह ऐसा तीर्थ है जिसमें जाकर दर्शन मात्र से ही मनुष्य मुक्ति की प्राप्ति कर लेता है। वहाँ स्नान करके तथा समर्चन करके एवं पितृगण और देवगण का पूजन करके मुक्ति की प्राप्ति हो जाती है ।२५। वह मनुष्य कभी भी दुर्गति की प्राप्ति तो करता ही नहीं है और जो भी मन से कुछ चिन्तन करता है उसकी भी प्राप्ति कर लेता है। यह केदार महान् तीर्थ है जो सम्पूर्ण कल्मषों का नाश करने वाला होता है ।२६। वहाँ पर स्नान करके मनुष्य सम्पूर्ण प्रकार के दानों के पुण्य का फल प्राप्त कर लेता है। वहाँ विश्व का पालक महान् तीर्थ है जो भूमण्डल में अत्यन्त दुर्लभ है । उस तीर्थ में स्नान करने वाला पुरुष समस्त यज्ञों के फलों का भागी हो जाया करता है ।२७। इस सरक तीर्थ के पूर्व में त्रैलोक्य विख्यात तीर्थ है। इसका जन्म भूमण्डल में सब पापों का प्रकाश करने वाला ही विख्यात है ।२८।

नारसिंहं वपुः कृत्वा दान वमूर्जितम् ।
तिर्यग्योनिस्थितो विष्णुः सिंहीषु रतिमाप्तवान् ।।२९
ततो देवाः सगंधर्वा आराध्य वरदं शिवम् ।
ऊचुः प्रणतसर्वाङ्गा विष्णुदेहस्य लम्भने ।।३०
ततो देवो मसात्मासौ शारभ रूपमास्थितः ।
युद्धं चकार सुमहद्दिव्यं वर्णसहस्रकम् ।।३१
युद्धयमानौ तु तौ देवौ पतितौ ह्रदमध्यतः ।।३२
तस्मिन्सरस्तटे विप्रो देवर्षिर्नारदः स्थितः ।
आश्वत्थस्थानमाश्रित्य ध्यानस्थस्तौ ददर्श ह ।।३३
विष्णुश्चतुर्भुजो जज्ञे लिङ्गाकारः शिवः स्थितः ।
तौ दृष्ट्वा तत्र पुरुषौ तुष्टाव भक्ति भावतः ।।३४

नमः शिवाय देवाय विष्णवे प्रभविष्णवे ।
हरये च उमाभर्त्रे स्थितिकालभृते नमः ।।३५

नारसिंह वपु धारण करके परम ऊर्जित दानव (हिरण्यकशु) का हनन किया था तथा भगवान् विष्णु ने तिर्यग्योनि में स्थित होकर सिंहनियों में रति प्राप्त की थी ।२९। इस के अनन्तर गन्धर्वों के सहित देवों ने वरदान प्रदान करने वाले भगवान् शिव का समाराधन किया था । सब ने प्रणत अङ्गों वाले होकर विष्णु के देह के लम्भन के लिसे प्रार्थना की थी ।३०। इसके पश्चात् महान् आत्मा वाले इस देव ने शरभ का रूप धारण किया था और अत्यन्त महान् युद्ध एक हजार वर्ष तक किया था ।३१। इस प्रकार से युद्ध करते हुए वे दोनों देव ह्रद के मध्य में गिर गये थे । ३२ । उस सर के तट पर देवर्षि विप्र नारद संस्थित थे जो कि एक अश्वत्थ के स्थान का समाश्रय करके ध्यान में विद्यमान थे । इन ने उन दोनों को देखा था ।३३। भगवान् विष्णु तो चार भुजाओं वाले थे और शिव लिङ्ग के आकार में संस्थित थे । उन दोनों महापुरुषों का दर्शन कर अति भक्ति की भावना से उन्होंने उनका स्तवन किया था ।३४। नारदजी ने इस प्रकार से उनकी स्तुति की थी —देव शिव के लिये तथा प्रभु विष्णु हरि के लिये मेरा नमस्कार समर्पित हो । उमा के स्वामी और स्थिति काल के भरण करने वाले के लिये नमस्कार है ।३५।

हराय बहुरूपाय विश्वरूपाय विष्णवे ।
त्र्यम्बकाय सुसिद्धाय कृष्णाय ज्ञानहेतवे ।।३६
धन्योऽहं सुकृती नित्यं यद्दृष्टौ पुरुषोत्तमौ ।
ममाश्रममिदं पुण्यं युवाभ्यां विमलीकृतम् ।।३७
अद्यप्रभृति त्रैलोक्ये धन्यं जन्मेति विश्रुतम् ।।३८
य इहागत्य च स्नात्वा पितॄन्सन्तर्पयिष्यति ।
तस्य श्रद्धान्वितस्येह ज्ञानमिन्द्रं भविष्यति ।।३९
अश्वत्थस्य च यन्मूलं सदा तत्र वसाम्यहम् ।
अश्वत्थवन्दनं कृत्वा शिवं कृष्णं नमस्यति ।।४०

ततो गच्छेद्धि विप्रेन्द्रा नागस्य ह्रदमुत्तमम् ।
पुण्डरीकाम्भसि स्नात्वा यज्ञस्यफलमवाप्नुयात् ।।४१
दशम्यां शुक्लपक्षस्य चैत्रस्य तु विशेषतः ।
स्नानं जपस्तथा श्राद्धं मुक्तिमार्गप्रदायकम् ।।४२

भगवान् हर जोकि बहुत-से स्वरूपों वाले हैं तथा भगवान् विष्णु के लिये जो विश्व के स्वरूप वाले हैं नमस्कार है। सुसिद्ध त्र्यम्बक के लिये मेरा नमस्कार है ।।३६।। नारद ने कहा —मैं परम धन्य भाग वाला हूं और नित्य ही बहुत सुकृती है जिसने इन दोनों पुरुषोत्तमों का आज दर्शन प्राप्त कर लिया है। मेरे आश्रम को आप दोनों ने परम पुण्यमय तथा विमल बना दिया है ।।३७।। आज से लेकर त्रैलोक्य में धन्य जन्म हैं—ऐसा विख्यात होगा ।।३ ।। जो भी कोई यहां पर समागत होकर स्नान करेगा तथा अपने पितृगण का तर्पण करेगा उस श्रद्धा से समन्वित पुरुष का ज्ञान इन्द्र हो आयगा ।।३८।। इस अश्वत्थ का जो मूल है, मैं वहाँ पर सदा वास करता हूं। जो इस अश्वत्थ (पीपल) की वन्दना करके शिव तथा कृष्ण को नमस्कार करेगा। इसके पश्चात् हे विप्रेन्द्र-गण ! नाग के उत्तम ह्रद पर जाकर पुण्डरीकाम्भ में स्नान करेगा वह यज्ञ करने का पुण्य-फल प्राप्त कर लेगा ।।४०-४१।। चैत्रमास की शुक्ल पक्ष की विशेष रूप से दशमी तिथि में स्नान-जप तथा श्राद्ध मुक्ति के माग का प्रदान करने वाला होता है ।।४२।।

ततस्त्रिविष्टपं गच्छेत्तीर्थं देवनिषेवितम् ।
तत्र वैतरणी पुण्या नदो पापप्रमोचनी ।।४३
तत्र स्नात्वाऽर्चयित्वा च शूलपाणिं वृषध्वजम् ।
सर्वपापविशुद्धात्मा गच्छेच्च परमां गतिम् ।।४४
ततो गच्छेद्धि विप्रेन्द्रा रसावतनमुत्तमम् ।
तत्र स्नात्वा भक्तियुक्तः सिद्धिमाप्नोत्यनुत्तमाम् ।।४५
चैत्रशुक्लचतुर्दश्यां तीर्थे स्नात्वा ह्यलेपके ।
पूजयित्वा शिव तत्र पापलेशो न विद्यते ।।४६
ततो गच्छेद्धि विप्रेन्द्राः फलकीवनमुत्तमम् ।

यत्र देवाः सगन्धर्वाः साध्याश्च ऋषयस्तथा ।
तपश्चरन्ति विपुलं दिव्यं वर्ष सहस्रकम् ।।४७

दृषद्वन्यां नरः स्नात्वा तर्पयित्वा च देवताः ।
अग्निष्टोमातिरात्रस्य फलं विन्दति मानवः ।।४८

सोमक्षये च संप्राप्ते सोमस्य च दिने तथा ।
यः श्राद्धं कुरुते मर्त्यस्तस्य पुण्यफलं शृणु ।।४९

इसके अनन्तर त्रिविष्टय तीर्थ में जावे जो देवों द्वारा निषेवित होता है। वहाँ पर परम पुण्यमयी वैतरणी नाम वाली नदी है जो पापों से छुटकारा दिलाने वाली होती है ।।४ ।। वहाँ पर स्नान करके तथा शूल पाणि वृषध्वज का अर्चन करके समस्त पापों से छूटकर विशुद्ध आत्मा वाला पुरुष हो जाया करता है और फिर परमगति को प्राप्त होता है। इसके उपरान्त हे विप्रेन्द्र गण ! उत्तम रसावर्त्तन तीर्थ में जाना चाहिए। वहाँ पर भक्ति से युक्त होकर स्नान करने से मनुष्य उत्तम सिद्धि को प्राप्त किया करता है ।।४४-४५।। चैत्रमास की शुक्ल पक्ष की चतुर्दशी में अलेपक तीर्थ में स्नान करके तथा वहाँ पर शिव का पूजन करे तो पापों का लेशमात्र भी नहीं रहता है ।।४६।। इसके पश्चात् हे विप्रगण ! फिर उत्तम फल की वन तीर्थ में चला जावे जहां पर देव-गण, गन्धर्व साध्य तथा ऋषि वृन्द विपुल एवं दिव्य तप सहस्रों वर्ष पर्यन्त किया करते हैं ।।४७।। दृषद्वती नदी में मनुष्य स्नान करके तथा देवों का तर्पण करके अग्निष्टोमातिरात्र यज्ञ के फल का लाभ किया करता है ।।४८।। सोमक्षय प्राप्त होने पर सोम के ही दिन में जो मनुष्य-श्राद्ध करता है उसका पुण्य-फल होता है उसका अब आप लोग मुझसे श्रवण करें ।।४९।।

गयायां च यथा श्राद्धं पितॄन्प्रीणाति नित्यशः ।
तथा श्राद्धं च कर्त्तव्यं फलकीवनमाश्रितैः ।।५०

मनसा स्मरते यस्तु फलकीवनमुत्तमम् ।
तस्यैव पितरस्तृप्तिं प्रयास्यन्ति न संशयः ।।५१

तत्रापि तीर्थं सुमहत्सर्वदेवैरलंकृतम् ।
तस्मिन्स्नातस्तु पुरुषो गोसहस्रफलं लभेत् ॥५२

पाणिखाते नरः स्नात्वा पितॄन्संतप्य मानवः ।
अवाप्नुयाद्राजसूयं साङ्ख्यं योगं च विन्दति ॥५३

ततो गच्छेद्धि सुमहत्तीर्थमिश्रकमुत्तमम् ।
तत्र तीर्थानि मुनिना मिश्रितानि महात्मना ॥५४
व्यासेन मुनिशार्दूल दधीचार्थं महात्मना ।
सर्वतीर्थेषु स स्नातो मिश्र के स्नाति यो नरः ॥५५

ततो व्यासवनं गच्छेन्नियतो नियताशनः ।
मनोजवे नरः स्नात्वा दृष्ट्वा देवं मनीषिणम् ॥५६

गया तीर्थ में किया हुआ श्राद्ध जिस प्रकार से नित्य ही पितृगण को परम प्रसन्नता देना है उसी प्रकार का श्राद्ध इस फल की वन नामक तीर्थ में समाश्रित होकर पुरुषों को करना चाहिए ॥५०॥ मन से जो इस अत्युत्तम फल की वन का स्मरण किया करता है उसके भी पितर तृप्ति को प्राप्त हो जायेंगे—इसमें कुछ भी संशय नहीं है ॥५१॥ वहाँ पर भी सुमहान् तीर्थ है जो समस्त देवों के द्वारा अलंकृत है । उसमें स्नान करने वाला पुरुष सहस्र गौओं के दान करने का पुण्य-फल प्राप्त किया करता है ॥५२॥ पाणिखात में मनुष्य स्नान करके पितरों का तर्पण करता है वह राजसूय यज्ञ का फल पा जाता है तथा साँख्य और योग शास्त्र का ज्ञाता हो जाया करता है ॥५३॥ इसके अनन्तर सुमहान् एवं उत्तम मिश्रण तीर्थ को जाना चाहिए । वहाँ पर महात्मा मुनि ने तीर्थों को मिश्रित कर दिया है ॥५४॥ हे मुनियों में शार्दूल ! भगवान् महात्मा व्यास देव ने दधीच के लिये ही ऐसा मिश्रण किया था । जो मनुष्य मिश्रक तीर्थ में स्नान करता है वह सभी तीर्थों में स्नान कर लिया करता है क्योंकि यहाँ पर तो सभी तीर्थों का मिश्रण विद्यमान है ॥५५॥ इसके बाद फिर व्यास वन नामक तीर्थ को जावे तथा नियत एवं नियत अशन वाला होकर ही जाना चाहिए । मनोजव में जाकर जो स्नान

करता है और मनीषिगण देव का दर्शन करता है उसका महान् पुण्य होता है ॥५६॥

मनसा चिन्तितं सर्वं सिद्ध्यते नात्र संशयः ।
गत्वा मधुवनं चैव देव्यास्तीर्थं नरः शुचिः ॥५७
तत्र स्नात्वा च वै देवान्पितृंश्च प्रयता नरः ।
स देव्या समनुज्ञातो यथा सिद्धिं लभेन्नर ॥५८
कौशिक्याः सगमे यस्तु दृषद्वत्यां नरोत्तमः ।
स्नायीत नियताहारः सर्वपापैः प्रमुच्यते ॥५९
ततो व्यासस्थलीं गच्छेद्यत्र व्यासेन धीमता ।
पुत्रशोकाभि भूतेन देहत्यागाय निश्चयः ॥६०
कृतो देवैश्च विप्रेन्द्र पुनरुत्थापितस्तदा ।
अभिगम्य स्थलीं तस्य पुत्रशोकं न विन्दति ॥६१
किंदत्तरूपमासाद्य तिलद्यस्थ प्रदाय च ।
गच्छेच्च परमां सिद्धिं ततो मुक्तिमवाप्नुयात् ॥६२
अन्नं च सुदिनं चैव द्वे तीर्थे भुवि दुर्लभे ।
तयोः स्नात्वा विशुद्धात्मा सूर्यलोकमवाप्नुयात् ॥६३

यस्मिन्प्रविष्टमात्रस्तु मुक्तो भेतति किल्बिषैः ।
समाश्रित्य वन पुण्यं सविता प्रकटः स्थितः ॥३१
पूषानाम द्विजश्रेष्ठा दर्शनान्मुक्तिमाप्नुयात् ।
आदित्यस्य दिने प्राप्ते तस्मिन्स्नातस्तु मानवः ।
विशुद्धमानसोऽभ्येति मनसा चिन्तितं फलम् ॥३२

वह मनुष्य सब कलुषों से मुक्त होता हुआ परम पद को चला जाया करता है। अन्य मास में भी जब षष्ठी तिथि मङ्गलवार से युक्त होवे वहाँ पन भी कृत्य किये जाने पर मुक्ति के फल देने वाली हुआ करती हैं। हे द्विजोत्तमो ! इस तीर्थ में स्नान करने वाला पुरुष समस्त तीर्थों में स्नान कर लेने वाला हो जाया करता है ॥२८-२९॥ जिसमें प्रवेश प्राप्त करने मात्र से ही किल्विषों से मुक्त हो जाया करता है। इस पुण्य वन में समाश्रय करके सविता प्रकट रूप से संस्थित रहा करते हैं। समस्त देवों से अनुज्ञात होकर मनुष्य स्नान करने से परम पद की प्राप्ति करता है। काम्यक वन परम पुण्यमय है और सब पातकों का नाश करने वाला है ॥३०-३१॥ पूषा नामक तीर्थ है। हे द्विजगण ! उसके दर्शन से ही मुक्ति प्राप्त होती है। आदित्य के दिन प्राप्त होने पर उसमें मानव स्नान करके विशुद्ध मन वाला हो जाता है और फिर मन से चिन्तन किया हुआ फल भी प्राप्त कर लेता है ॥३२॥

———

४२—दुर्गा तीर्थं तथा स्थाणुवट माहात्म्य

काम्य कस्य तु पूर्वेण कुञ्जं देवैर्निषेवितम् ।
तस्य तीर्थस्य संभूतिं विस्तरेण ब्रवीतु नः ॥१
शृण्वन्तु मुनयः सर्वे तीर्थमाहत्म्यमुत्तमम् ।
ऋषीणां चरितं श्रुत्वा मुक्तो भवति किल्बषैः ॥२
नैमिषेयाश्च ऋषयः कुरुक्षेत्रं समागताः ।
सरस्वत्यां च स्नानार्थं प्रवेशं न लेभिरे ॥३
ततस्तु कल्पयामासुस्तीर्थं यज्ञोपवीतिनम् ।
शेषास्तु मुनयस्तत्र न प्रवेशं हि लेभिरे ॥४
रन्तुकस्याश्रमाद्यावत्तीर्थं च चक्रकम् ।
ब्राह्मणैः परिपूर्णं तु दृष्टा देवी सरस्वती ॥५
हिताथ सर्वविप्राणां कृत्वा कुण्डानि सा नदी ।
प्रयाता पश्चिमं मार्गं सर्वभूतहिते स्थिता ॥६
पूर्वप्रवाहे यः स्नाति गङ्गास्नानफलं लभेत् ।
प्रवाहे दक्षिणे तस्या नर्म्मदा सरितां वरा ॥७

ऋषिवृन्द ने कहा—काम्यक वन के पूर्व में कुञ्ज है जो-देवगण के द्वारा निषेवित है । हे भगवन् ! उस तीर्थ का उद्भव कैसे हुआ था—यह विस्तार के साथ हमको बतलाने की कृपा करें ॥१॥ महर्षि लोमहर्षण ने कहा—हे मुनिगण ! आप सब लोग उस उत्तम तीर्थ के माहात्म्य का श्रवण करो । ऋषियों के चरितों का श्रवण करके ही मनुष्य पापों से छुटकारा पाजाया करता है ॥२॥ नैमिष क्षेत्र में निवास करने वाले ऋषिगण कुरुक्षेत्र में एकबार समागत हुए थे । उन्होंने सरस्वती में स्नान करने के लिये प्रवेश नहीं प्राप्त किया था ॥३॥ इसके उपरान्त एक यज्ञोपवीती नामक तीर्थ की कल्पना उन्होंने की थी । शेष मुनिगण उसमें प्रवेश नहीं पा सके थे ॥४॥ रन्तुक के आश्रम तक वहाँ पर्यन्त चक्रक तीर्थ था जो ब्राह्मणों से एकदम परिपूर्ण था—ऐसा उस सरस्वती देवी ने देखा था ॥५॥ उस नदी ने सभी विप्रों के हित के लिये

कुण्डों की रचना की थी और समस्त प्राणियों के हित में स्थित होकर वह पश्चिम मार्ग को चली गयी थी ॥६॥ पूर्व प्रवाह में जो भी कोई वहाँ स्नान करता है वह गंगा के स्नान करने का फल प्राप्त किया करता है उसके दक्षिण दिशा वाले प्रवाह में सरिताओं में परमश्रेष्ठ नर्मदा स्थित रहा करती है ॥७॥

पश्चिमे तु दिशाभागे यमुना चाश्रिता नदी ।
यदा ह्युत्तरतो याति सिन्धुर्भवति सा नदी ॥८
एवं दिशाप्रवाहेण ह्यतिपुण्या सरस्वती ।
तस्यां स्नातः सर्वतीर्थे स्नातो भवति मानवः ॥९
ततो गच्छेद्द्विजश्रेष्ठा मदनस्य महात्मनः ।
तीर्थं त्रैलोक्यविख्यातं विहारं नाम नामतः ॥१०
यत्र देवाः समागम्य शिवदर्शनकाङ्क्षिणः ।
समागता न चापश्यन्देवं देव्या समन्वितम् ॥११
तेऽस्तुवन्त महादेव नन्दिनं गणनायकम् ।
ततः प्रसन्नो नन्दीशः कथयामास चेष्टितम् ॥१२
भवस्य उमया सर्वविहारे क्रीडितं महत् ।
तच्छ्रुत्वा देवताः सर्वाः पत्नीमाहूय ते गताः ॥१३
तेषां क्रीडाविनोदेन तुष्टः प्रोवाच शंकरः ।
योऽस्मिस्तीर्थे नरः स्नाति विहारे श्रद्धयाऽन्वितः ॥१४

पश्चिम दिशा के भाग में यमुना नदी समाश्रित होकर रहती हैं। जब वह उत्तर की ओर जाती है तो सिन्धु नदी वह हो जाया करती है ॥८॥ इस प्रकार से दिशाओं के प्रवाह के द्वारा वह अत्यन्त पुण्य वाली नदी होती रहा करती है। उसमें यदि किसी मनुष्य ने स्नान कर लिया तो समझ लेना चाहिए कि सभी तीर्थों में स्नान मनुष्य ने कर लिया है ॥९॥ इसके पश्चात् हे द्विजवृन्द ! महात्मा मदन के तीर्थ पर जाना चाहिए जो त्रैयोक्य में परम प्रसिद्ध है और नाम से उसको विहार कहा जाता है ॥१०॥ जहाँ पर देवगण आकर भगवान् शिव के दर्शन करने की आकाङ्क्षा वाले होते हैं। वे वहां पर समागत तो हुए

थे किन्तु उन्होंने देवी जगदम्बा से युक्त देवेश्वर का दर्शन नहीं प्राप्त किया था ॥११॥ उन समस्त ऋषियों ने नन्दीगण नामक महादेव की स्तुति की थी। इसके पश्चात् नन्दीश्वर ने प्रसन्न होकर जो चेष्टित था उसे कह दिया था ॥१२॥ सर्व विहार में महादेव का उमा के साथ महान् क्रीड़ित है। यह श्रवण करके सब देवगण पत्नी को बुलाकर वे गत हो गये थे ॥१३॥ उनके क्रीड़ा के विनोद से परम तुष्ट हुए भगवान् शंकर उनसे बोले। जो भी कोई नर इस तीर्थ में श्रद्धा भाव से संयुत होकर विहार में स्नान करता है वह सर्व सुख सम्पन्न हो जाता है ॥१४॥

धनधान्यप्रियैर्युक्तो जायते नात्र संशयः।
दुर्गातीर्थं ततो गच्छेद्दुर्गया सेवितं महत् ॥१५
यत्र स्नात्वा पितॄन्पूज्य न दुर्गतिमवाप्नुयात्।
तत्रापि च सरस्वत्याः कूलं त्रैलोक्यविश्रुतम् ॥१६
दर्शनान्मुक्तिमाप्नोति सर्वपातकवर्जितः।
यस्तत्र तर्पयेद्देवान्पितॄंश्च श्रद्धया नरः ॥१७
अक्षय्यं लभते सर्वं पितृतीर्थं विशिष्यते।
मातृहा पितृहा यश्च ब्रह्महा गुरुतल्पगः ॥१८
स्नात्वा शुद्धिमवाप्नोति यत्र प्राची सरस्वती।
देवमार्गं प्रतिष्ठाय देवमार्गेण निःसृता ॥१९
प्राची सरस्वती पुण्या अपि दुष्कृतकर्मणाम्।
त्रिरात्रं करिष्यन्ति प्राचीं प्राप्य सरस्वतीम् ॥२०
तेषां न दुष्कृतं किंचिद्देहमाश्रित्य तिष्ठति।
नरनारायणौ देवौ ब्रह्मा स्थाणुस्तथाऋषिः ॥२१

विहार में स्नान से धन-धान्यादि प्रिय पदार्थों से समन्वित अवश्य ही होता है—इसमें कुछ भी संशय नहीं है। इसके उपरान्त दुर्गा तीर्थ में जाना चाहिए जो भगवती दुर्गा के द्वारा सेवित एवं महान् तीर्थ है ॥१५॥ उस तीर्थ में स्नान करके पितृगण की अर्चा करे तो मनुष्य कभी भी दुर्गति को प्राप्त नहीं होता है। वहाँ पर भी

सरस्वती का त्रिभुवन प्रख्यात कूल विद्यमान है ।।१६।। उसके दर्शन से ही सब पापों से छूटकर मुक्ति की प्राप्ति मनुष्य कर लेता है। जो वहाँ पर देवगण तथा पितरों का तर्पण श्रद्धा से मनुष्य किया करता है ।।१७।। वह सब अक्षय का लाभ करता है और पितृ तीर्थ में विशेषता को प्राप्त होता है। चाहे कोई माता का हनन कर्त्ता हो या पिता का हन्ता तथा ब्राह्मण का वध करने वाला एवं गुरुतल्प गामी कैसा भी महान् पातकी क्यों न हो इसमें स्नान करने से ही शुद्धि को प्राप्त कर लेता है जहां पर प्राची (पूर्व की दिशा वाली) सरस्वती हैं वह देव मार्ग को प्रतिष्ठित करके देव मार्ग से ही निकली है ।।१८-१९।। प्राची सरस्वती परम पुण्यमयी है जोकि दुष्कृत कर्म्म करने वाले हैं उनको भी शुद्ध कर देने वाली है। तीन रात्रि तक प्राची सरस्वती के समीप में जाकर जो स्नान किया करते हैं ।।२०।। उनको कोई भी दुष्कृत (पातक) देह में आश्रय पाकर कभी नहीं ठहरा करता है। नर-नारायण दोनों देवता, ब्रह्मा तथा स्थाणु उसका सेवन किया करते हैं ।।२१।।

प्राचीं दिश निषेवन्तः सदाः सवासवाः ।
ये तु श्राद्धं करिष्यन्ति प्राचीमाश्रित्य मानवाः ।।२२
तेषां न दुर्लभ किंचिदिह लोके परत्र च
तस्मात्प्राची सदा सेव्या पञ्चम्यां च विशेषतः ।।२३
पञ्चम्यां सेवमानस्तु लक्ष्मीवांश्च भवेन्नरः ।
तीर्थं मौशनसं तत्रत्रैलोक्यस्यापि दुर्लभम् ।।२४
उशना यक्ष संसिद्ध आराध्य परमेश्वरम् ।
ग्रहमध्येषूच्यते स तस्य तीर्थस्यसेवनात् ।।१५
एवं शुक्रेण मुनिना सेवितं तीर्थमुत्तमम् ।
ये सेवन्त श्रद्दधानास्ते यान्ति परमां गतिम् ।।२६
यस्तु श्राद्धं नरो भक्त्या तस्मि तीर्थे करिष्यति ।
पितरस्तारितास्तेन भविष्यन्ति न संशयः ।।२७
चतुर्मुखं ब्रह्मतीर्थे यत्र मर्यादया स्थितम् ।
ये सेवन्ते चतुर्दश्यां सोपवासा वसन्ति च ।।२८

अष्टम्यां कृष्णपक्षस्य चैत्रे मासि द्विजोत्तमाः ।
ते पश्यन्ति परं सूक्ष्मं यस्मान्नावर्त्तते पुनः ।।२९
स्थाणुतीर्थं ततो गच्छेत्सहस्रलिङ्गशोभितम् ।
तत्र स्थाणुवटं दृष्ट्वा मुक्तो भवति किल्बषैः ।।३०

सर्वदा इन्द्र के सहित समस्त देवगण प्राची का आश्रय करके श्राद्ध करते हैं ।।२२।। उन मनुष्यों को इस लोक में और परलोक में भी कुछ दुर्लभ नहीं रहता है । इसलिये प्राची का सदा सेवन करना ही चाहिए तथा पञ्चमी तिथि में खास तौर से उसका सेवन करे ।।२३।। जो पञ्चमी तिथि में उसका सेवन करता है वह नर विशेष रूप से लक्ष्मीमान् होता है । वहाँ पर एक औशनस नाम वाला तीर्थ भी है जो तीनों लोकों में भी अत्यन्त दुर्लभ है ।।२४।। जहाँ पर परमेश्वर की समाराधना करके उशना संसिद्ध हो गया था । उस तीर्थ के सेवन करने से वह ग्रहों के मध्य में कहा जाता है अर्थात् स्थिति प्राप्त किया करता है ।।२५।। इस प्रकार से मुनीन्द्र शुक्र ने उस उत्तम तीर्थ का सेवन किया था । जो भी पुरुष सर्वाधिक श्रद्धा से उसका सेवन करते हैं वे परम गति को प्राप्त करते हैं ।।२६।। जो मनुष्य उस तीर्थ में भक्ति भाव से श्राद्ध किया करता है वह अपने पितरों को तार देता है—इसमें संशय नहीं है ।।२७।। जहां पर चतुर्मुख ब्रह्म तीर्थ मर्यादा से संस्थित है । जो पुरुष उपवास करते हुए चतुर्दशी तिथि में उसका सेवन किया करते हैं और वहाँ वास करते हैं । तथा चैत्रमास के कृष्ण पक्ष की अष्टमी तिथि में हे द्विजगण ! उसका सेवन करते हैं वे परम सूक्ष्म का दर्शन प्राप्त किया करते हैं जहाँ से फिर इस संसार में पुनरावर्तन ही नहीं होता है अर्थात् जन्म ग्रहण नहीं करता है ।।२८-२९।। इसके उपरान्त स्थाणु तीर्थ को जाने जो एक सहस्र लिगों से शोभित है । वहाँ पर स्थाणु वट है जिसका दर्शन करके किल्विषों से मानव मुक्त हो जाता है ।।३०।।

———

४३—सृष्टि वर्णन तथा धर्मनिरूपण

स्थाणुतीर्थस्य माहात्म्यं वटस्यापि महामुने ।
सन्निहत्याः पुरोत्पत्ति पूरणं पांशुना ततः ।।१
लिङ्गानां दर्शनात्पुण्यं स्पर्शनेन च किं फलम् ।
तथैव सरमाहात्म्यं ब्रूहि सर्वमशेषतः ।।२

शृण्वन्तु देवताः सर्वाः पुराणं वामनं महत् ।
यच्छ्रुत्वा मुक्तिमाप्नोति प्रसादाद्वामनस्य तु ।।३
सनत्कुमारमासीनं स्थाणोर्वटसमीपतः ।
ऋषिभिर्वालखिल्याद्यैर्ब्रह्मपुत्रैर्महात्मभिः ।।४
मार्कण्डेयो मुनिस्तत्र विनयेनाभिगम्य च ।
पप्रच्छ रसामाहात्म्यं प्रमाणं च स्थितं तथा ।।५
ब्रह्मपुत्र सहाभाग सर्वशास्त्र विशारद ।
ब्रूहि मे सरमाहात्म्यं सर्वपापभयापहम् ।।६
कानि तीर्थानि दृश्यानि गुह्यानि द्विजसत्तम ।
लिङ्गानि कति पुण्यानि स्थाणोर्यानि समीपतः ।।७

ऋषिगण ने कहा—हे महामुने ! आप स्थाणु तीर्थ का माहात्म्य तथा स्थाणु वट का माहात्म्य और संन्निहति की पहिले उत्पत्ति और फिर पांशु से उसका पूरण एवं लिंगों के दर्शन से पुण्य और उसका क्या फल होता है यह तथा सर का माहात्म्य यह सभी कुछ पूर्णरूप से हमारे सामने बतलाने की कृपा कीजिए ।।१-२।। महर्षि लोम हर्षण ने कहा—हे समस्त देवगण ! आप सब श्रवण करिये, यह वामन पुराण सबसे महान् है । वामन भगवान् के प्रसाद से इसका श्रवण करके मनुष्य मुक्ति की प्राप्ति किया करता है ।।३।। स्थाणु वट के समीप में ही भगवान् सनत्कुमार समासीन हैं और उनके साथ में वालखिल्य प्रभृति ऋषिगण और महात्मा ब्रह्मा के पुत्रादि भी संस्थित हैं ।।४।। वहाँ पर मार्कण्डेय मुनि विनय पूर्वक आये थे और उन्होंने उपस्थित होकर सर का माहात्म्य तथा स्थित प्रमाण के विषय में पूछा था ।।५।। मार्कण्डेय मुनि ने कहा—

हे ब्रह्मपुत्र ! आप तो महान् भाग्यशाली हैं तथा समस्त शास्त्रों के महान् मनीषी हैं । आप मुझे सर का माहात्म्य बतलाइये जोकि समस्त पापों के भय को भगा देने वाला है ॥६॥ हे द्विजसत्तम ! कौन से तीर्थ तो दृश्य हैं और कौन से गुप्त हैं ? जो स्थाणु के समीप में हैं उनमें कितने लिंग पुण्यमय हैं ? ॥७॥

येषां दर्शनमात्रेण मुक्ति प्राप्नोति मानवः ।
वटस्य दर्शन पुण्यमुत्पत्ति कथयस्व मे ॥८
प्रदक्षिणायां यत्पुण्यं तीर्थस्नानेन यत्फलम् ।
गुह्येषु देवदृष्टेषु यत्पुण्यमभिजायते ॥६
देवदेवो यथा स्थाणुः सरमध्ये व्यवस्थितः ।
किमर्थं पांशुना शक्रस्तीर्थं पूरितवान्पुनः ॥१०
स्थाणुतीर्थस्य माहात्म्यं चक्रतीर्थस्य यत्फलम् ।
सूर्यतीर्थस्य माहात्म्यं सोमतीर्थस्य ब्रूहि मे ॥११
शकरस्य च गुप्तानि विष्णोः स्थानानि यानि च ।
कथयस्व महाभाग सरस्वत्याः सविस्तरम् ॥१२
त्वं देही चापि देवस्य माहात्म्य वेत्सिः त्तवतः ।
विरञ्चस्य प्रसादेन विदितं सर्वमेव च ॥१३

जिन लिंगों के केवल दर्शन ही से मनुष्य मुक्ति की प्राप्ति कर लिया करता है । उस वट के पुण्य दर्शन का फल और उसकी उत्पत्ति कैसे हुई थी, यह भी आप कहिए ॥८॥ परिक्रमा करने में जो पुण्य होता है और तीर्थ के स्नान करने से जो पुण्य-फल होता है तथा गुह्य देवों के दर्शन करने पर जो पुण्य उत्पन्न होता है—यह भी आप बतलाने की कृपा करें ॥६॥ जिस तरह देवों के भी देव स्थाणु उनके मध्य में विराजमान होकर स्थित हुए हैं, यह और किस लिये इन्द्र देव ने पुनः पांशु (धूलि) से उस तीर्थ को पूरित कर दिया था ? ॥१०॥ स्थाणु तीर्थ का माहात्म्य और चक्र तीर्थ का जो फल होता है तथा सूर्य तीर्थ और सोम तीर्थ का जो माहात्म्य है, वह सभी मेरे समक्ष में आप बतलाइये ॥११॥ भगवान् शंकर तथा भगवान् विष्णु के जो भी कुछ गुप्त स्थान हैं ।

हे महाभाग ! सरस्वती के जो हैं वे सब विस्तार के सहित कहिए ।१२। आप देहधारी है तो भी देव के माहात्म्य को तात्त्विक रूप से भली-भाँति जानते हैं तथा भगवान् विरञ्चि के प्रसाद से सभी कुछ आपको विदित भी है ।१३।

मार्कण्डेयवचः श्रुत्वा ब्रह्मात्मा स महामुनिः ।
अतिभक्त्या तु तीर्थस्य प्रवणीकृतमानसः ।।१४
पर्यङ्कं शिथिलीकृत्य नमस्कृत्य महेश्वरम् ।
कथयामास तत्सर्वं यच्छ्रुतं ब्रह्मणः पुरा ।।१५
नमस्कृत्य महादेवमीशान वरदं शुभम् ।
उत्पत्तिं च प्रवक्ष्यामि तीर्थानां ब्रह्मभाषिताम् ।।१६
पूर्वमेकार्णवे घोरे नष्टे स्थावरजङ्गमे ।
बृहदण्डमभूदेकं प्रजानां बीजसंभवम् ।।१७
तस्मिन्नण्डे स्थितो ब्रह्मा शयनायोपचक्रमे ।
सहस्रयुगपर्यन्तं सुप्त्वा स प्रत्यबुध्यत ।।१८
सत्त्वोद्रिक्तस्तथा ब्रह्मा शून्यं लोकमपश्यत ।
सृष्टिं चिन्तयतस्तस्य रजसा मोहितस्य च ।।१९
रजः सृष्टिगुणं प्रोक्तं सत्त्व स्थितिगुणं विदुः ।
उपसंहारकाले च प्रवर्त्तेत तमोगुणः ।।२०
गुणातीतः स भगवान्व्यापकः पुरुषः स्मृतः ।
तेनेदं सकलं व्याप्तं यत्किंचिज्जीव संज्ञितम् ।।२१

लोमहर्षण मुनीन्द्र ने कहा--इस प्रकार के महर्षि मार्कण्डेय के वचन को सुनकर ब्राह्मात्मा वह महामुनि ने तीर्थ की अत्यन्त भक्ति से अपने मन को अत्यन्त प्रवण करते हुए अर्थात् विनम्र बना लिया था ।१४। पर्यंक को शिथिल करके तथा महेश्वर को नमस्कार करके वह सभी कुछ कहना आरम्भ कर दिया था जो पहिले ब्रह्माजी से उन्होंने सुना था ।१५। सनत्कुमारजी ने कहा—वरदान प्रदान करने वाले परम शुभ स्वरूप ईशान महादेव को प्रणाम करके तीर्थों की उत्पत्ति जो भी ब्रह्माजी ने कही थी मैं आपको बतलाता हूँ ।१६। पहिले समय में जब

कि यह सम्पूर्ण विश्व चराचर नष्ट हो गया था और केवल समुद्र ही एक मात्र दिखलाई देता था एवं महान् घोर स्वरूप होकर स्थित था उस समय में एक वृहत् अण्ड हुआ था जो प्रजाओं के वीजोत्पादक रूप वाला था ।१७। उसी अण्ड में ब्रह्मा स्थित थे जो शयन के लिये उपक्रम कर रहे थे । एक सहस्र (सतयुग, त्रेता, द्वापर, कलियुग) इन चारों युगों की चौकड़ी समाप्त होने के समय तक उन्होंने शयन किया था । इसके पश्चात् वे जागे थे ।१८। ब्रह्माजी उस समय में केवल सत्त्व से उद्रिक्त थे और उन्होंने लोक को एकदम शून्य मय देखा था । उस समय में उन्होंने सृष्टि करने के विषय में कुछ चिन्तन किया तो वे रजोगुण से मोहित हो गये थे ।१९। रजोगुण को सृष्टि का गुण बताया गया है और सत्त्व गुण स्थिति का होता है जिस समय में उपसंहार होता है तमोगुण प्रवृत्त हुआ करता है ।२०। वह भगवान् तो गुणों से भी परे हैं और उन्हें व्यापक पुरुष कहा गया है । उसी के द्वारा यह सम्पूर्ण व्याप्त है जो कुछ भी जीव संज्ञा से युक्त है ।२१।

स ब्रह्मा स च गोविन्द ईश्वरः स सनातनः ।
यस्त वेद महात्मानं स सर्वं वेद निश्चितम् ।२२
गुणातीतः स पुरुषः परमात्मा सनातनः ।
यस्तं वेद महात्मानं स सर्वं वेद मोक्षवित् ॥२३
किं तेषां सकलैस्तीर्थैराश्रमैर्वा प्रयोजनम् ।
येषां चानन्तकं चित्तमात्मन्येव व्यवस्थितम् ॥२४

आत्मा नदी संयमपुण्यतीर्था सत्योदका शीलशमादियुक्ता ।
तस्यांस्नातःपुण्यकर्मापुनाति न वारिणाशुद्धयति चान्तरात्मा ॥२५
एतत्प्रधानं पुरुषस्य कर्म यदात्मसंबोधसुखे प्रविष्टम् ।
ज्ञेयं तदेव प्रवन्दति सन्तस्तत्प्राप्य देही विजहाति कामान् ॥२६

नैतादृशं ब्राह्मणस्यास्ति वित्तं यथैकता समता सत्यता च ।
शीलं स्थितिं दण्डविधानमार्जवंततस्ततश्चोपरमःक्रियासुः ॥२७
अपि ब्रह्म समासेन यदुक्तं ते द्विजोत्तम ।
यज्ज्ञात्वा ब्रह्म परमं प्राप्स्यसि त्वं न संशयः ॥२८

वह ब्रह्मा है और वही गोविन्द हैं तथा सनातन ईश्वर भी वही हैं। जो उस महान् आत्मा वाले को जानता है वह सभी कुछ निश्चित रूप से जानता है।२२। वह पुरुष सत्त्वादि गुणों से भी परे है और सनातन (सर्वदा से चले आने वाला) परमात्मा है। जो उन महान् आत्मा वाले प्रभु का ज्ञान रखता है वह मोक्ष का वेत्ता सभी कुछ का ज्ञान रखता है।२३। उसको इन समस्त तीर्थों तथा आश्रमों से क्या प्रयोजन है अर्थात् इनकी उसके लिये कुछ भी आवश्यकता नहीं है जिनका अनन्तक चित्त आत्मा में ही व्यवस्थित है।२४। यह आत्मा एक नदी के तुल्य है जो संयम स्वरूप पुण्य से तीर्थों वाली है। सत्य ही इसमें उदक है और शील तथा शम आदि से यह समन्वित है। उस नदी में स्नान करने वाला महान् पुण्य कर्मों वाला होता है तथा पवित्र हो जाता है। जल से यह अन्तरात्मा कभी भी शुद्ध नहीं होता है।२५। पुरुष का यही एक परम प्रधान कर्म है कि वह आत्मा के सबोध स्वरूप वाले सुख में प्रविष्ट हो जावे। सन्त पुरुष उसी को ज्ञेय अर्थात् जानने के योग्य कहा करते हैं। उसको प्राप्त करके यह देहधारी समस्त कामों का त्याग कर दिया करता है।२६। एक ब्राह्मण के पास इस प्रकार का अन्य कोई भी धन नहीं है जो कि उसके पास एकता-समता-सत्यता विद्यमान हैं। तात्पर्य यह है कि समता-सत्यता ही ब्राह्मण का सर्वोपरि प्रधान एवं उत्तम धन होता है इससे अन्य उत्तम धन कुछ भी नहीं है। शील-स्थिति दण्ड विधान-आर्जव (सरल सीधापेन) और फिर शनैः शनैः सब क्रियाओं में उपराम वृत्ति का होजाना। यह एक ब्राह्मण का कर्त्तव्य है।२७। हे द्विजोत्तम ! आपको मैंने संक्षेप में जो ब्रह्म का स्वरूप भी बतला दिया है। इसका ज्ञान प्राप्त करके आप निश्चय ही परम ब्रह्म को प्राप्त हो जायँगे, इसमें कुछ भी संशय नहीं है।२८।

इदानीं शृणु चोत्पत्तिं ब्रह्मणः परमात्मनः।
इमं चोदाहरंस्तत्र श्लोकं नारायणं प्रति ॥२९
आपो नारा इति प्रोक्ता आपो वै नरसूनवः।
तासु शेते सः यस्माच्च तेन नारायणः स्मृतः ॥३०

विशुद्धसलिले तस्मिन्विज्ञायान्तर्गतं जगत् ।
अण्डं विभज्य भगवांस्तस्मादोमित्यजायत ॥३१
ततो भूरभवत्तस्माद्भुव इत्यक्षरः स्मृतः ।
स्वः शब्दश्च तृतीयोऽभूभुर्वः स्वेति संज्ञिताः ॥३२
तस्यां तेजः समभवत्तत्सवितुर्वरेण्यं यत् ।
उदकं शोषयामास यत्तेजोऽणुविनिःसृतम् ॥३३
तेजसा शोषितं शेषं कललत्वमुपागतम् ।
कललाद्बुद्बुदं ज्ञेयं ततः काठिन्यतां गतम् ॥३४
काठिन्याद्धरिणी ज्ञेया भूतानां धारिणी हि सा ।
यस्मिन्स्थाने स्थितं ह्यण्डं तस्मिन्सन्निहितं सरः ॥३५

अब आप परमात्मा ब्रह्मा की उत्पत्ति का श्रवण करो। नारायण प्रति वहां पर यह एक श्लोक का उदाहरण दिया था।२६। जलों को ही नारा कहते हैं और ये आप (जल) ही नरसूनु हैं। उन जलों में जो शयन किया करता है वह इसीलिये 'नारायण'—इस नाम से कहा गया है अर्थात् नार ही जिसका अयन है वही नारायण है।३०। उस विशुद्ध जल में अन्तर्गत जगत् को जानकर भगवान् ने अण्ड को विभक्त कर दिया और फिर उससे "ओम्"—यह उत्पन्न हुआ था।३१। फिर उससे 'भू' हुआ—दूसरा 'भुव' हुआ और तृतीय शब्द 'स्व' यह हुआ था। इस तरह भूः भुवः स्वः संज्ञा वाले तीन शब्द हुए थे।३२। उसमें जो 'सवितुर्वरेण्यं' तेज था वह हुआ था अर्थात् सविता का वरेण्य तेज हुआ था। जो अणु से विनिःसृत तेज था उसने उदक का शोषण कर दिया था।३३। तेज के द्वारा शोषण को प्राप्त हो गया था। कललता से बुद्बुदता को प्राप्त होकर फिर कठिनत्व अवस्था में होगया था।४३। उस काठिन्य की दशा से धरणी समझनी चाहिए जो कि वह समस्त प्राणियों के धारण कदने वाली है। जिस स्थान में अण्ड स्थित था उसमें सर सन्निहित था।३५।

यदाद्यं निःसृतं तेजस्तस्मादित्य उच्यते ।
अण्ड मध्ये समुत्पन्नो ब्रह्मा लोकपितामहः ॥३६

तस्योल्बं मेरुरज्जरायुः पर्वताः स्मृताः ।
गर्भोदक समुद्राश्च तथा नद्यः सहस्रशः ।।३७

नाभिस्थानाद्यदुदकं ब्रह्मणो निर्मलं महत् ।
महत्सरस्तेन पूर्णं विमलेन वराम्भसा ।।३८
तस्मिन्मध्ये स्थाणु रूपी वटवृक्षो महामनाः ।
तस्माद्विनिर्गता वर्णा ब्राह्मणाः क्षत्रिया विशः ।।३९

शूद्राश्च तस्मादुत्पन्नाः शुश्रूषार्थं द्विजन्मनाम् ।
ततश्चिन्तयतः सृष्टिं ब्रह्मणोऽव्यक्तजन्मनः ।।४०
वालखिल्याः समुत्पन्ना मानसाः शुद्धिरूपिणः ।
अष्टाशीतिसहस्राणि बभूवुश्चोर्ध्वरेतसः ।।४१

ततः सृष्टिं चिन्तयतो ब्रह्मणोऽव्यक्तजन्मनः ।
मनसो मानसा जाताः सनकाद्या महर्षयः ।।४२

जो आदि में तेज निकला था उससे ही आदित्य कहा गया है। अण्ड के मध्य में लोकों के पितामह ब्रह्मा समुत्पन्न हुए थे ।३६। उसका जो उल्व था वह मेरु गिरि हो गया और जरायु पर्वतश्रेणी कही गई है। गर्भ अर्थात् मध्य में जो जल था वह सब समुद्र हो गये थे और सहस्रों नदियाँ हो गईं थीं ।३७। ब्रह्मा के नाभि के स्थान से जो उदक निकला था वह बहुत अधिक निर्मल था। उस अति विमल श्रेष्ठ जल से वह महान् सर पूर्ण था ।३८। उसके मध्य में महान् मन वाला स्थाणु रूप से युक्त वट का वृक्ष था। उससे ब्राह्मण, क्षत्रिय, वैश्य वर्ण विनिर्गत हुए थे ।३९। इन द्विजन्माओं की शुश्रूषा करने के लिये ही उससे शूद्र समुत्पन्न हुए थे। इसके पश्चात् अव्यक्त जन्मा ब्रह्मा से जो कि सृष्टि की रचना करने के विषय में चिन्तन कर रहे थे शुद्ध रूप वाले वालखिल्य मानस पुत्र उत्पन्न हुए थे। ये अट्ठासी हजार संख्या में थे तथा ऊर्ध्व रेता हुए थे ।४०-४१। फिर भी सृजन का चिन्तन करने वाले अव्यक्त जन्मा ब्रह्माजी के मन से ही मानस पुत्र सनक, सनन्दन, सनातन और सनत्कुमार ये चार महर्षि उत्पन्न हुए थे ।४२।

पुनश्चिन्तयतस्तस्य प्रजाकामस्य धीमतः ।
ऋषयः सप्त चोत्पन्नास्ते प्रजापतयोऽभवन् ।।४३
पुनश्चिन्तयतस्तस्य रजसा मोहितस्य च ।
वालखिल्याः समुत्पन्नास्तपःस्वाध्यायतत्पराः ।।४४
ते सदा स्नाननिरता देवार्चनपरायणाः ।
उपवासैर्व्रतैस्तीव्रैः शोषयन्ति कलेवरम् ।।४५
दिव्यं वर्षसहस्रं ते कृशा धर्मनिसंतताः ।
आराधयन्ति देवेशं न च तुष्यति शंकरः ।।४६
ततः कालेन महता उमया सह शंकरः ।
आकाशमार्गेण तदा दृष्ट्वा देवी सुदुःखिता ।।४७
प्रसाद्य देवदेवेशं शंकर प्राह सुव्रता ।
क्लिश्यन्ति ते मुनिगणा देवदारुवनाश्रयाः ।।४८
तेषां क्लेशक्षयं देव विधेहि कुरु मे दयाम् ।
किं देव धर्मनिष्ठानामनन्तं देव दुष्कृतम् ।।४९

इसके भी अन्तर फिर प्रजा की कामना रखने वाले धीमान् ब्रह्मा जी सृजन का चिन्तन कर रहे थे तो फिर उनसे सात ऋषि समुत्पन्न हुए थे जो कि प्रजापति हुए थे ।४३। फिर भी जब उन्होंने सृष्टि करने का चिन्तन किया तो वे रजोगुण से मोहित हो गये थे और उनके बालखिल्य पैदा हुए थे जो निरन्तर तपश्चर्या करने एवं स्वाध्याय करने में ही परायण रहते थे ।४४। वे सदा स्नान करने में निरत तथा देवों की पूजा करने में तत्पर रहा करते थे । उपवास तीव्र व्रतो से वे अपने कलेवरों का शोषण करते थे ।४५। एक सहस्र दिव्य वर्षों तक वे इस प्रकार से अत्यन्त कृश होते हुए धर्म कार्य में तल्लीन निरन्तर रहे थे और देवेश्वर की आराधना करते रहे किन्तु भगवान् शंकर सन्तुष्ट तथा प्रसन्न नहीं हुए ।४६। इसके पश्चात् जब बहुत-सा समय व्यतीत हो गया तो एक बार जगदम्बा उमा के साथ भगवान् शंकर आकाश मार्ग से जा रहे थे । उस समय में देवी ने उन महर्षियों को घोर तप में लीन देखा था । वह बहुत ही दुःखित हुईं थीं । फिर सुन्दर व्रत वाली जगदम्बा ने

देवेश्वर को प्रसन्न करके भगवान् शंकर से कहा था—वे मुनिगण देवदारु के वन में अपना आश्रय बनाकर रहते है और बहुत अधिक क्लेश पा रहे हैं ॥४८॥ हे देव ! उनके क्लेश का क्षय कर दीजिएगा और मेरे ऊपर दया करो। हे देव ! क्या धर्म में निष्ठा रखने वालों का दुष्कृत अनन्त है ? ॥४९॥

नाद्यपि ये न सिद्ध्यन्ति शुष्कस्नाय्वस्थिशोषिताः ।
तच्छ्रुत्वा वचनं देव्याः पिनाकी पतितान्तकः ।
प्रोवाच प्रहसन्मूर्ध्ना चारुचन्द्रांशुशोभितः ॥५०
न वेत्सि देवि तत्त्वेन धर्मस्य गहनां गतिम् ।
नैते धर्म्मं विजानन्ति न च कामविवर्जिताः ॥५१
न च क्रोधेन निर्मुक्ताः केवलं मूढबुद्धयः ।
एतच्छ्रुत्वाऽब्रवीद्देवी मामेवं सशितव्रतम् ॥५२
देव प्रदर्शयात्मानं परं कौतूहलं हि मे ।
स इत्युक्त उवाचेदं देवदेवः स्मिताननः ॥५३
तिष्ठ त्वमत्र यास्यामि यत्रैते मुनिपुङ्गवाः ।
साधयन्ति तपो घोरं दर्शयिष्यामि चेष्टितम् ॥५४
इत्युक्ता तु ततो देवी शकरेण महात्मना ।
गच्छस्वेत्याह मुदिता भर्त्तारं भुवनेश्वरी ॥५५
यत्र ते मुनयः सर्वे काष्ठलोष्ठसमाः स्थिताः ।
अधीयाना महाभागाः कृताग्निसदनक्रियाः ॥५६

शुष्क स्नायु और अस्थि वाले तथा एकदम शोषित विचारे ये लोग अभी तक सिद्धि प्राप्त नहीं करते हैं। पिनाकी प्रभु ने जिन्होंने अन्तक पतित कर दिया था देवी के इस वचन को सुना और मस्तक पर सुन्दर चन्द्र किरणों के धारण करने से अत्यन्त शोभित होते हुए हँस कर बोले ॥५०॥ श्री महादेव ने कहा—हे देवि ! आप तात्विक रूप से धर्म की अत्यन्त गहन गति को नहीं जानती हैं। ये लोग सब धर्म को नहीं जा ते हैं और न ये लोग काम से रहित ही हैं ॥५१॥ ये लोग क्रोध से भी निर्मुक्त नहीं हैं अर्थात् क्रोध ने इनको अभी तक नहीं छोड़ा है। ये

तो केवल मूढ़ बुद्धि वाले लोग हैं। यह सुनकर देवी ने कहा—हे देव ! मुझे इस प्रकार के संशित व्रत वाले आत्मा को दिखलाइये। मुझे तो इस विषय में हृदय में बड़ा भारी कौतूहल हो रहा है। इस तरह से कहे जाने पर वह देवों के भी देव मुख पर मुस्कराहट दिखाते हुए यह बोले ॥५२-५३॥ हे देवि ! आप यही पर ठहरो, जहाँ पर ये मुनिगण घोर तपस्या का साधन कर रहे हैं मैं जाता हूं और उनका जो चेष्टित है उसे आपको दिखलाऊँगा ॥५४॥ इसके उपरान्त महात्मा शंकर के द्वारा इस प्रकार से कहे जाने पर उस भुवनेश्वरी देवी ने परम प्रसन्न होती हुई भगवान् शंकरजी से जो कि उनके स्वामी थे कहा—आप जाइये ॥५५॥ जहाँ पर ये सब मुनिगण काष्ठ और लोष्ठ के समान स्थित थे और ये सब महाभाग वेदों का उच्चारण कर रहे थे तथा अग्नि सदन की क्रिया कर चुके थे ॥५६॥

तान्विलोक्य ततो देवो नग्नः सर्वाङ्गसुन्दरः।
वनमालाकृतापीडो युवा भिक्षाकपाललभृत् ॥५७
आश्रमे पर्यटन्भिक्षां मुनोनामाश्रमं प्रति।
देहि भिक्षां ततश्चोक्त्वा संभ्रमन्नाश्रमं ययौ ॥५८
तं विलोक्याश्रमगतं योषितो ब्रह्मवादिनाम्।
सकौतुकस्वभावेन तस्य रूपेण मोहिताः ॥५९
प्रोचुः परस्परं नार्य एहि पश्यामि भिक्षुकम्।
परस्परमिति प्रोक्त्वा गृह्य मूलफलं बहुः ॥६०
गृहाण भिक्षामूचुस्तास्तं देवं मुनियोषितः।
स तु भिक्षाकपालं तत्प्रसार्य बहुसादरम् ॥६१
देहि भिक्षां शिवं वोऽस्तु भवतीभ्यस्तपोधनाः।
हसमानस्तु देवेशस्तत्र देव्या निरीक्षितः ॥६२

उन श्रेष्ठ मुनिगणों को देखकर देवेश्वर शंकर जो एकदम नग्न थे और सर्वांगों से परम सुन्दर थे, वनमाला से कृतापीड़, युवावस्था वाले और भिक्षा के ग्रहण करने के लिये कपाल हाथ में धारण करने वाले थे। आश्रम में भिक्षा के लिये घूमते हुए मुनियों के आश्रम की ओर भी

पहुँचे थे। भिक्षा दो, यह कहकर इसके पश्चात् भ्रमण करते हुए आश्रम में चले गये थे ।।५७-५८।। उन ब्रह्मवादियों की स्त्रियां आश्रम में समागत हुए उनको देखकर कौतुक युक्त स्वभाव के कारण उन देवेश्वर के रूप, सौन्दर्य से मोहित हो गईं थीं ।।५९।। वे नारियाँ परस्पर में कह रहीं थीं, आओ–आओ, इस भिक्षुक का दर्शन करें। आपस में ऐसा कहकर बहुत से फल और मूल ग्रहण करके वहाँ उनके समीप में पहुँच गईं थीं ।।६०।। वे मुनियों की स्त्रियां उन देवेश्वर से कहने लगीं –यह हमारी भिक्षा आप ग्रहण कीजिए । उन देव ने उस अपने भिक्षा के कपाल को फैलाकर बहुत ही आदर के साथ कहा––भिक्षा दो, आपका कल्याण होवे, आप से ही तपोधन हैं। इस प्रकार से हँसते हुए उन देवेश को वहाँ पर देवी ने देखा था ।।६१-६२।।

तत्र दत्त्वैव तां भिक्षां पप्रच्छुस्ताः स्मरातुराः ।
कोऽसौ नाम व्रतविधिस्त्वया तापस सेव्यते ।।६३
यत्र नग्नेन लिंगेन वनमालाविभूषितः ।
भवान्वै तापसो हृद्यो ब्रूहि स्म यदि मन्यसे ।।६४

इत्युक्तस्तापसस्ताभिः प्रोवाच हसिताननः ।
इदं मम व्रतंकिंचिन्न रहस्यं प्रकाशते ।।६५
शृण्वन्ति बहवो यत्र तत्र वाऽऽख्या न विद्यते ।
अस्य व्रतस्य सुभगा इति मत्वा गमिष्यथ ।।६६

एवमुक्तास्तदा तेन प्रत्यूचुस्तं तदा मुनिम् ।
ततोऽभ्येहि गमिष्यामो मुने नः कौतुकं महत् ।।६७
इत्युक्त्वा तास्तदा तं वै जगृहुः पाणिपल्लवैः ।
काचित्कण्ठे सकन्दर्पा काचित्कामपरा तथा ।।६८
जानुभ्यामपरा नारी केशेषु ललिताऽपरा ।
अपरा तु कटीरन्ध्रे ह्यपरा पादयोरपि ।।६९

क्षोभं विलोक्य मुनय आश्रमे तु स्वयोषिताम् ।
हन्यतामिति संभाष्य काष्ठपाषाणपाणयः ।।७०

वहाँ पर उस भिक्षा को देकर ही काम से पीड़ित उन मुनि नारियों ने उन देवेश से पूछा था। नारियों ने कहा—यह कौनसी व्रत की विधि है जिसको हे तपस्विन् ! आपने सेवन कर रक्खा है ? ॥६३॥ जिस विधान में आप नग्न लिंग से युक्त और वन माला से भूषित हैं। आपतो तपस्वी परम सुन्दर हैं। यदि आप उचित समझते हैं तो हमको बताइये ॥६४॥ इस प्रकार से उन मुनि नारियों के द्वारा कहे जाने पर मुख पर हास्य धारण करते हुए तापस ने कहा था—यह मेरा कुछ व्रत है जिसमें कुछ भी रहस्य प्रकाशित नहीं होता है ॥६५॥ जिसमें बहुत-से सुनते हैं किन्तु वहाँ कोई आख्या नहीं है। इस व्रत को परम सौभाग्य है—ऐसा मानकर गमन करते हैं ॥६६॥ इस तरह से जब उन मुनि नारियों से कहा जाने पर उस समय में उस मुनि से उन्हों ने कहा था। हे मुने ! आइये हम सब गमन करेंगी, हमको इसका बड़ा कौतुक है ॥६७॥ इतना कहकर उसी समय उन नारियों ने उन देवेश को अपने कर पल्लवों से पकड़ लिया था। उनमें कोई तो काम युक्त हो कण्ठ में लग्न हो गई थी, कोई काम परायण होती हुई जानुओं से लिपट गई, दूसरी केशों में, तीसरी ललिता कटिरन्ध्र में और कोई पैरों में संलग्न हो गई थी ॥६८-६९॥ उस समय में उन मुनियों ने आश्रम में अपनी नारियों के इस प्रकार के क्षोभ को देखकर 'मारो'—ऐसा कहते हुए अपने करों में सबने काष्ठ और पत्थर ग्रहण कर लिये थे ॥७०॥

पातयन्ति स्म देवस्य लिङ्गमुर्ध्वं विभीषणम् ।
पातिते तु ततो लिङ्गे गतोऽन्तर्धानमीश्वरः ॥७१

देव्या जहास भगवान्कैलास नगमाश्रितः ।
पतिते देवदेवस्य लिङ्गपृष्ठे चराचरे ॥७२

क्षोभो बभूव सुमहानृषीणां भावितात्मनाम् ।
एवं विदित्वा ते तत्र वर्त्तते व्याकुलाः स्मृताः ॥७३

उवाचैको मुनिवरस्तत्र बुद्धिमतां वरः ।
न वयं विद्मः सद्भावं तापसस्य महात्मनः ॥७४

विरिञ्चि शरणं यामः स हि ज्ञास्यति चेष्टितम् ।
एवमुक्ताः सर्व एव मुनयः सजितेन्द्रियाः ॥७५
ब्रह्मणः सदनं जग्मुर्देवैः सर्वैर्निषेवितम् ।
प्रणिपत्याथ देवेशं लज्जयाऽधोमुखाः स्थिताः ॥७६
अथ तान्दुःखितान्दृष्ट्वा ब्रह्मा वचनमब्रवीत् ।
अहो मुग्धा यदा यूयं क्रोधेन कलुषीकृताः ॥७७

उस परम भीषण ऊर्ध्व देवके लिंग पर काष्ठ-पाषाणों को गिरा रहे थे । इसके पश्चात् उस लिंग के पातित हो जाने पर ईश्वर अन्तर्धान को प्राप्त हो गये थे ॥७१॥ चराचर में लिंग पृष्ठ के पतित होने पर भगवान् कैलास पर्वत पर समाश्रित हो गये थे और देवी को ह्रास्य हुआ था ।७२। जो भावुक हृदय वाले ऋषिगण थे उनको वढ़ा भारी क्षोभ हुआ था । इस तरह से जानकर वे सब व्याकुल हो गये थे ॥७३॥ उस समय में बुद्धिमानों में परम श्रेष्ठ एक मुनिवर बोला था, उस महान् आभा वाले तपस्वी के सद्भाव को हम नहीं जानते हैं ॥७४॥ अब हम सब विरिञ्चि की शरण में जायेंगे वह निश्चय ही इस चेष्टित को जानते होंगे । इस तरहसे कहकर वे सब मुनिगण भली भाँति अपनी इन्द्रियों का संयम करके ब्रह्मा के सदन में चले गये थे जो कि समस्त देवों के द्वारा निषेवित थे । वहाँ देवेश को प्रणिपात करके सभी लज्जा से नीचे की ओर मुख वाले होकर स्थित हो गये थे ॥७५-७६॥ इसके पश्चात् ब्रह्मा जी ने उन सबको परम दुःखित देखकर यह वचन कहा था —अहो ! जब आप लोग मुग्ध होकर क्रोध से कलुषित हो गये थे, यह बहुत ही अनुचित हुआ था ॥७७॥

न धर्मं च क्रियां कांचिज्जानते मुढबुद्धयः ।
श्रूयतां धर्म सर्वस्वं तापसाः क्रूरकर्मणः ॥७८
विदित्वा यद्बुधः क्षिप्रं धर्मस्य फलमाप्नुयात् ।
योऽसावात्मनि देहेऽस्मिन्विभुर्नित्यो व्यवस्थितः ॥७९
सोऽनादिः स महास्थाणुः पृथक्त्वेव परिसूचितः ।
मणिर्यथोपधानेन धत्ते वर्णोज्ज्वलोऽपि वै ॥८०

तन्मयो भवते तद्वदात्माऽपि मनसा कृतः ।
मनसो भेदमाश्रित्य कर्मभिश्चोपचीयते ।।८१

ततः कर्मवशाद्भुङ्क्ते यद्भोगान्स्वर्गनारकान् ।
तन्मनः शोधयेद्धीमान्ज्ञानयोगमुपक्रमैः ।।८२

तस्मिञ्छुद्धे ह्यन्तरात्मा स्वयमेव निराकुलः ।
न शरीरस्य संक्लेशरपि निर्द्दहनात्मकः ।।८३
शुद्धिमाप्नोति पुरुषः संशुद्धं यस्य नो नमः ।
क्रियानियमनार्थाय पातकेभ्यः प्रकीर्त्तिताः ।।८४

अब सब मूढ़ बुद्धि वाले हैं और किसी भी धर्म तथा क्रिया को नहीं ज़ानते हैं । तपस्वी होकर भी क्रूर कर्म के करने वाले हैं । अब धर्म के सर्वस्व का श्रवण करो ।।७८।। जो बुध्र जन होता है वह जानकर शीघ्र ही धर्म के फल की प्राप्ति क्रिया करता है । जो यह विभु आत्मा में, इस देह में नित्य एवं व्यवस्थित है । वह अनादि है, वह महा स्थाणु है किन्तु पृथकत्व में परिसूचित होता है जिस तरह से उपधान के साथ स्थित मणि उज्वल वर्ण को धारण किया करता है ।।७९-८०।। इसी भाँति आपके लिये यह आत्मा भी मन के ही साथ किया हुआ है । मन से भेद का आश्रय करके कर्मों से उपचित होता है ।।८१।। इसके अनन्तर कर्मों के वंशगत होता हुआ यह स्वर्ग के तथा नरक के भोगों का उपभोग किया करता है इसलिये बुद्धिमान् पुरुष को ज्ञानयोग के उपक्रमों से मन का शोधन करना चाहिए ।।८२।। जब वह मन शुद्ध हो जाता है तो फिर यह अन्तरात्मा स्वयमेव निराकुल हो जाया करता है फिर यह शरीर के संक्लेशों से भी निर्दहनात्मक नहीं होता है ।।८३।। जिस पुरुष का मन भली-भाँति शुद्ध नहीं होता है वह पुरुष शुद्धि को कभी भी प्राप्त नहीं होता हैं । ये सभी क्रियाऐं और नियमादिक भी पातकों के लिये ही कहे गये हैं ।।८४।।

यस्मा दत्याविलं देहं न शीघ्रं शुद्ध्यते किल ।
तेन लोकेषु मार्गोऽयं सत्पथस्य प्रवर्त्तकः ।।८५

वर्णाश्रमविभागोऽयं लोकाध्य क्षेण केनचित् ।
निमित्तं मोहमात्म्यं निह्ववोत्तमभागिनाम् ॥८६
भवन्तः क्रोधकामाभ्यामभिभूताश्रमे स्थिताः ।
ज्ञानि नामाश्रमो वेश्म वेश्माश्रममयोगिनाम् ॥८७
क्व च न्यस्तसमस्तेच्छा क्व च नारीमयो श्रमः ।
क्व क्रोध ईदृशो घोरो येनात्मानं न जानथ ॥८८
यत्क्रोधनो यजति यच्च ददाति नित्यं
यद्वा तपस्तपति यच्च जुहोति तस्य ।
प्राप्नोति नैव किमपीह फलं हि लोके
मोघं फलं भवति तस्य हि कोपनस्य ॥८९

क्योंकि यह देह अत्यन्त आविल है अतः शीघ्र ही इसकी शुद्धि भी नहीं होती है ।। इसी से लोकों में यह मार्ग सत्यथ का प्रवर्त्तक होता है ॥८५॥ यह वर्णाश्रम का यह विभाग किसी . लोकों के निमित्त ही किया है ॥८६॥ आप लोग क्रोध और काम से अभिभूत इस आश्रम में स्थित हैं । जो अयोगी हैं उनका वेश्याश्रम– होता है तथा ज्ञानियों का आश्रम वेश्म ही है ॥८७॥ कहाँ तो सम्पूर्ण प्रकार की इच्छाओं का त्याग है और कहाँ नारीमय श्रम है ? दोनों में बहुत बड़ा अन्तर है । कहाँ तो ऐसा घोर क्रोध है जिसके कारण आप लोग आत्मा के स्वरूप को नहीं जानते हैं ॥८८॥ क्रोधी पुरुष जो भी यजन करता है, नित्य दान देता है, तपस्या करता है और जो भी वह हवन किया करता है वह इस लोक में कुछ भी नहीं प्राप्त किया करता है । ऐसे क्रोध करने वाले पुरुष का लोक में फल सब मोघ (व्यर्थ) ही हो जाया करता है ॥८९॥

---

४४ · ब्रह्मादिदेव कृत शिव-स्तुति

ब्रह्मणो वचनं श्रुत्वा ऋषयः सर्व एव ते ।
पुनरेव च पप्रच्छुर्जगतः श्रेयकारणम् ॥१

गच्छामः शरणं देवं शूलपाणिं त्रिलोचनम् ।
प्रसादाद्देवदेवस्य भविष्यथ यथा पुरा ॥२

इत्युक्ता ब्रह्मणा सार्द्धं कैलासं गिरिमुत्तमम् ।
ददृशुस्ते समासीनमुमया सहितं हरम् ॥३
ततः स्तोतुं समारब्धो ब्रह्मा लोकपिता महः ।
देवाधिदेवं वरदं त्रैलोक्यस्य शिवं प्रभुम् ॥४

अनन्ताय नमस्तुभ्यं वरदाय पिनाकिने !
महादेवाय देवाय स्थाणवे परमात्मने ॥५

नमोऽस्तु भुवनेशाय तुभ्यं तारक सर्वदा ।
ज्ञानानां दायको देवस्त्वमेकः पुरुषोत्तमः ॥६
नमस्ते पद्मगर्भाय हृत्पद्मशायिने नमः ।
घोरशातितपापाय चण्डक्रोधनमोऽस्तु ते ॥७

महा मुनीन्द्र सनत्कुमारजी ने कहा—उन समस्त ऋषियों ने ब्रह्माजी के इस वचन को सुनकर उन्होने उन से फिर जगत् के श्रेय का कारण पूछा था ॥१॥ ब्रह्माजी ने कहा —तीन नेत्रों वाले शूल पाणि देव की शरणागति में चलें। देवों के भी देव के प्रसाद से जैसा पहिले था सब हो जायगा ॥२॥ ब्रह्मा के द्वारा इस प्रकार से कहे गये वे सब ब्रह्माजी के ही साथ में उत्तम कैलास गिरि पर गये थे और वहाँ पर उमा के साथ बैठे हुए भगवान् हर का उन्होंने दर्शन किया था ॥३॥ इसके अनन्तर लोकों के पितामह ब्रह्माजी ने वरदान दाता–देवोंके भी अधिदेव, त्रैलोक्य के प्रभु भगवान् शिव की स्तुति करना समारम्भ कर दिया था ॥४॥ ब्रह्माजी ने कहा—-जिसका कभी भी अन्त नहीं है ऐसे वरदान प्रदान करने वाले, पिनाकधारी स्थाणु देव, परमात्मा महादेव आपकी सेवा में हमारा प्रणाम सादर समर्पित है ॥५॥ हे तारक ! भुवनों के स्वामी, ज्ञानों के प्रदान करने वाले आपके लिये सर्वदा हमारा नमस्कार है। आप तो एक ही पुरुषों में अत्युत्तम देव हैं ॥६॥ हृदय के पद्म में शयन करने वाले पद्म गर्भ आपके लिये नमस्कार है। परम घोर शाशित

पाप के लिये चण्ड क्रोध वाले आप हैं ऐसे आपके लिये हमारा सबका नमस्कार है ॥७॥

नमस्ते देवविश्वेश नमस्ते शूरनायक ।
शूलपाणे नमस्तेऽस्तु नमस्ते विश्वभानन ॥८
एवं स्तुतो महादेवो ब्रह्मणा ऋषिभिस्तदा ।
उवाच तानाव्रजतलिङ्गं वो भविता पुनः ॥९
क्रियतां मद्वचः शीघ्रं येन मे प्रीतिरुत्तमा ।
भविष्यति प्रतिष्ठायां लिङ्गस्यात्र न संशयः ॥१०
ये लिङ्गं पूजयिष्यन्ति मामकं भक्तिमाश्रिताः ।
न तेषां दुर्लभं किंचिद्भविष्यति कदाचन ॥११
सर्वेषामपि पापानां कृतानामपि जानता ।
शुद्धचते लिङ्गपूजाया नात्र कार्या विचारणा ॥१२
युष्माभिः पातित लिङ्गं तारयित्वा महत्सरः ।
सन्निहत्यां तु विख्यातं तस्मिञ्छीघ्रं प्रतिष्ठितम् ॥१३
यथाऽभिलषितं कामं ततः प्राप्स्यथ ब्राह्मणाः ।
स्थाणुनाम्ना हि लोकेषु पूजनीयो दिवौकसाम् ॥१४

हे देवों और समस्त विश्व के ईश ! हे शूरों के नायक ! आपके लिये प्रणाम है । जिनके हाथ में शूल रहता है तथा जो विश्व भर पर कृपा करने वाले आपके लिये हमारा नमस्कार है ॥८॥ उस समय में ब्रह्माजी तथा ऋषियों के द्वारा इस तरह से स्तुति किये गये महादेव ने उनसे कहा था—आप उसी लिंग के पास जाइये वह पुनः आपका हो जायगा ॥९॥ क्योंकि मुझे प्रीति उत्पन्न होगई है । मेरे वचन का आप शीघ्र ही पालन करो । उस लिंग की प्रतिष्ठा में कल्याण होगा—इसमें कुछ भी संशय नहीं है ॥१०॥ जो लोग भक्ति की भावना का समाश्रय ग्रहण करके मेरे लिंग का पूजन करेंगे उनको कभी भी कुछ भी दुर्लभ नहीं है ॥११॥ समस्त किये हुए पापों को जानते हुए भी मनुष्य लिंग की पूजा से शुद्ध हो जाया करता है । इसमें कुछ भी संदिग्ध होकर विचार नहीं करना चाहिए ॥१२॥ आप लोगों ने जो लिंग पातित

किया है उसने महत्सर का तारण करके अब वह सन्निहित में विख्यात है उनमें शीघ्र ही प्रतिष्ठित कर डालो ॥१३॥ हे ब्राह्मणो ! फिर आप लोग जो भी आपकी अभिलषित कामना होगी उसे अवश्य ही प्राप्त कर लेंगे। वह स्थाणु-इस नाम से देवों के लोकों में पूजनीय है ॥१४॥

स्थाण्वीश्वरे स्थितो यस्मात्ततः स्थाण्वीश्वरः स्मृतः ।
ये स्मरन्ति सदा स्थाणुं ते मुक्ताः सर्वकिल्विषैः ॥१५
शुद्धदेहा भविष्यन्ति दर्शनान्मोक्षगामिनः ।
इत्येवमुक्ता देवेन ऋषयो ब्रह्मणा सह ॥१६
तस्माद्दारुवनाल्लिङ्गं नेतुं समुपचक्रमुः ।
अशक्तास्तं चालयितुं ते देवा ऋषिभिः सह ॥१७
श्रमेण महता युक्ता ब्रह्माणं शरणं ययुः ।
तेषां श्रमाभिपन्नानामिदं ब्रह्माऽब्रवीद्वचः ॥१८
किं वा श्रमेण महता न यूयं वहनक्षमाः ।
स्वेच्छया पतितं लिङ्गं देवदेवेन शूलिना ॥१९
तस्मात्तमेव शरणं यास्यामः सहिताः सुराः ।
प्रसन्नश्च महादेवः स्वमेव स नेष्यति ॥२०
इत्येवमुक्ता ऋषयो देवाश्च ब्रह्मणा सह ।
कैलासं गिरिमासाद्य रुद्र दर्शनकाङ्क्षिणः ॥२१

क्योंकि स्थाणु में ईश्वर स्थित है इसी कारण से तभी से वह स्थाण्वीश्वर कहा गया है। जो लोग सदा स्थाणु का स्मरण किया करते हैं वे सभी किल्विषों से छुटकारा पाजाया करते हैं ॥१५॥ स्थाणु के दर्शन से शुद्ध देह वाले होकर मोक्ष के गामी हो जाते हैं देव के द्वारा इस प्रकार से कहे गये वे समस्त ऋषिवृन्द ब्रह्माजी के ही साथ उस दारुवन से उस लिंग के लाने के लिये उपक्रम करने लगे थे। किन्तु वे सब देवगण ऋषियों के सहित उसे चालित करने में असमर्थ होगये थे ॥१६-१७॥ महान् श्रम से युक्त होते हुए भी वे सब ब्रह्माजी की शरण में गये थे। अत्यन्त श्रम से समाभिपन्न उनसे ब्रह्माजी ने यह वचन कहा था—॥१८॥ आपके इस अत्यन्त महान् श्रम के करने से क्या लाभ है।

आप लोग इसे वहन करने में समर्थ नहीं हैं। देवों के भी देव शूली ने अपनी इच्छा से लिंग को पतित किया है ॥१९॥ इसलिए अब सुरों के सहित उन्हीं की शरण में जायेंगे। जब महादेव प्रसन्न होंगे तो वह स्वयं ही ले जांयगे ॥२०॥ इस तरह कहे जाने पर सब ऋषिगण-देववृन्द ब्रह्माजी के साथ कैलास पर पहुंच कर रुद्र की दर्शनेच्छा वाले हुए थे ॥२१॥

न च पश्यन्ति ते देवं ततश्चिन्तासमन्विताः।
ब्रह्माणमूचुर्मुनयः क्व स देवो महेश्वरः ॥२२
ततो ब्रह्माचिरं ध्यात्वा देवदेवं महेश्वरम्।
हस्तिरूपेण तिष्ठन्तं मुनिभिर्मानसः स्तुतम् ॥२३
अथ ते ऋषयः सर्वे देवाश्च ब्रह्मणा सह।
गता महत्सरः पुण्यं यत्र देवः स्वयं स्थितः ॥२४
न च पश्यन्ति ते देवमन्विषन्तस्ततस्ततः।
ततश्चिन्तान्विता देवा ब्रह्मणा सहितास्तथा ॥२५
पश्यन्ति देवीं सुप्रीतां कमण्डलुविभूषिताम्।
प्रीयमाणास्तदा देवीमिदं वचनमब्रुवन् ॥२६
क्व देवि मातर्देवेशो दृश्यते सर्वदा समः।
श्रमेण महता युक्ता अन्विषन्तो महेश्वरम् ॥२७
ततस्तु कृपयाऽऽविष्टा देवी वचनमब्रवीत्।
अत्रैवाद्य महाभागास्तं द्रक्ष्यथ महेश्वरम् ॥२८

किन्तु उन्होंने वहाँ पर देवेश्वर को नहीं देखा था तो वे बहुत ही चिन्ता से युक्त होगये थे। मुनिगण ने ब्रह्माजी से कहा था कि वह महेश्वर देव इस समय में कहाँ पर हैं ॥२२॥ इसके अनन्तर ब्रह्माजी ने चिरकाल तक ध्यान किया तो देवदेव महेश्वर को हाथी के रूप में स्थित देखा था और फिर मुनियों के सहित उनकी मानस स्तुति की थी ॥२३॥ इसके पश्चात् वे सब ऋषि-देवता ब्रह्मा जी के सहित पुण्य महत्सर पर गये थे जहाँ पर देव स्वयं संस्थित थे ॥२४॥ वे इधर-उधर खोज करते हुए भी देव का दर्शन नहीं कर पाते थे। इसके पश्चात् सब देव ब्रह्मा के सहित चिन्ता से आतुर हो गये थे ॥२५॥ उन्होंने

कमण्डलु से विभूषित और परम प्रसन्न देवी का दर्शन किया था। तब तो सब अति प्रसन्न होते हुए उस जगदम्बा से उस समय में यह वचन बोले थे ॥२६॥ हे देवि ! हे माता ! देवेश्वर कहां पर हैं ? वह तो सर्वदा सम दिखलाई दिया करते हैं। हमने तो महान् श्रम किया है और भगवान् महेश्वर की खोज कर रहे हैं ॥२७॥ तब तो दया से परिपूर्ण देवी ने यह वचन कहा था। हे महान् भाग वालो ! आज ही उन महेश्वर प्रभु के आप लोग दर्शन प्राप्त कर लेंगे ॥२८॥

पीयताममृतं देवास्ततो ज्ञास्यथ शंकरम् ।
एतच्छ्रुत्वा तु वचनं भवान्या समुदाहृतम् ॥२९
सुखोपविष्टास्ते देवाः पपुस्तदमृतं शुचि ।
अनन्तरं सुखासीनाः पप्रच्छुः परमेश्वरीम् ॥३०
क्व स देव इहायातो हस्तिरूपधरः स्थितः ।
दर्शितश्च तदा देव्या सरोमध्ये व्यवस्थितः ॥३१
दृष्ट्वा देवं हर्षयुक्ताः सर्वे देवाः सवासवाः ।
ब्रह्माणमग्रतः कृत्वा इदं वचनमब्रुवन् ॥३२
त्वया त्यक्तं महादेव लिङ्गं त्रैलोक्यवन्दितम् ।
तस्य चानयने नान्यः समर्थः स्यान्महेश्वर ॥३३
इत्येवमुक्तो भगवान्देवो ब्रह्मादिभिर्हरः ।
जगमा ऋषिभिः सार्द्धं देवदारुवनाश्रयम् ॥३४
तत्र गत्वा महादेवो हस्तिरूपधरो हरः ।
करेण जग्राह ततो लीलया परमेश्वरम् ॥३५
तमादाय महादेवः स्तूयमानो महर्षिभिः ।
निवेशयामास तदा सरः पार्श्वे तु पश्चिमे ॥३६
ततो देवाः सर्व एव ऋषयश्च तपोधनाः ।
आत्मानं सफलं दृष्ट्वा स्तोत्रं चक्रुर्महेश्वरे ॥३७

हे देवगण आप लोग अमृत का पान करो। इसके पश्चात् आप शंकर को जान जाओगे। इस वचन का श्रवण करके जोकि भवानी के द्वारा कहा गया था ॥२९॥ वे सब सुख पूर्वक बैठ गये थे और उन्होंने

परम शुचि अमृत का पान किया था। इसके पश्चात् सुख में स्थित उन्होंने परमेश्वरी भगवती से पूछा था ॥३०॥ वह देव यहाँ पर आये हुए हैं और अब कहाँ पर हैं जोकि हाथी का स्वरूप धारण करके स्थित हैं ? उस समय में सर के मध्य में व्यवस्थित उनको देवी ने दिखा दिया था ॥३१॥ तब देवेश्वर का दर्शन करके समस्त देवगण इन्द्र के सहित हर्ष से युक्त हो गये थे और ब्रह्माजी को अपना अगुआ बना कर यह वचन कहने लगे थे ॥३२॥ हे महादेव ! आपने ही यह त्रैलोक्य के द्वारा वन्द्यमान लिंग त्यक्त किया है। हे महेश्वर ! उसके लाने में अन्य कोई भी समर्थ नहीं हैं॥३३॥इस तरह से कहे गये भगवान् देव हर ब्रह्मा आदि तथा ऋषिगण के साथ देव दारूवनाश्रय को गये थे ॥३४॥ वहाँ पर हाथी का स्वरूप धारण करने वाले महादेव हर ने लीला से ही हाथ (सूंड़) से परमेश्वर को ग्रहण कर लिया था। उसको लेकर तथा महर्षियों के द्वारा स्तूयमान होते हुए महादेव ने उस समय में सर के पश्चिम पार्श्व में निवेशित कर दिया था ॥३५-३६॥ इसके पश्चात् तपोधन सब ऋषिगण और देववृन्द ने अपने आपको सफल मानकर भगवान महेश्वर का स्तोत्र किया था ॥३७॥

नमस्ते परमात्मन् अनन्तयोने लोकसाक्षिन् परमेष्ठिन् भगवन् सर्वज्ञ क्षेत्रज्ञ ज्ञानज्ञेय सर्वेश्वर महाविरञ्चे महाविभूते माहक्षेत्रज्ञ महापुरुष सर्वभूतावास मनोनिवास आदिदेव महादेव सदाशिव ईशान दुर्विज्ञेय दुराराध्य महाभूतेश्वर परमेश्वर महायोगेश्वर त्र्यम्बक महायोगिन् परब्रह्म न् परमज्योतिः ब्रह्मविदुत्तम ॐकार वषट्कार स्वाहाकार स्वधाकार परमकारण सर्वगत सर्वदर्शन सर्व-शक्त सर्वदेव अज सहस्रार्चिः सुधामन् हरधाम वंशवर्त्त संवर्त्त सकर्षण वडवानल आग्नीषोमात्मक पवित्र महापवित्र महामेघ महाकामहन् हंस परमहंस महाराजिक महेश्वर महाकामुक महा-हंस भवक्षयकर सुरसिद्धार्चित हिरण्यवाह हिरण्यरेतः हिरण्यनाभ हिरण्याग्रकेश मुञ्जकेशिन् सर्वलोकवरप्रद सर्वानुग्रहकर कमलेशय हृदयेशय ज्ञानोदधे शंभो च विभो महायज्ञ महायाज्ञिक सर्वयज्ञ-

मय सर्वयज्ञसंस्तुत निराश्रय समुद्रेश अत्रिसंभूत भक्तानुकम्पक अभग्नयोग योगधर वासुकिमहाहिविद्योतितविग्रह हरितनयन त्रिलोचन जटाधर नीलकण्ठ चन्द्रार्धधर उमाशरीरार्धधर शूलधर पिनाकधर खड्गचर्मधर गजचर्मधर दुस्तरसंसारमहासंहारकर प्रसीद भजक्तनवत्सल ।।३८

एवं स्तुतो देवगणैः सुभक्त्या स ब्रह्ममुख्यैश्च स पितामहेन ।
त्यक्त्वातदाहस्तिरूपंमहात्मालिङ्ग तदा संनिधानं चकार ।।३९

हे परमात्मन् ! आपकी सेवा में हम सबका प्रणाम समर्पित है। आप अनन्त योनि हैं । लोकों के साक्षी स्वरूप हैं—परमेष्ठी हैं। हे भगवन् ! आप सब कुछ के ज्ञाता हैं—क्षेत्र के जानने वाले हैं—ज्ञान के द्वारा ही आप जानने के योग्य होते हैं। आप ईश्वर हैं—महान् विरञ्चि हैं—आप महान् विभूति हैं—महान् क्षेत्रज्ञ हैं आप महान् पुरुष हैं तथा समस्त प्राणी आपके ही अन्दर निवास किया करते हैं। आप मन्त्र में वास करने वाले है। आप आदि देव हैं और सबसे बड़े देव हैं। आप सर्वदा मंगलमय स्वरूप वाले है। ईशान और अत्यन्त ही दुःख से जानने के योग्य हैं। आपकी आराधना अत्यन्त कठिन है ऐसे आपका रूप है। आप महान् भूतों के ईश्वर है—परम ईश्वर हैं तथा आप महान् योग के स्वामी हैं। आप त्र्यम्बक हैं—परब्रह्म हैं तथा आप परम ज्योति हैं। आप—ब्रह्म वेत्ताओं में सर्वोत्तर देव हैं। आप ओंकार के रूप वाले हैं—वषट्कार-स्वधा के आकार वाले—स्वाहाकार तथा आप परम कारण स्वरूप हैं। आप सब में व्याप्त रहते हैं। सर्व दर्शन सर्वशक्त और आप सबके देव हैं। आप अजन्मा हैं तथा सहस्र अर्चियों वाले हैं। आप सुधामा हैं। आप हरधाम-वंशवर्त्त-संवर्त्त तथा संकर्षण स्वरूप वाले हैं। आप बड़वानल तथा अग्नी-षोमात्मक हैं। आप पवित्र—महान् पवित्र-महामेघ तथा महाकाम का हनन करने वाले हैं। आप हंस-परमहंस-महाराजिक, महेश्वर, इन शुभ नामों से भूषित होने वाले हैं। आप महान् कामुक हैं और महान् हंस हैं। आप इस संसार के भय के नाशक तथा देव और सिद्धों के द्वारा

पूजित हैं। आप हिरण्यवाह—हिरण्यरेता, हिरण्यनाभ और हिरण्याग्र केशी हैं। आप मुञ्ज केशी तथा समस्त लोकों को वरदान देने वाले—सभी पर अनुग्रह करने वाले-कमल में शयन करने वाले और हृदयों में शयन करने वाले हैं। हे शम्भो ! हे विभो ! आप महान् यज्ञ स्वरूप हैं तथा महान् याज्ञिक (यज्ञ कराने वाले) हैं। आपका स्वरूप समस्त यज्ञों से परिपूर्ण है तथा सब यज्ञों के द्वारा संस्तवन किये हुए हैं। आप विना आश्रय वाले—समुद्र के स्वामी अत्रि से समुत्पन्न, भक्तों पर अनुकम्पा करने वाले हैं। आप अभग्न योग से समन्वित हैं योग के धारण करने वाले हैं। आप महान् सर्प वासुकि के द्वारा विशेष रूप से द्योतित विग्रह वाले हैं। आप हरित नयन-तीन लोजनों वाले, जटा के धारी, नीले कण्ठ वाले, अर्धचन्द्र को धारण करने वाले हैं। आप जगदम्बा उमा के अर्द्ध शरीर को धारण करने वाले, त्रिशूलधारी-पिनाक धारी—खंग ओर चर्म के धारण करने वाले-गज के चर्म धारी हैं। हे शम्भो ! आप इस दुस्तर संसार में महान् संहार कर देने वाले हैं और आप अपने भक्तजनों पर वात्सल्य रखने वाले हैं। आप प्रसन्न होइये अर्थात् हम लोगों पर प्रसन्नता प्रकट करिये ॥३८॥ इस प्रकार से देवगण के द्वारा—ब्रह्म मुख्यों के द्वारा—और पितामह के द्वारा सुन्दर भक्ति से स्तुति किये गये ब्रह्म देवेश्वर महान् आत्मा वाले शम्भु ने अपना हाथी का रूप त्याग कर उस समय में लिंग का सन्निधान किया था ॥३९॥

४५—स्थाणु लिंग माहात्म्य

अथोवाच महादेवो देवान्ब्रह्मपुरोगमान् ।
ऋषीणां चैव प्रत्यक्षं तीर्थमाहात्म्यमुत्तमम् ॥१

एतत्सन्निहतं प्रोक्तं सरः पुण्यतमं महत् ।
मयोपवेशितं यस्मात्तस्मान्मुक्तिप्रदायकम् ॥२

इह ये पुरुषाः केचिद्ब्राह्मणाः क्षत्रिया विशः ।
लिङ्गस्य दर्शनादेव पश्यन्ति परमं पदम् ॥३
अहन्यहनि तीर्थानि आसमुद्रात्सरांसि च ।
स्थाणु तीर्थं समेष्यन्ति मध्यं प्राप्ते दिवाकरे ॥४
स्तोत्रेणानेन सततं ये मां स्तोष्यन्ति भक्तितः ।
तस्याहं सुलभो नित्यं भविष्यामि न संशयः ॥५
इत्युक्त्वा भगवान्रुद्रो ह्यन्तर्धानं गतः प्रभुः ।
देवाश्च ऋषयः सर्वे स्वानि स्थानानि भेजिरे ॥६
ततो निरन्तरं स्वर्गं मानुषैर्मिश्रितं कृतम् ।
स्थाणुलिङ्गस्य माहात्म्यदर्शनात्स्वर्गमाप्नुयुः ॥७

महामुनीन्द्र सनत्कुमारजी ने कहा––इसके अनन्तर ब्रह्मा जिनके अगुआ थे उन देवगण से महादेव जी ने कहा था और ऋषियों का जो प्रत्यक्ष उत्तम तीर्थ का माहात्म्य था उसका वर्णन किया था ॥१॥ यह महान् पुण्यतम सर सन्निहत कहा गया है। क्योंकि इसको मैंने उप-वेशित किया है इसलिये यह मुक्ति के प्रदान करने वाला है ॥२॥ वहाँ पर जो भी कोई पुरुष ब्राह्मण, क्षत्रिय और वैश्य हैं वे सब इस लिंग के दर्शन से ही परम पद को पाते हैं ॥३॥ प्रतिदिन समुद्र से लेकर सरों तक प्रत्येक तीर्थ दिवाकर के मध्यगत होने पर स्थाणु तीर्थ में आया करेंगे ॥४॥ इस स्तोत्र से निरन्तर जो भक्ति पूर्वक स्तवन करेंगे उनको मैं नित्य ही सुलभ हो जाऊंगा––इसमें कुछ भी संशय नहीं है ॥५॥ इतना कहकर भगवान् रुद्र प्रभु अन्तर्धान हो गये थे और फिर सब देवगण तथा ऋषि लोग भी अपने अपने स्थानों को चले गये थे ॥६॥ इसके अनन्तर यह हुआ था कि जो स्वर्ग देवगण के निवास का ही स्थान था वह मनुष्यों से निश्चित कर दिया गया था। स्थाणु लिंग के माहात्म्य के दर्शन से स्वर्ग को प्राप्त हो गये थे ॥७॥

ततो देवगणाः सर्वे ब्रह्माणं शरणं ययुः ।
तानुवाच तदा ब्रह्मा किमर्थमिह चागताः ॥८

ततो देवाः सर्वं एव इदं वचनमब्रुवन् ।
मानुषेभ्यो भयं तीव्रं रक्षास्माकं पितामह ।।९
तानुवाच तदा ब्रह्मा देवं त्रिदशनायकम् ।
पाशुना पूर्यतां शीघ्रं साद्धं शक्रे हितं कुरु ।।१०
ततो ववर्षं भगवान्पांशुना पाकशासनः ।
सप्ताहं पूरयामासुः सेन्द्रा देवास्तदा स्मृताः ।।११
तं दृष्ट्वा पांशुवर्षं च देवदेवो महेश्वरः ।
करेण धारयामास लिङ्गं तीर्थवट तथा ।।१२
तस्मात्पुण्यतम तीर्थं पाद्यं यत्रोदकं स्थितम् ।
तस्मिन्स्नातः सर्वं तीर्थे स्नातो भवति मानवः ।।१३
यस्तत्र कुरुते श्राद्धं वटलिङ्गस्य चान्तरे ।
तस्य पीताश्च पितरो दास्यन्ति भुवि दुर्लभम् ।।१४

इसके अनन्तर सब देवगण ब्रह्माजी की शरण में गये थे । ब्रह्माजी ने उस समय में उनसे पूछा था कि आप लोग यहाँ पर अब किस प्रयोजन से आये हैं ।।८।। तब सब देवों ने यही वचन ब्रह्माजी से कहा था कि हमको मनुष्यों से बड़ा तीव्र भय हो गया है । हे पितामह ! उनसे हमारी रक्षा करो ।।९।। उस समय में उनसे ब्रह्माजी ने यह कहा था कि त्रिदशों के नायक देव का पांशु से आधा भाग पूरित करदो और इन्द्र का हित सम्पादन करो ।।१०।। इसके पश्चात् भगवान् पाकशासन ने धूलि से वर्षा की थी । एक सप्ताह तक पूरित किया था । उस समय में इन्द्र के सहित देव कहे गये थे ।।११।। उस पांशु की वर्षा को देखकर देवों के देव महेश्वर ने उस लिंग तथा तीर्थ वट को कर से धारण कर लिया था ।।१२।। उससे पुण्यतम तीर्थ वह है जहाँ पर पाद्य का उदक स्थित था । उसमें स्नान करने वाला मनुष्य सभी तीर्थों के स्नान का फल प्राप्त कर लेता है ।।१३।। जो कोई उस पर लिंग के अन्तर में वहां पर श्राद्ध करता है उससे उसके पितर अत्यन्त प्रसन्न होकर भूमण्डल में जो भी दुर्लभ से दुर्लभ वस्तु है उसे प्रदान किया करते हैं ।।१४।।

पूरितं च ततो दृष्ट्वा ऋषयः सर्वं एव ते ।
पांशुना सर्वगात्राणि स्पृशन्ति श्रद्धयाऽन्विताः ।।१५
तेऽपिनिर्धूतपापाश्च पांशुना मुनयो गताः ।
पूज्यमानाः सुरगणैः प्रयाता ब्रह्मणः पदम् ।।१६
ये तु सिद्धा महात्मानस्ते लिङ्गं पूजयन्ति च ।
व्रजन्ति परमां सिद्धिं पुनरावृत्तिदुर्लभाम् ।।१७
एवं ज्ञात्वा तदा ब्रह्मा लिङ्गं शैलमयं तदा ।
आद्यं लिङ्गं तदाऽऽस्थाप्य तस्योपरि न्यधीयत ।।१८
ततः कालेन महता तेजसा तस्य रञ्जितम् ।
तस्यापि स्पर्शनात्सिद्धाः परं पदमवाप्नुयुः ।।१९
ततः देवैः पुनर्ब्रह्मा विज्ञप्तो द्विजसत्तमाः ।
एते यान्ति परां सिद्धिं लिङ्गसंदर्शनात्पराम् ।।२०
तच्छ्रुत्वा भगवान्ब्रह्मा देवानां हितकाम्यया ।
उपर्युपरि लिङ्गानि सप्त तत्र चकार ह ।।२१

इसके उपरान्त उन सब ऋषियों ने पूरित देखकर श्रद्धा से युक्त हो पाँशु से सब गात्रों का स्पर्श करते थे ।।१५।। वे मुनिगण भी उस पाँशु से निर्धूत पापों वाले हो गये थे और सुरगणों के द्वारा वे सब पूज्यमान होते हुए ब्रह्मा जी के पद को प्राप्त हो गये थे ।।१६।। जो सिद्ध महात्मा लोग थे वे भी लिंग की पूजा किया करते थे । तथा पुनरावृत्ति दुर्लभा सिद्धि को प्राप्त हो जाया करते थे ।।१७।। इस प्रकार से ब्रह्माजी ने जान कर उस समय में शैलमय आद्य लिंग की स्थापना करके उसके ऊपर रख दिया था ।।१८।। इसके पश्चात् अधिक समय के हो जाने पर उसके तेज से रञ्जित हो गया था । उसके भी स्पर्श से सिद्ध लोग परम पद को प्राप्त होते हैं ।।१९।। हे द्विज श्रेष्ठो इसके अनन्तर देवों ने पुनः ब्रह्माजी को विज्ञप्त किया था । ये लिंग के सम्यक् प्रकार से दर्शन करने से परासिद्धि को प्राप्त होते हैं ।।२०।। भगवान् ब्रह्माजी ने यह श्रवण करके देवों के हित की कामना से ऊपर-ऊपर सात लिंगों को कर दिया था ।।२१।।

ततो ये मुक्तिकामाश्च सिद्धाश्रमपरायणाः ।
सेव्य पांशु प्रयत्नेनप्रयाताः परमं पदम् ॥२२
पांशवोऽपि कुरुक्षेत्रे वायुना समुदोरिताः ।
महादुष्कृतकर्माणः प्रापयन्ति परं पदम् ॥२३
अज्ञानाज्ज्ञानतोवाऽपि स्त्रिया वा पुरुषस्य वा ।
नश्यते दुष्कृतं सर्वं स्थाणुतीर्थंप्रभावतः ॥२४
लिङ्गस्य दर्शनान्मुक्तिः स्पर्शनाच्च वटस्य च ।
तत्सन्निधौ जले स्नात्वा प्राप्नोत्यभिमतं फलम् ॥२५
पितॄणां तर्पणं यस्तु जले तस्मिन्करिष्यति ।
बिन्दौ बिन्दौ तु तोयस्य ह्यनन्तक फलभाग्भवेत् ॥२६
यस्तु कृष्णतिलैः श्राद्ध स्थाणोर्लिङ्गस्य पश्चिमे ।
तर्पयेच्छ्रद्धया युक्तः प्रीणयेत्स युगत्रयम् ॥२७
यावन्मन्वन्तरं प्रोक्तं यावल्लिङ्गस्य च स्थितिः ।
तावत्प्रीताश्च पितरः पिबन्ते जलमुत्तमम् ॥२८
कृते युगे सन्निहत्यां त्रेतायां वायुसज्ञितम् ।
कलिद्वापरयोर्मध्ये कूपे रुद्रह्लद स्मृतम् ॥२९
चैत्रस्य कृष्णपक्षे च चतुर्द्दश्यां नरोत्तमः ।
स्नात्वा रुद्रकरे तोर्थे परं पदमवाप्नुयात् ॥३०
वटे यस्तु स्थितो रात्रौ ध्यायते परमेश्वरम् ।
स्थाणोवटप्रसादेन मनसा चिन्तित फलम् ॥३१

इसके उपरान्त जो लोग मुक्ति के प्राप्त करने की कामना रखते थे और जो सिद्धाश्रम में परायण थे वे प्रयत्न पूर्वक पाँशु का सेवन करके परम पद को प्रयाण कर गये थे ॥२२॥ वे धूलियाँ भी कुरुक्षेत्र में वायु के द्वारा समुदीरित हुई थीं। जो महान् दुष्कृत कर्म्म वाले भी लोग थे वे भी परम पद को प्राप्त हो जाते हैं ॥२३॥ अज्ञान से अथवा ज्ञान से स्त्रियों के अथवा पुरुषों के जो भी दुष्कृत होते हैं वे सब स्थाणु तीर्थ के प्रभाव से नष्ट हो जाया करते हैं ॥२४॥ लिग के दर्शन से मुक्ति होती है और वट के स्पर्श करने से मोक्ष होता है। उसकी सन्निधि में

जल में स्नान करके मनुष्य अपने अभीष्ट फल को प्राप्त किया करता है ॥२५॥ उस जल में जो भी कोई पुरुष अपने पितृगण का तर्पण किया करता है तो जल के प्रत्येक विन्दु में अनन्त फल का भागी होता है ॥२६॥ जो कोई पुरुष काले तिलों से स्थाणु लिंग के पश्चिम में श्राद्धा करता है और श्रद्धा से युक्त होकर तर्पण करता है वह तीनों युगों में सबको प्रसन्न किया करता है ॥२७॥ जब तक मन्वन्तर बताया गया है लिंग की स्थिति रहती है तब तक पितर लोग प्रसन्न होते हुए उत्तम जल का पान किया करते हैं ॥२८॥ कृत युग में सन्निहत्या—त्रेता में वायु संज्ञा वाला और द्वापर तथा कलियुग में मध्य कूप में रुद्र ह्रुव कहा गया है ॥२९॥ चैत्र मास के कृष्ण पक्ष में चतुर्दशी तिथि में श्रेष्ठ मनुष्य रुद्र कर तीर्थ में स्नान करके परम पद की प्राप्ति करता है ॥३०॥ जो पुरुष वट में स्थित होकर रात्रि में परमेश्वर का ध्यान किया करता है वह स्थाणु कें वर प्रसाद से मन के द्वारा चिन्तित किया हुआ फल प्राप्त कर लेता है ॥३१॥

—————

४६—नानाविध शिवलिङ्गस्थान माहात्म्य

स्थाणोर्वटस्योत्तरतः शुक्ल तीर्थं प्रकीर्त्तितम् ।
स्थाणोवटस्य पूर्वेण व्योमतीर्थं द्विजोत्तमाः ॥१
स्थाणोवटं दक्षिणतो दक्षतीर्थमुदाहृतम् ।
स्थाणोः पश्चिमदिग्भागे नकुलस्य गणः स्मृतः ॥२
एतानि पुण्यतीर्थानि मध्ये स्थाणुरिति स्मृतः ।
तस्य दर्शनमात्रेण प्राप्नोति परम पदम् ॥३
अष्टम्यां च चतुर्द्दश्यां यस्त्वेतानि परिक्रमेत् ।
उमा च लिङ्गरूपेण हरपार्श्वं न मुञ्चति ॥४
तस्या दर्शनमात्रेण सिद्धि प्राप्नोति मानवाः ।
वटस्य उत्तरे पार्श्वे तक्षकेण महात्मना ॥५

प्रतिष्ठितं महालिङ्गं सर्वकामप्रदायकम् ।
वटस्य पूर्वदिग्भागे विश्वकर्मकृतं महत् ।।६
लिङ्गं प्रत्यङ्मुखं दृष्ट्वा सिद्धिमाप्नोति मानवः ।
तत्रैव लिङ्गरूपेण स्थिता देवी सरस्वती ।।७

महामुनीन्द्र सनत्कुमार जी ने कहा—स्थाणु वट के उत्तर दिशा के भाग में शुक्ल तीर्थ कहा गया है। हे द्विजगण ! स्थाणु वट के पूर्व की ओर व्योम तीर्थ है ।१। स्थाणु वट के दक्षिण में दक्ष तीर्थ कहा गया है। स्थाणु के पश्चिम दिग्भाग में नकुल का गण कहा गया है ।२। ये सब पुण्य तीर्थ हैं और मध्य में स्थाणु है। उसके केवल दर्शन करने ही से परम पद की प्राप्ति हो जाती है ।३। अष्टमी और चतुर्दशी तिथि में जो मनुष्य इनकी परिक्रमा देता है और उमा लिंग रूप से हर के पार्श्व का त्याग नहीं किया करती हैं ।४। उनके दर्शन मात्र से ही मनुष्य को सिद्धि प्राप्त हो जाती है। वट के उत्तर पार्श्व में महात्मा तक्षक के द्वारा प्रतिष्ठापित महालिंग समस्त कामनाओं का देने वाला है। वट के पूर्व दिग्भाग में एक विश्व कर्म्मा के द्वारा किया हुआ महान् लिंग है ।५-६। उस लिंग को प्रत्यङ्मुख देख कर मानव सिद्धि को पाता है। वहीं पर लिंग रूप से देवी सरस्वती स्थित हैं ।७।

प्रणम्य तां प्रयत्नेन बुद्धिं मेधां च विन्दति ।
वटपार्श्वे स्थितं लिङ्गं ब्रह्मणा तत्प्रतिष्ठितम् ।।८
दृष्ट्वा वटेश्वरं देवं प्रयाति परमं पदम् ।
ततः स्थाणुवटं दृष्ट्वा कृत्वा चापि प्रदक्षिणम् ।।९
प्रदक्षिणीकृता तेन सप्तद्वीपा वसुंधरा ।
स्थाणोः पश्चिमदिग्भागे नकुलीशो गणः स्मृतः ।।१०
तमभ्यर्च्य प्रयत्नेन सर्वपापैः प्रमुच्यते ।
तस्य दक्षिणदिग्भागे तीर्थं रुद्राकरं स्मृतम् ।।११
तस्मिन्स्नातः सर्वतीर्थे स्नातो भवति मानवः ।
तस्य चोत्तरदिग्भागे रावणेन महात्मना ।।१२

प्रतिष्ठितं महालिङ्गं गोकर्णं नाम नामतः ।
आषाढमासे या कृष्णा भविष्यति चतुर्द्दशी ।।१३
तत्रं स्नात्वा सोमवासो मुक्तो भवति किल्विषैः ।
तत्रैव सिद्धिदं लिङ्गं मेघनादेन स्थापितम् ।।१४

उस देवी को प्रयत्न पूर्वक प्रणाम करके मनुष्य बुद्धि और मेधा को प्राप्त करता है। वट के पार्श्व में एक लिंग स्थित है जिसको ब्रह्माजी ने प्रतिष्ठित किया है।८। वटेश्वर देव का दर्शन करके परम पद को प्रयाण किया करता है। इसके पश्चात् स्थाणु वट का दर्शन करके तथा उसकी प्रदक्षिणा करके मनुष्य सात द्वीपों वाली वसुन्धरा की प्रदक्षिणा का फल प्राप्त कर लिया, करता है। स्थाणु के पश्चिम दिग्भाग में नकुलीश गण स्थित हैं उसका प्रयत्न पूर्वक पूजन करके मनुष्य सब पापों से प्रमुक्त हो जाता हैं। उसके दक्षिण दिग्भाग में रुद्राकर तीर्थ कहा गया है।९-११। उसमें स्नान करने वाला मनुष्य तीर्थों में स्नान करने का फल प्राप्त कर लेता है। उसके उत्तर भाग में महात्मा रावण के द्वारा प्रतिष्ठित महालिंग है जिसका गोकर्ण नाम है। आषाढ़ मास में जो कृष्ण पक्ष की चतुर्दशी हो उस दिन उस में स्नान करके उपवास करे तो सब किल्विषों से मुक्त होता है। वहीं पर सिद्धिद लिंग है जो मेघनाद के द्वारा स्थापित किया गया है।१२-१४।

संपूजयित्वा यत्नेन लभते महतीं श्रियम् ।
तस्य पश्चिमदिग्भागे कुम्भकर्णेन पूजितम् ।।१५
ज्येष्ठे मासि सिते पक्षे अष्टम्यां श्रद्धया नरः ।
सोपवासो वसेद्यस्तु तस्य पुण्यफलं शृणु ।।१६
पदे पदे यज्ञफलं स प्राप्नोति न संशयः ।
एतानि मुनिभिः साध्यैरादित्यैर्वसुभिस्तथा ।।१७
मरुद्भिर्वह्निभिश्चैव सेवितानि प्रयत्नतः ।
अन्येऽपि प्राणिनः केचित्प्रविष्टाः स्थाणुमुत्तमम् ।।१८
ते सर्वे पापनिर्मुक्ताः प्रयान्ति परमं पदम् ।
अस्ति यत्संनिधौ लिङ्गं देवदेवस्य शूलिनः ।।१९

उमा सा लिङ्गरूपेण हरपार्श्वं न मुञ्चति ।
यश्च पश्यति गोकर्णं तस्य पुण्यफलं लभेत् ॥२०

कामतोऽकामतो वाऽपि यत्पापं तेन संचितम् ।
तस्माद्विमुच्यते पापात्पूजयित्वा हरं शुचिः ॥२१

सिद्धिद नाम वाले लिंग का भली भाँति यजन करके यत्न से महती श्री की प्राप्ति किया करता है क्योंकि सिद्धियों के देने वाला उसका नाम ही है। उसके पश्चिम दिग्भाग में कुम्भकर्ण ने पूजन किया था ।१५। ज्येष्ठ मास में शुक्ल पक्ष में अष्टमी तिथि के दिन श्रद्धा से मनुष्य उपवास के साथ वहाँ जो वास करे उसका पुण्य फल सुनो ।१६। उसको एक २ पद में यज्ञ का फल मिलता है-इसमें संशय नहीं है। इनको मुनि, साध्य, आदित्य, वसु, मरुद, वह्नि, इनके द्वारा प्रयत्न पूर्वक से नित किया गया है। अन्य प्राणियों ने भी सेवन किया है कुछ लोग इस उत्तम स्थाणु तीर्थ में प्रवेश कर गये थे ।१७-१८। वे सभी पापों से निर्मुक्त होकर परम पद को प्रयाण कर गये थे। जिसके समीप में देवों के देव भगवान् शूली का लिंग है।१९। वह उमा लिंग रूप से हर के पार्श्व का कभी त्याग नहीं किया करती है जो गोकर्ण प्रभु का दर्शन करता है वह उसका पुण्य-फल प्राप्त कर लेता है ।२०। इच्छा से या अनिच्छा से जो भी कोई पाप उसने सञ्चित किया है उस पाप से हर का पूजन करके शुद्ध हो मनुष्य विमुक्त हो जाता है ।२१।

कौमारे ब्रह्मचर्येण यत्पुण्यं प्राप्यते नरैः ।
तत्पुण्यं शंकरं तस्यामष्टम्यां योऽर्चयेच्छिवम् ॥२२
यदीच्छेत्परमं रूपं सौभाग्यं धनसंपदः ।
कुमारेश्वरमाहात्म्यात्सिद्धयते नात्र संशयः ॥२३
तस्य चोत्तरदिग्भागे लिङ्गं पूज्यः विभीषणः ।
अजरश्चामरश्चैव कल्पयित्वा बभूव ह ॥२४
आषाढस्य तु मासस्य शुक्ला या चाष्टमी भवेत् ।
तस्यां पूज्यः सोपवासश्चामृतत्वमवाप्नुयात् ॥२५

पूर्वे पूर्णेरितं लिङ्गं तस्मिन्स्थाने द्विजोत्तम ।
तं पूजयित्वा यत्नेन सर्वकामानवाप्नुयात् ।।२६

दूषणस्त्रिशिराश्चैव तत्र पूज्य महेश्वरम् ।
यथाऽभिलषितान्कामानापतुस्तौ मुदाऽन्वितौ ।।२७
चैत्रमासे सिते पक्षे यो नरस्तत्र पूजयेत् ।
तस्य तौ वरदौ देवौ प्रयच्छेतेऽभिवाञ्छितम् ।।२८

कौमार अवस्था में ब्रह्मचर्य धारण करके जो पुण्य मनुष्य प्राप्त किया करते हैं वही पुण्य वह प्राप्त करता है जो उस अष्टमी में भगवान् शंकर का अर्चन किया करता है ।२२। जो भी परम सुन्दर रूप—सौभाग्य, धन सम्पत्ति आदि कोई चाहता है वह कुमारेश्वर माहात्म्य से सिद्ध हो जाती हैं—इसमें संशय नहीं है ।२३। उसके उत्तर दिग्भाग में विभीषण ने लिंग का पूजन किया था सो वह अजर और अमर कल्पना करके होगया था ।२४। आषाढ़ मास की शुक्ल पक्ष में जो अष्टमी होवे उसमें पूजा करके उपवास करे तो अमृत्व को प्राप्त कर लेता है ।२५। हे द्विजोत्तम उस स्थान में पूर्व में पूर्णेरित नामक लिंग है, उसका यत्न पूर्वक पूजन करके मनुष्य सभी कामनाओं को पाजाया करता है ।२६। दूषण और त्रिशिरा इन दोनों राक्षसों ने वहाँ महेश्वर प्रभू का पूजन किया था और अपने अभिलषित कामनाओं की उनने प्राप्ति की थी और परम प्रसन्न हुए थे ।२७। चैत्रमास के शुक्ल पक्ष में वहाँ जो मनुष्य यजन करता है उसको वे वरदान देने वाले दो देव उसका अभिवाञ्छित प्रदान किया करते हैं ।२८।

स्थाणोर्वटस्य पूर्वेण हस्तिपादेश्वरः शिवः ।
तं दृष्ट्वा मुच्यते पापैरन्यजन्मनिसंभवैः ।।२९
तस्य दक्षिणतो लिङ्गं हारीतस्य ऋषेः स्थितम् ।
यत्प्रणम्य प्रयत्नेन सिद्धि प्राप्नोति मानवः ।।३०

तस्य दक्षिण पार्श्वे तु पापी तस्य महात्मनः ।
लिङ्गं त्रैलोक्यविख्यातं सर्वपापहरं शिवम् ।।३१

कङ्कालरूपिणा चापि रुद्रेण सुमहात्मना ।
प्रतिष्ठितं महालिङ्गं सर्वपापप्रणाशनम् ।।३२
भुक्तिदं मुक्तिदं प्रोक्तं सर्वकिल्बिषनाशनम् ।
लिङ्गस्य दर्शनादेव ह्यग्निष्टोमफलं लभेत् ।।३३

तस्य पश्चिमदिग्भागे लिङ्गं सिद्धं प्रतिष्ठितम् ।
सिद्धेश्वरंतु विख्यातं सर्वसिद्धिप्रदायकम् ।।३४
तस्य दक्षिणदिग्भागे मृकण्डेन महात्मना ।
तत्र प्रतिष्ठितं लिङ्गं दर्शनात्सिद्धिदायकम् ।।३५

स्थाणुवट के पूर्व भाग में हस्ति पादेश्वर शिव विराजमान हैं। उनका दर्शन करके मनुष्य अन्य पूर्व जन्मों में होने वाले पापों से मुक्त हो जाता है ।।२६।। उसके दक्षिण में हारीत ऋषि के लिङ्ग स्थित हैं जिनको प्रयत्न पूर्वक प्रणाम करके मनुष्य सिद्धि को प्राप्त करता है ।।३०।। उसके दक्षिण पार्श्व में उसी महात्मा की वापी है और लिंग त्रिलोकी में विख्यात सब पापों का हरण करने वाले शिव हैं ।।३१।। सुन्दर महान् आत्मा वाले कङ्काल रूपी रुद्र के द्वारा सब पापों के नाश करने वाले महालिंग की प्रतिष्ठा वहाँ पर की गई है ।।३२।। वह महालिंग भोगों को तथा मोक्ष के देने वाला और समस्त पापों को क्षय कर देने वाला बताया गया है। लिंग के दर्शन मात्र से ही मनुष्य अग्निष्टोम यज्ञ के पुण्य-फल को प्राप्त किया करता है ।।३३।। उसके पश्चिम दिग्भाग में सिद्ध लिंग प्रतिष्ठित हैं और सिद्धेश्वर—इस नाम से विख्यात हैं जो समस्त सिद्धियों के प्रदान करने वाले हैं ।।३४।। उसके दक्षिण में महात्मामृकण्ड के द्वारा लिंग प्रतिष्ठापित किये गये हैं जो केवल दर्शन से ही सिद्धियों के देने वाले हैं ।।३५।।

तस्य पूर्वे च दिग्भागे आदित्येन महात्मना ।
प्रतिष्ठितं लिङ्गवरं सर्वकिल्बिषनाशनम् ।।३६
चित्राङ्गदस्तु गन्धर्वो रम्भा चाप्सरसां वरा ।
परस्परं सानुरागौ स्थाणुदर्शनकाङ्क्षिणौ ।।३७

दृष्ट्वा स्थाणुं पूजयित्वा सानुरागौ परस्परम् ।
आगम्य वरदं देवं प्रतिष्ठाप्य महेश्वरम् ।।३८

चित्राङ्गदेश्वरं दृष्ट्वा तथा रम्भेश्वरं द्विज ।
सुभगो दर्शनीयश्च कुले जन्म समाप्नुयात् ।।३९
तस्य दक्षिणतो लिङ्गं वज्रिणा स्थापितंपुरा ।
तस्य प्रसादात्संप्राप्तं मनसा चिन्तितं फलम् ।४०

पराशरेण मुनिना तथैवाराध्य शङ्करम् ।
प्राप्तं कवित्वं परम दर्शनाच्छङ्करस्य च ।।४१
वेदव्यासेन मुनिना आराध्य परमेश्वरम् ।
सवज्ञत्वं ब्रह्मज्ञानं प्राप्तं देवप्रसादतः ।।४२

उसके पूर्व दिग्भाग में महात्मा आदित्य के द्वारा प्रतिष्ठापित श्रेष्ठ लिंग सब किल्विषों के नाश करने वाले हैं ।।३६।। चित्राङ्गद नाम वाला गन्धर्व और अप्सराओं में परम श्रेष्ठ रम्भा दोनों परस्पर में अनुराग से युक्त थे और स्थाणु के दर्शन करने की आकांक्षा वाले भी थे ।।३७।। उनने दर्शन करके और पूजन करके परस्पर में अनुराग से युक्त होकर वे वहाँ आये और विरद देव महेश्वर की प्रतिष्ठा की थी ।।३८।। चित्रांगदेश्वर का तथा रम्भेश्वर का दर्शन करके हे द्विजगण ! मनुष्य सुभग-दर्शनीय और उच्चकुल में जन्म प्राप्त किया करता है ।।३९।। उसके दक्षिण में वज्री (इन्द्र) के द्वारा स्थापित एक लिंग है जो पहिले किया गया था । उसके प्रसाद से मन से जो चिन्तन किया जाता है वही फल प्राप्त हो गया था ।।४०।। पराशर मुनि ने उसी भाँति से भगवान् शङ्कर की समाराधना की थी और परम श्रेष्ठ कवित्व प्राप्त किया था जो कि शंकर के केवल दर्शन से ही हो गया था ।।४१।। वेद व्यास मुनि ने परमेश्वर की आराधना करके देव के प्रसाद से सर्वज्ञत्व ब्रह्मज्ञान प्राप्त कर लिया था ।।४२।।

स्थाणोः पश्चिमदिग्भागे लिङ्गं हिमवतेश्वरम् ।
प्रतिष्ठितं पुण्यकृता दर्शनात्सिद्धिकारकम् ।।४३

तस्यापि पश्चिमे भागे कार्तवीर्येण स्थापितम् ।
लिङ्गं पापहरं सद्यो दर्शनात्पुण्यमाप्नुयात् ॥४४

तस्याप्युत्तरतो भागे सुपार्श्वस्थापितं पुनः ।
अराध्य हनुमांश्चाप सिद्धि देव प्रसादतः ॥४५

तस्यैव पूर्वदिग्भागे विष्णुना प्रभविष्णुना ।
आराध्य वरदं देव चक्रमध्ये सुदर्शनम् ॥४६
तस्यापि पूर्वदिग्भागे इन्द्रेण वरुणेन च ।
प्रतिष्ठिते लिङ्गवरे सर्वकामप्रदायके ॥४७

एतानि मुनिभिः साध्यैरादित्यैर्वसुभिस्तथा ।
सेवितानि प्रयत्नेन सर्वपापहराणि वै ॥४८
स्वयंभुवं तथा स्थाणुमृषिभिस्तत्त्वदर्शिभिः ।
प्रतिष्ठितानि लिङ्गानि येषां संख्या न विद्यते ॥४९

स्थाणु के पश्चिम में हिमवतेश्वर लिंग हैं जो पुण्यकारी लोगों ने प्रतिष्ठापित किये हैं और दर्शन मात्र से ही सिद्धियों के कर देने वाले हैं ॥४३॥ उसके भी पश्चिम भाग में कार्त्तवीर्य्य के द्वारा प्रतिष्ठापित लिंग हैं जो सब पापों के हरण करने वाले हैं और तुरन्त ही दर्शन से पुण्य प्राप्त कराने वाले हैं ॥४४॥ उसके भी उत्तर भाग में सुपार्श्व के द्वारा स्थापित लिंग हैं जिसकी आराधना करके देव प्रसाद से हनुमान् ने सिद्धि प्राप्त की थी ॥४५॥ उसके भी पूर्व दिग्भाग में प्रभविष्णु विष्णु के द्वारा स्थापित लिंग है जिन्होंने वरद देव की आराधना करके चक्र के मध्य में सुदर्शन प्राप्त किया था ॥४६॥ उसके भी पूर्व दिग्भाग में इन्द्र और वरुण के द्वारा दो श्रेष्ठ लिंग प्रतिष्ठापित किये गये थे और जो ससस्त कामनाओं के प्रदान करने वाले थे ॥४७॥ ये सब लिंग मुनि-साध्य, आदित्य और वसुगण के द्वारा प्रयत्न से सेवित्त हैं तथा सभी पापों के हरण करने वाले हैं ॥४८॥ स्वयम्भू तथा स्थाणु का तत्वदर्शी ऋषियों के द्वारा लिङ्गों की प्रतिष्ठा की गई है जो इतने हैं कि कोई भी उनकी संख्या नहीं हो सकती हैं ॥४९॥

तस्यामुत्तरतश्चैव यावदोघवती नदी ।
सहस्रमेकं लिङ्गानां देवपश्चिमतः स्थितम् ॥५०
तस्यापि पूर्वदिग्भागे वालखिल्यैर्महात्मभिः ।
प्रतिष्ठिता रुद्रकोटिर्यावत्सन्निहितं सरः ॥५१
दक्षिणेन तु देवस्य गन्धर्वैर्यक्षकिन्नरैः ।
प्रतिष्ठितानि लिङ्गानि येषां संख्या न विद्यते ॥५२
तिस्रः कोटयोर्धकोटी च लिङ्गानां वायुरब्रवीत् ।
असंख्याताः सहस्राणि यद्रुद्रस्थानमाश्रिताः ॥५३
एतज्ज्ञात्वा श्रद्दधानः स्थाणुलिङ्गं समाश्रयेत् ।
यस्य प्रसादात्प्राप्नोति मनसा चिन्तितं फलम् ॥५४
अकामो वा सकामो वा प्रविश्य स्थाणुमन्दिरम् ।
विमुक्तः पातकैर्घोरैः प्राप्नोति परमं पदम् ॥५५

उसके उत्तर में जहाँ तक ओघवही नदी है देव के पश्चिम में स्थित एक सहस्र लिंग स्थित हैं ॥५०॥ उसके भी पूर्व में वालखिल्य महात्माओं के द्वारा प्रतिष्ठापित रुद्र कोटि है जहाँ तक सर सन्निहित है ॥५१॥ देव के दक्षिण में गन्धर्व और किन्नरों के द्वारा प्रतिष्ठित इतने अधिक लिंग हैं जिनकी कोई संख्या ही नहीं है ॥५२॥ वायुदेव ने यह कहा था कि साढ़े तीन करोड़ लिंग हैं। जो रुद्र के स्थान में समाश्रित हैं वे सहस्रों हैं और असंख्यात हैं ॥५३॥ यह जान कर श्रद्धा करते हुए स्थाणु लिंग का समाश्रय करना चाहिए जिसके प्रसाद से मन के द्वारा चिन्तित कामना को मनुष्य प्राप्त किया करता है ॥५४॥ कामना से युक्त हो या निष्काम भाव वाला हो भगवान् स्थाणु के मन्दिर में प्रवेश करके परम घोर पातकों से विमुक्त हो जाता है और अन्त समय में परम पद की प्राप्ति कर लेता है ॥५५॥

चैत्रे मासे त्रयोदश्यां दिव्यनक्षत्रयोगतः ।
शुक्रार्कचन्द्रसंयोगे दिने पुण्यतमेशुभे ॥५६
प्रतिष्ठितं स्थाणुलिङ्गं ब्रह्मणा लोकधारिणा ।
ऋषिभिर्देवसंघैश्च पूजितं शाश्वतीः समाः ॥५७

तस्मिन्काले निराहारा मानवाः श्रद्धयाऽन्विताः ।
पूजयन्ति शिवं ये वै ते यान्ति परमं पदम् ।।५८
तत्रारूढमिदं ज्ञात्वा कुर्वन्ति च प्रदक्षिणाम् ।
प्रदक्षिणीकृता तैस्तु सप्तद्वीपा वसुन्धरा ।।५६

चैत्रमास में त्रयोदशी तिथि के दिन किसी दिव्य नक्षत्र के योग से शुक्र-रवि अथवा चन्द्रवार के संयोग होने पर प्रति पुण्यतम शुभ दिन में लोकों के धारण करने वाले ब्रह्माजी ने इस स्थाणु लिंग की प्रतिष्ठा की थी और सहस्र वर्षों से इस लिंग की ऋषिगण तथा देव संघों के द्वारा अर्चना की गई है ।।५६-५७।। उस समय में आहार का त्याग करके श्रद्धा भाव पूर्णतया समन्वित होते हुए जो मनुष्य भगवान् शिव का यजन करते हैं वे परम पद को निश्चय ही प्राप्त हुआ करते हैं ।।५८।। यह वहाँ पर आरूढ़ हैं यह समझ कर जो इन की प्रदक्षिणा करते हैं उन्होंने मानो सातों द्वीपों वाली पूर्ण पृथ्वी की ही परिक्रमा करली है अर्थात् सम्पूर्ण वसुंधरा की प्रदिक्षणा का फल प्राप्त हो जाता है ।।५६।।

—— ——

४७—वेग चरित्र तथा शिव-स्तुति

स्थाणुतीर्थप्रभावं तु श्रोतुमिच्छाम्यहं मुने ।
केन सिद्धिरिह प्राप्ता सर्वपापभयापहा ।।१
शृणु सर्वमशेषेण स्थाणुमाहात्म्यमुत्तमम् ।
यच्छ्रुत्वा सर्वपापेभ्यो मुक्तो भवति मानवः ।।२
एकार्णवेजगत्यस्मिन्नष्टे स्थावरजङ्गमे ।
विष्णोर्नाभिसमुद्भूतः सर्वलोकपितामहः ।।३
तस्मान्मरीचिरभवन्मरीचेः कश्यपः सुतः ।
कश्यपादभवद्भास्वांस्तस्मान्मनुरजायत ।।४
मनोस्तु क्षुवतः पुत्र उत्पन्नो मुखसंभवः ।
पृथिव्याश्चतुरन्ताया राजा धर्मस्य रक्षिता ।।५

तस्य पत्नी बभूवाथ भया नाम भयावहा ।
मृत्योः सकाशादुत्पन्ना कालस्य दुहिता तदा ॥६
तस्यां समभवद्वेनो दुरात्मा वेदनिन्दकः ।
स दृष्ट्वा पुत्रवदनं क्षुतो राजा वनं ययौ ॥७

मार्कण्डेयजी मुनि ने कहा—हे मुनि ! मैं स्थाणु तीर्थ के प्रभाव का श्रवण करने की अभिलाषा रखता हूँ । यहां पर किसने सिद्धि की प्राप्ति की थी जो समस्त पापों के भयों का अपहरण करने वाली है ? ॥१॥ महामुनीन्द्र सनत्कुमार जी ने कहा—अत्युत्तम स्थाणु तीर्थ का जो महात्म्य है उस का पूर्ण रूप से ही अब आप मुझसे श्रवण करना जिसको सुनकर मानव सभी पापों से छुटकारा पाजाया करता है ॥२॥ इस सम्पूर्ण स्थावर और जंगम चराचर जगत् के विनष्ट हो जाने पर जब तक मात्र समुद्र ही यहाँ पर था । उस में भगवान् क्षीर शायी विष्णु की नाभि से समुत्पन्न यह सब लोकों के पितामह हुए थे ॥३॥ उन ब्रह्मा से मरीचि हुए, मरीचि से कश्यप और कश्यप से भास्वान् हुए थे और उनसे मनु ने अपना जन्म ग्रहण किया था ॥४॥ मनु से मुख से सम्भव वाला क्षुवत पुत्र समुत्पन्न हुआ था जो इस चतुरन्ता पृथिवी का धर्म की रक्षा करने वाला राजा था ॥५॥ उसकी पत्नी भया नाम वाली अति भयावहा हुई थी । वह मृत्यु के सकाश से समुत्पन्न हुई थी और उस समय में काल की पुत्री थी ॥६॥ उसमें राजा वेन उत्पन्न हुआ था जो अत्यन्त दुष्ट प्रकृति वाला और वेदों की निन्दा करने वाला था वह राजा क्षुन उस पुत्र के मुख को ही देखकर वन में चला गया था ॥७॥

तत्र कृत्वा तपो घोरं धर्मेणावृत्य रोदसी ।
प्राप्तवांस्तत्परं धाम पुनरावृत्तिदुर्लभम् ॥८
वेनो राजा समभवत्समस्ते क्षितिमण्डले ।
स मातामहदोषेण वेनः कालात्मजात्मजः ॥९
घोषयामास नगरे दुरात्मा वेदनिन्दकः ।
न दातव्यं न यष्टव्यं न होतव्यं कदाचन ॥१०

अहमेकोऽत्र वैवन्द्यः तूज्योऽहं भवतां स ।
मया हि पालिता यूयं निवसध्वं यथासुखम् ।।११

तन्मत्तोऽन्यो न देवोऽस्ति युष्माकं यत्परायणम् ।
एतच्छ्रुत्वा तु वचनमृषयः सर्व एव ते ।।१२

परस्परं समागम्य राजानं वाक्यमब्रुवन् ।
श्रुतिः प्रमाणं धर्मस्य ततो यज्ञः प्रतिष्ठितः ।।१३
यज्ञैर्विना नो प्रीयन्ते देवाः स्वर्गनिवासिनः ।
अप्रीता न प्रयच्छन्ति सस्यस्य च विवृद्धये ।।१४

वहाँ पर उसने अत्यन्त घोर तपश्चर्या की थी और धर्म से द्यावा पृथ्वी को आवृत कर दिया था । उसने पुनः आवृत्ति से दुर्लभ जो परम धाम था उसकी प्राप्ति करली थी अर्थात् ऐसा धाम पा गया था जहाँ से पुनः जन्म ही नहीं होता है ।।८।। फिर इस समस्त क्षिति मण्डल में वेन राजा हुआ था । वह अपने मातामह के दोष से कालात्मजा का पुत्र वेन था ।।६।। उस दुरात्मा वेद निन्दक ने नगर में घोषणा करादी थी कि कोई भी दान न करे—यजन न करे और किसीको भी कभी हवन भी नहीं करना चाहिए ।।१०।। उसने घोषणा में सबसे यही कहा था कि केवल मैं ही एक मात्र वन्दना करने के योग्य हूँ और आप सबका सदा मैं ही एकमात्र पूज्य हूँ । मेरे द्वारा ही पालित हुए आप सब सुख पूर्वक निवास किया करते हैं ।।११।। इसलिये मुझको छोड़कर अन्य कोई भी देव आपका नहीं है जिसमें आप परायण हों । उसके इस वचन को सुन कर सब ऋषिगण परस्पर में मिलकर उसके पास गये और राजा से यह वचन बोले । धर्म का प्रमाण श्रुति है फिर इसके लिये यज्ञों की प्रतिष्ठा हुई है ।।१२-१३।। यज्ञों के बिना स्वर्ग के निवासी देवगण कभी प्रसन्न नहीं होते हैं । जब वे प्रसन्न नहीं हैं । तो सत्य की वृद्धि नहीं किया करते हैं ।।१४।।

तस्माद्यज्ञैश्च देवैश्च धार्यते सचरारम् ।
एतच्छ्रुत्वा क्रोधदृष्टिर्वेनः प्राह पुनः पुनः ।।१५

न यष्टव्यं न दातव्यमित्याह क्रोध मूर्च्छितः ।
ततः क्रोधसमाविष्टा ऋषयः सर्व एव ते ॥१६
निर्जघ्नुर्मन्त्रपूतैस्ते कुशैर्वज्रसमन्वितैः ।
ततस्त्वराके लोके तमसा सवृते तदा ॥१७
दस्युभिः पीड्यमानास्तानृषींस्ते शरण ययुः ।
ततस्ते ऋषयः सर्वे ममन्थुस्तस्य वै करम् ॥१८
सव्य तस्मात्समुत्तस्थौ पुरुषो ह्रस्वदर्शनः ।
तमूचुर्ऋषयः सर्वे निषीदतु भवानिति ॥१६
तस्मान्निषादा उत्पन्ना वेनकल्मषसंभवाः ।
ततस्ते ऋषयः सर्वे ममन्थुर्दक्षिणं करम् ॥२०

इसलिये यज्ञों के द्वारा और देवगण के द्वारा ही यह चराचर जगत् धारण किया जाता है। यह सुनते ही क्रोध की दृष्टि वाला बारम्बार यही बोला—यजन नहीं करना चाहिए—दान नहीं देना चाहिए—इतना कहकर वह क्रोध से मूर्छित हो गया था। इसके अनन्तर सब ऋषियों को भी क्रोधावेश हो गया था ॥१५-१६॥ उन्होंने मन्त्रों से अभिमन्त्रित वज्र के समान कुशाओं से उसका हनन कर दिया था। इसके पश्चात् सम्पूर्ण लोक राजा से रहित होगया था और उस समय में तमसे समावृत हो गया था ॥१७॥ तब दस्युओं के द्वारा उत्पीड़ित लोग उन्हीं ऋषियों की शरण में समागत हुए थे। तब उन समस्त ऋषियों ने उनके हाथ का मन्थन किया था ॥१८॥ वाम कर के मन्थन करने पर उससे एक छोटे आकार वाला पुरुष उठकर खड़ा हो गया था। उससे समस्त ऋषियों ने कहा— आप बैठ जाइये ॥१६॥ उससे वेन के कल्मषों से समुत्पन्न निषाद उत्पन्न हुए थे। इसके अनन्तर उन ऋषियों ने उसके दक्षिण कर का मन्थन किया था ॥२०॥

मथ्यमाने करे तस्मिन्नुत्पन्नः पुरुषोऽपरः ।
बृहच्छैलप्रतीकाशो दिव्यलक्षणलक्षितः ॥२१
धनुर्बाणाङ्कितकरश्चक्रध्वजसमन्वितः ।
तमुत्पन्नं तद दृष्ट्वा सर्वे देवाः सवासवाः ॥२२

अभ्यषिञ्चन्पृथिव्यां तं राजानं भूमिपालकम् ।
ततः स रञ्जयामासा धर्मेण पृथिवीं तदा ॥२३
पित्रा विरञ्जिता तस्य तेन सा परिपालिता ।
ततो राजेति शब्दोऽस्य पृथिव्या रञ्जनादभूत् ॥२४
स राज्यं प्राप्य वैन्यस्तु चिन्तयामास पार्थिवः ।
पिता मम अधर्मिष्ठो यज्ञविच्छित्तिकारकः ॥२५
कथं तस्य क्रिया कार्या परलोकसुखावहा ।
इत्येवं चिन्तयानस्य नारदोऽभ्याजगामह ॥२६
तस्मै स चासनं दत्त्वा प्रणिपत्य च पृष्ठवान् ।
भगवन्सर्वलोकस्य जानासि त्व शुभाशुभम् ॥२७
पिता मम दुराचारो देवब्राह्मणनिन्दकः ।
स्वधर्मरहितो विप्र परलोकमवाप्तवान् ॥२८

उस करके मथ्यमान होने पर उसमें एक दूसरा पुरुष उत्पन्न हुआ था जो एक विशाल शैल के समान था और दिव्य लक्षणों से समन्वित दिखलाई देता था ।२१। उसका कर धनुष और वाण से अंकित था तथा चक्र एवं ध्वज से भी समन्वित था । उसको समुत्पन्न देखकर इन्द्र के सहित सब देवताओं ने पृथिवीमें भूमि का पालक राजा बना कर उसका अभिषेक किया था । इसके अनन्तर उसने उस समय भी धर्मनीति से पृथिवी की सुप्रसन्न कर दिया था ।२२-२३। उसके पिता ने जिस पृथिवी को अनीति से विरञ्जित कर दिया था उसका उसने भलीभाँति परिपालन किया था । तभी से पृथिवी के रञ्जन करने से "राजा"-- इस शब्द की समुत्पत्ति हुई थी ।२४। उस राजा ने वेन के राज्य की प्राप्ति करके विचार किया था कि मेरा पिता तो अधर्म्मिष्ठ था जिसने यज्ञों की भी विच्छित्ति कर दी थी ।२५। अब उसकी परलोक में सुख देने वाली क्रिया किस प्रकार से करनी चाहिए । इस प्रकार से वह जब चिन्तन कर रहा था उसी समय में नारद वहाँ पर आगये थे ।२६। उस राजा ने उन देवर्षि को आसन समर्पित करके प्रणाम किया था और उसने पूछा था । हे भगवन् ! आप तो सम्पूर्ण लोक के शुभ-अशुभ

को भली भाँति जानते है ।२७। मेरा पिता महान् दुष्ट आचार वाला था और देवों तथा ब्राह्मणों की निन्दा करने वाला था। ऐसे ही अपने धर्म से रहित होकर हे विप्र ! अब वह परलोक में चला गया है।२८।

ततोऽब्रवीन्नारदस्तं ज्ञात्वा दिव्येन चक्षुषा ।
म्लेच्छमध्ये समुत्पन्नः क्षयकुष्ठसमन्वितः ।।२९
तच्छ्रुत्वा वचनं तस्य नारदस्य महात्मनः ।
चिन्तयामास दुःखार्त्तः कथं कार्यं मया भवेत् ।।३०

इत्येवं चिन्तयानस्य मतिर्जाता महात्मनः ।
पुत्रः स कथ्यते लोके यः पितृंस्त्रायते भयात् ।
एवं संचिन्त्य स तदा नारदं पृष्टवान्मुनिम् ।।३१
गच्छ त्वं तस्य तं देहं तीर्थेषु कुरु निर्मलम् ।
यत्र स्नातो महत्तीर्थं सरः सान्निहितं प्रति ।।३२

एतच्छ्रुत्वा तु वचनं नारदस्य महात्मनः ।
चिन्तयामास तं देशं राजा स च जगाम ह ।।३३
स गत्वा उत्तरं देशं म्लेच्छमध्ये ददर्श ह ।
कुष्ठरोगेण तं वीक्ष्य क्षयेण च समन्वितम् ।।३४
ततः शोकेन महता संतप्तो वाक्यमब्रवीत् ।
हा म्लेच्छा नौमि पुरुषं स्वगृहं च नमाम्यहम् ।।३५

इसके पश्चात् देवर्षि नारदजी ने अपनी दिव्य चक्षु के द्वारा उसे देखकर यह उस राजा से कहा था—वह म्लेच्छों के मध्य में उत्पन्न हुआ है और क्षय तथा कुष्ट रोग से पीड़ित है।२९। महात्मा नारद के इस वचन को सुनकर वह अत्यन्त दुःख से पीड़ित होकर सोचने लगा कि मुझे कैसे क्या करना चाहिए ।।३०।। इस प्रकार से चिन्तित करते हुए ही उसकी ऐसी बुद्धि समुत्पन्न हुई थी कि लोक में पुत्र तो वही कहा जाता है जो अपने पितागण को भय से त्राण करता है (पुनाम वाले नरक से जो त्राण करता है वही पुत्र है) इस प्रकार से भली भाँति चिन्तन करके उसने उसी समय में नारद जी से पूछा था ।।३१।। नारद

जी ने कहा—आप यदि अपने पिता का उद्धार चाहते हैं तो आप तीर्थों में चले जाइये और उसके देह को तीर्थों में निर्मल करिये। सन्निहित सर महान् तीर्थ हैं उसमें स्नान करिये ॥३२॥ महात्मा नारद के इस वचन को सुन कर राजा ने उसी देश का विचार किया और वह वहाँ पर चला गया था ॥३३॥ उसने उत्तर देश में जाकर म्लेच्छों के मध्य में देखा था। उसने उसको कुष्ठ रोग से पीड़ित तथा क्षय रोग से युक्त देखा ॥३४॥ इसके पश्चात् वह महान् शोक से संतप्त होकर यह वाक्य बोला—हा ! म्लेच्छो ! मैं इस पुरुष को नमस्कार करता हूं और उसे अपने घर ले जाता हूं ॥३५॥

तत्राहमेनं निरुज करिष्ये यदि मन्यथ ।
तदेति सर्वतो म्लेच्छाः पुरुषं त दयापरम् ॥३६
ऊचुः प्रणतसर्वाङ्गा यथा जानासि तत्कुरुः ।
तत आनीय पुरुषाञ्छिबिकावाहनोचितान् ॥३७
दत्त्वा शुल्कं च द्विगुणं सुखेनानीय तान्द्विज ।
ततः श्रुत्वा तु वचनं तस्य राज्ञो दयावतः ॥३८
गृहीत्वा शिबिकां क्षिप्रं कुरुक्षेत्रेण यान्ति ते ।
तत्र नीत्वा स्थाणुतीर्थमवतीर्य ततो गताः ॥३९
ततः स राजा मध्याह्ने तं स्नापमितुमुद्यतः ।
ततो वायुरन्तरिक्षे इदं वचनतब्रवीत् ॥४०
मा तात साहसं कार्षीस्तीर्थं रक्ष प्रयत्नतः ।
अयं पापेन घोरेण अतीव परिवेष्टितः ॥४१
वेदनिन्दा महत्पापं तस्यान्तो नेव लभ्यते ।
सोऽय स्नातो महत्तीर्थं नाशयिष्यति तत्क्षणात् ॥४२

यदि आप लोग मुझे अनुमति दें तो मैं इसे ले जाकर वहाँ इसे निरोग करूँगा। तब 'तथास्तु' अर्थात् ऐसा ही आप करें, ऐसा सभी ओर से म्लेच्छों ने उस दया परायण पुरुष से कहा था। सबने उसे प्रणिपात किया था और कहा था कि जो भी कुछ आप जानते हैं वही

करिये। इसके पश्चात् शिविका (पालकी) के वाहन करने में समर्थ पुरुषों को वहाँ लाकर उन्हें दुगुना पारिश्रमिक देकर हे द्विज! सुख पूर्वक उनको लाकर उपस्थित किया था। इसके अनन्तर उस दयालु राजा के वचन सुनकर उन्होंने शिविका उठा ली और शीघ्र ही वे कुरुक्षेत्र की ओर गमन करने लगे थे। वहाँ स्थाणु तीर्थ में ले जाकर उतर कर फिर वे चले गये थे ॥३६-३९॥ इसके अनन्तर वह राजा मध्यान्ह समय में उसको स्नान कराने के लिये उद्यत हुआ था। इसके पश्चात् वायुदेव आकाश में यह वचन बोले ॥४०॥ हे तात! ऐसा साहस मत करो। प्रयत्न पूर्वक इस तीर्थ की रक्षा करो। यह महान् घोर पाप में अत्यन्त परिवेष्टित हो रहा है ॥४१॥ वेदों की निन्दा करना सबसे बड़ा पाप है उस पाप का कभी भी अन्त नहीं दिखलाई देता है। वह यह यदि इस तीर्थ में स्नान करेगा तो इस अति महान् तीर्थ का उसी समय में नाश कर देगा ॥४२॥

एतद्वायोर्वचः श्रुत्वा दुःखेन महताऽन्वितः।
उवाच शोकसंतप्तस्तस्य दुःखेन दुःखितः।
एष घोरेण पापेन ह्यतीव परिवेष्टितः ॥४३
प्रायश्चित्तं करिष्येऽहं यद्वदिष्यन्ति देवताः।
ततस्ता देवताः सर्वा इद वचनमब्रुवन् ॥४४
स्नात्वा स्नात्वा च तीर्थे त्वमभिषिञ्चस्व वारिणा।
आगसो लुम्पनं यावत्प्रतिकूलां सरस्वतीम् ॥४५
स्नात्वा मुक्तिमवाप्नोति पुरुषः श्रद्धयाऽन्वितः।
एष स्वपोषणपरो देवदूषणतत्परः ॥४६
ब्राह्मणैश्च परित्यक्तो नैप शुद्धयति कर्हिचित्।
तस्मादेनं समुद्दिश्य स्नात्वा तीर्थेषु भक्तितः ॥४७
अभिषिञ्चस्व तोयेन ततः पूतो भविष्यति।
इत्येतद्वचनं श्रुत्वा कृत्वा तस्याश्रमं ततः ॥४८
तीर्थयात्रां ययौ राजा उद्दिश्य जनकं स्वकम्।
स तेष्वाप्लवनं कुर्वंस्तीर्थेषु च दिनेदिने ॥४९

वायुदेव के इस वचन का श्रवण करके यह राजा महान् दुःख से युक्त हो गया था। उसके दुःख से अत्यन्त दुःखित होकर महान् शोक से संतप्त हो गया था उस राजा ने कहा—यह महान् घोर पापों से अत्यन्त परिवेष्टित हो रहा है ॥४३॥ मैं इसका प्रायश्चित करूँगा और जो भी देवगण बतायेंगे वही करूँगा। इसके अनन्तर सब देयताओं ने यह वचन कहा था ॥४४॥ तुम बारम्बार तीर्थ में स्नान करके इस तीर्थ के जल से अभिषिञ्चन करो। जब तक सरस्वती प्रतिकूल है बराबर अभिषिञ्चन करते रहो। इससे इसके अपराधों का लुम्पन होगा ॥४५॥ फिर श्रद्धा से अन्वित होकर यह पुरुष स्नान करके मुक्ति को प्राप्त कर लेगा। यह सदा ही अपने ही पोषण में तत्पर रहा था और देवों को दूषण देने में ही सर्वदा परायण बना रहा था ॥४६॥ यह ब्राह्मणों के द्वारा परित्यक्त कर दिया गया था। इसलिये यह कभी भी शुद्ध नहीं हो सकता है। इसी वास्ते इसका उद्देश्य लेकर तीर्थों में भक्ति के भाव से स्नान करके इसका तीर्थों के जल से अभिषिञ्चन करो तभी यह पवित्र हो जायगा। इस वचन को सुनकर फिर उसका एक आश्रम बनाया था ॥४७-४८॥ राजा ने अपने पिता का उद्देश्य करके तीर्थ यात्रा को गमन किया था वह आये दिन तीर्थों में आप्लवन करता रहता था ॥४९॥

अभ्यषिञ्चत्स्वपितरं तीर्थतोयेन नित्यशः।
एतस्मिन्नेव काले तु सारमेयो जगाम ह ॥५०

स्थाणोर्मठे कौलपतिर्देवद्रव्यस्य रक्षिता।
परिग्रहस्य द्रव्यस्य परिपालयिता सदा ॥५१

प्रियश्च सर्वलोकेषु देवकार्यपरायणः।
तस्यैव वर्त्तमानस्य धर्ममार्गे स्थितस्य च ॥५२
कालेन चलिता बुद्धिर्देवद्रव्यस्य नाशने।
तेनाधर्मेण युक्तस्य परलोकगतस्य च ॥५३

दृष्ट्वा यमोऽब्रवीद्वाक्यं श्वयोनिं व्रज माचिरम्।
तद्वाक्यानन्तरं जातः श्वा वै सौगन्धिके वने ॥५४

ततः कालेन महता श्वयूथपरिवारितः ।
परिभूतः सारमेयो दुःखेन महता वृतः ॥५५
त्यक्त्वा द्वैतवनं पुण्यं सांनिहत्यं ययौ सरः ।
तस्मिन्प्रविष्टमात्रस्तु स्थाणोरेव प्रसादतः ॥५६
अतीव तृषया युक्तः सरस्वत्यां ममज्ज ह ।
तत्र संप्लुतदेहस्तु विमुक्तः सर्वकिल्बिषैः ॥५७

राजा नित्य प्रति तीर्थों के जल से अपने पिता का अभिषिञ्चन किया करता था । इसी समय में एक सारमेय चला गया था ॥५०॥ स्थाणु के मठ में देव-द्रव्यों की रक्षा करने वाला कौलपति था जो परि-पालन करने वाला था ॥५१॥ वह समस्त लोकों में प्रिय और देवों के कार्य में परायण रहता था । इस प्रकार से वर्तमान रहने वाले तथा धर्म कार्यों में स्थित उसकी बुद्धि चलित हो गई थी और देव-द्रव्य के नाश करने में संलग्न हो गई थी । उस अधर्म से युक्त वह जब परलोक गामी हुआ तो यमराज ने उसको देखकर यह वचन कहा—तू कुत्ते की योनि में जाओ किन्तु अधिक समय तक नहीं । इस वाक्य के अनन्तर वह कुत्ता सौगन्धिक वन में समुत्पन्न हुआ था ॥५२-५४॥ इसके अनन्तर बहुत समय के बाद एक बार वह कुत्तों के यूथ से घिरा हुआ परिभूत हो गया था और महान् दुःख से युक्त हो गया ॥५५॥ उस द्वैतवन का त्याग कर वद संनिहत्य सर पर चला गया था । उस सर में जैसे ही उसने प्रवेश किया था भगवान् स्थाणु देव के प्रसाद से अत्यन्त तृषा से युक्त होकर उसने सरस्वती में मज्जन किया था । वहाँ पर देह को संप्लुत करके ही वह समस्त किल्विषों से मुक्त हो गया था ॥५६ ५७॥

आहारलोभेन तदा प्रविवेश कुलंमठम् ।
प्रविशन्तं तदा दृष्ट्वा श्वानं भयसमन्वितम् ॥५८
स तं पस्पर्श शनकैः स्थाणुतीर्थे ममज्ज ह ।
पतितः पूर्वतीर्थेषु विप्रुषैः परिषेचितः ॥५९
शुनोऽस्य गात्रसंभूतैरब्बिन्दुभिः स सिञ्चितः ।
विरक्तदृष्टिः स शुनः क्षणेन च ततः परम् ॥६०

स्थाणुतीर्थस्य माहात्म्यात्स पुत्रेण च तारितः ।
नियतस्तत्क्षणाज्जातो दिव्यदेहसमन्वितः ।
प्रणिपत्य तदा स्थाणुं स्तुतिं कर्त्तुं प्रचक्रमे ॥६१

प्रपद्ये देवमीशानं त्वामजं चन्द्रभूषणम् ।
महादेवं महात्मानं विश्वस्य जगतः पतिम् ॥६२
नमस्ते देवदेवेश सर्वशत्रुनिषूदन ।
देवेश बलिविष्टम्भिन्देवैर्दैत्यश्च पूजित ॥६३

विरूपाक्ष सहस्राक्ष त्र्यक्ष यक्षेश्वरप्रिय ।
सर्वतः पाणिपाद त्वं सर्वतोऽक्षिशिरोमुख ॥६४

उस समय में आहार के लोभ से कुल मठ में प्रवेश किया था । तब भय से युक्त प्रवेश करते हुए श्वान को देखकर उसने धीरे से उसका स्पर्श किया था और स्थाणु तीर्थ में मज्जन किया था । पतित पूर्व तीर्थों में विन्दुओं से परिषेञ्चित हुआ ॥५८-५६॥ इस कुत्ते के शरीर से समुत्पन्न जल की विन्दुओं से वह सिञ्चित हो गया । क्षण भर के लिये कुत्ते से विमुक्त दृष्टि वह हो गया था और इसके आगे स्थाणु तीर्थ के महात्म्य से उसको पुत्र ने तार दिया था । फौरन ही वह दिव्य देह से समन्वित होकर नियत होगया और उसी समय स्थाणु देव को प्रणिपात करके उसने स्थाणु देव की स्तुति करना आरम्भ कर दिया था ॥६०-६१॥ वेन ने कहा—अजन्मा चन्द्र से भूषण वाले देव ईशान महादेव महान् आत्मा वाले इस विश्व और जगत् के स्वामी आपकी मैं शरणागति में हूँ ॥६२॥ हे देवदेवेश ! आप सब शत्रुओं के नाशक है । हे देवेश ! आप बलि के विष्टम्भ करने वाले हैं और देवों तथा दैत्यों के द्वारा अर्चित हैं । आप विरूपाक्ष-सहस्राक्ष-त्र्यक्ष (तीनों नेत्रों वाले) और यक्षेश्वर के प्रिय हैं । अपके सभी ओर पाणि तथा पाद हैं तथा सभी ओर नेत्र शिर एवं मुख हैं ॥६३-६४॥

सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठसि ।
शङ्कुकर्ण महाकर्ण कुम्भकर्णार्णवालय ॥६५

गजेन्द्रकर्ण गोकर्ण पाणिकर्ण नमोऽस्तु ते ।
शतजिह्व शतावर्त शतोदर शतानन ॥६६
गायन्ति त्वां गायत्रिणोह्यर्कयन्त्यर्ककर्मकिणः ।
ब्रह्माणं त्वा शतक्रतोरूर्ध्वं त्वामिह मेनिरे ॥६७

मूर्त्तौ हि ते महामूर्त्ते समुद्रास्तु धरा तथा ।
देवताः सर्व एवात्र गोष्ठे गाव इवासते ॥६८
शरीरे तव पश्यामि सोममग्निजलेश्वरम् ।
नारायणं तथा सूर्यं ब्रह्माणं च बृहस्पतिम् ॥६९
भगवन्कारणं कार्यं क्रिया कारणमेव तत् ।
प्रभवः प्रलयश्चैव सदसच्चापि दैवतम् ॥७०

आप सब ओर श्रुतिमान् हैं और लोक में सब को आवृत्त करके स्थित हैं, आप शंकुकर्ण-महाकर्ण-कुम्भकर्ण तथा सागर में आलय बनाने वाले है ॥६५। आप गजेन्द्र के समान कर्ण वाले-गोकर्ण-पाणि कर्ण हैं ऐसे आपके लिये नमस्कार है । आप शत जिह्वा वाले हैं–शतावर्त्त हैं–शतोदर एवं शत आनन वाले हैं ॥६६॥ गायत्रिण लोग आपका गान किया करते हैं और अर्क कर्म वाले आपका अर्चन किया करते हैं। ब्रह्मा आपको यहाँ शतक्रतु से भी ऊर्ध्व मानते थे ॥६७॥ हे महान् मूर्त्ति वाले आपकी मूर्त्ति में समस्त समुद्र तथा धरा–सब देवगण गोष्ठ में गौओं की तरह ही यहां निवास किया करते हैं ॥६८॥ हे भगवन् आपके शरीर में सोम–अग्नि -जलेश्वर-नारायण सूर्य ब्रह्मा और वृहस्पति इन सबका स्थित होना मैं देखता हूँ ॥६९॥ हे भगवन् ! आप ही कारण कार्य्य क्रिया और वही कारण हैं । आप प्रभव प्रलयसत् और दैवत भी हैं ॥७०॥

नमो भवाय शर्वाय वरदायोग्ररूपिणे ।
अन्धकासुरहन्त्रे च पशूनांपतये नमः ॥७१
त्रिजटाय त्रिशीर्षाय त्रिशूलासक्तपाणये ।
त्र्यम्बकाय त्रिनेत्राय त्रिपुरघ्न नमोऽस्तु ते ॥७२

नमो दण्डाय चण्डाय अण्डायोत्पत्तिहेतवे ।
डिण्डिमासक्तहस्तायं दण्डिमुण्डाय ते नमः ॥७३

नमोर्ध्वंकेशदंष्ट्राय शुक्लायाविकृताय च ।
धूम्रलोहितकृष्णाय नीलग्रीवाय ते नमः ॥७४
नमोऽस्त्वप्रतिरूपाय विरूपाय शिवाय च ।
सूर्यमालाय सूर्याय स्वरूपध्वजमालिने ॥७५

नानाभिरामाय नमः पटुतराय च ।
नमो गणेन्द्रनाथाय वृषस्कन्धाय धन्विने ॥७६
संक्रन्दनाय चण्डाय पणधारपुटाय च ।
नमो हिरण्यवर्णाय नमः कनकवर्चसे ॥७७

भव-शर्व-वरदाय तथा उग्ररूपी आपके लिये नमस्कार है। अन्धक असुर के हनन करने वाले और पशुओं के पति आपके लिये नमस्कार है ॥७१॥ त्रिजटा-त्रिशीर्ष और त्रिशूल में आसक्त हाथ वाले-त्र्यम्बक-त्रिनेत्र और त्रिपुर के हनन करने वाले आपके लिये नमस्कार है ॥७२॥ दण्डरूप-चण्ड तथा अण्ड स्वरूप-उत्पत्ति के हेतु-डिण्डिम में समासक्त करने वाले और दण्डि मुण्ड आपके लिये नमस्कार है ॥७३॥ ऊर्ध्व केश और दंष्ट्रा वाले-शुक्ल-अविकृत-धूम्र, लोहित और कृष्ण वर्णों वाले तथा नील वर्ण की ग्रीवा वाले आपके लिये प्रणाम है ॥७४॥ अप्रति रूप वाले-विरूप-शिव-सूर्य माल-सूर्य और स्वरूप ध्वज माली आपके लिये नमस्कार है ॥७५॥ नाना भाँति के अभिराम स्वरूप वाले आपको प्रणाम है और सबसे अधिक कुशल आपको नमस्कार है। गणेन्द्र नाथ-वृषस्कन्ध-धन्वी आपको नमस्कार है ॥७६॥ संक्रन्दन-चण्ड-पर्ण धार पुट-हिरण्य वर्ण और कनक वर्चस आपके लिये नमस्कार है ॥७७॥

नमः स्तुताय स्तुत्यायः स्तुतिस्थाय नमोऽस्तु ते ।
सर्वाय सर्वभक्षाय सर्वभूतशरीरिणे ॥७८
नमो होत्रे च हन्त्रे च सितोदग्रपताकिने ।
नमो नमाय मन्त्राय नमः कटकटाय च ॥७९

नमोऽस्तु कृशनशाय शयिता योत्थिताय ।
स्थिताय धामसाराय मुण्डाय कुटिलाय च ॥८०

नमो नर्त्त नशीलाय लयवादित्रशालिने ।
नाट्योपहारलुब्धाय मुखवादित्रशालिने ॥८१
नमो ज्येष्ठाय श्रेष्ठाय बलातिबलघातिने ।
कालनाशाय कालाय संसारक्षयरूपिणे ॥८२

हिमवद्दुहितुर्भर्त्रे भैरवाय नमोऽस्तु ते ।
उग्राय च नमो नित्यं नमोऽस्तु दशबाहवे ॥८३
चितिभस्मप्रियायैव कपालासक्तपाणये ।
विभीषणाय भीष्माय हिमव्रतधराय च ॥८४

स्तुत स्तुति के योग्य स्तुति में संस्थित आपको प्रणाम है। सर्व-सर्वभक्ष और सर्व भूतों के शरीर वाले आपको नमस्कार है ॥७८॥ होता हन्ता और शितोदग्र पताकी आपको प्रणाम है। नम-मन्त्र रूप और कट कट आपके लिये नमस्कार है ॥७९॥ कृशनश शयित-उत्थित-स्थित-धाम सार-मुण्ड- और कुटिल आपको प्रणाम है ॥८०। नृत्य करने के स्वभाव वाले तथा लय और वादित्र शाली आपके लिये नमस्कार है। नाटचोपहार के लोभी तथा मुख के द्वारा वादित्र बजाने की शोभा वाले आपको मेरा प्रणाम है।८१। ज्येष्ठ-श्रेष्ठ और बल में अति बल-वान के घात करने वाले काल के नाशक-काल स्वरूप और संसार के क्षय करने के रूप से समन्वित आप के लिये मेरा नमस्कार है।८२। हिमवान् की दुहिता पार्वती के स्वामी भैरव आप के लिये नमस्कार है। उग्र स्वरूप आपको नित्य ही नमस्कार है। दश बाहुओं वाले आपको मेरा प्रणाम है।८३। चिता की भस्म से प्यार करने वाले तथा हाथ में कपाल ग्रहण करने वाले-विभीषण-भीष्म और हिम व्रत के धारण करने वाले आपके लिये नमस्कार है।८४।

नमो विकृतवक्त्राय वक्रप्रान्तोग्रदृष्टये ।
पक्वाममांसलुब्धाय तुम्बीवीणाप्रियाय च ॥८५

नमो वृषाङ्कवृष्टाय गोमिने ते नमो नमः ।
कटङ्कटाय भीमाय नमः पचपचाय च ।।८६
नमः सर्ववरिष्ठाय वराय वरदायिने ।
नमो विरक्तवक्राय भावनायाक्षमालिने ।।८७
विभेदभेदभिन्नाय छायायै तपनाय च ।
अघोरघोररूपाय घोरघोरतराय च ।।८८
नमः शिवाय शान्ताय नमः शान्ततमाय च ।
बहुनेत्रकपालाय एकमूर्त्ते नमोऽस्तु ते ।।८९
नमः क्षुद्राय लुब्धाय यज्ञभागप्रियाय च ।
पञ्चालाय सिताङ्गाय नमो यमनियामिने ।।९०
नमश्चित्रोरुघण्टाय घण्टाघण्टनिघण्टिने ।
सहस्रशतघण्टाय घण्टामालाविभूषिणे ।।९१
प्राणिसंघट्टघण्टाय नमः किलकिलप्रिय ।
हुंहुंकाराय पाराय हुंकाराय प्रियाय च ।।९२

विकृत वक्र वाले तथा वक्र प्रान्त में उग्र दृष्टि वाले-पक्व आम (कच्चा) आमिष के लुब्धक और तुम्वी तथा वीणा से प्रेम करने वाले आपको नमस्कार है।८५। वृषाङ्कवृष्ट—गोमी आपके लिये बारम्बार नमस्कार है। कटंकट—भीम और पचपच आपको प्रणाम है।८६। सब में अति श्रेष्ठ—वर और वरदान प्रदान करने वाले-विरक्त-वक्र और भावना के लिये यक्ष माली आपको नमस्कार है।८७। विशेष भेद से भेदभिन्न, छाया, तपन, अघोर घोर रूप वाले, घोर से भी घोरतर शान्त स्वरूप शिव के लिये मेरा नमस्कार है तथा परम शान्ततम स्वरूप वाले के लिये प्रणाम है। वहुत नेत्र और कपाल वाले के लिए हे एक मूर्त्ते! आपके लिये मेरा नमस्कार है।।८८-८९।। क्षुद्र-लुब्ध और यज्ञ के भाग पर प्यार करने वाले आपको मेरा नमस्कार है। पञ्चाल–सिताङ्ग और यमों के नियामी आपको मेरा प्रणाम है।९०। चित्रोरु घण्ट तथा घण्टा घण्ट निघण्टी—सहस्र शत घण्टा वाले और घण्टाओं की माला के भूषण वाले आपको नमस्कार है।९१। हे किलकिल प्रिय!

वाणियों के संघट्ट के घण्टा वाले आपको नमस्कार है। हुं हुंकार स्वरूप-पार हुंकार और प्रिय के लिये नमस्कार है।६२।

नमः समसमे नित्यं गृहवृक्षनिकेतिने।
गर्भमांसशृगालाय तारकाय तराय च ॥६३
नमो यज्ञाय यजिने हुताय प्रहुताय च।
यज्ञवाहाय हव्याय तप्याय तपनाय च ॥६४
नमस्तुण्डाय तुण्डयाय तुण्डानां पतये नमः।
अन्नदायान्नपतये नमो नानान्नभोजिने ॥६५
नमः सहस्रशीर्षाय सहस्रचरणाय च।
सहस्रोद्यतशूलाय सहस्राभरणाय च ॥६६
बालानुचरगोत्रे च बालोलीलाविलासिने।
नमो बालाय वृद्धाय क्षुब्धाय क्षोभणाय च ॥६७
गङ्गालुलितकेशाय मुञ्जकेशाय वै नमः।
नमः षट्कर्मतुष्टाय त्रिकर्मनिरताय च ॥६८

नित्य ही समसम तथा वृक्ष में निकेतन वाले आपको नमस्कार है। हे गर्भ माँस शृगाल-तारक, तर को नमस्कार है।६३। यज्ञरूप, यजी, हुत प्रहुत, यज्ञवाह, हव्य, तप्य और तपन के लिये मेरा नमस्कार है ॥६४॥ तुण्ड-तुण्डय और तुण्डों के पति के लिये मेरा प्रणाम है। अन्न का दान करने वाले-अन्न के पति और अनेक प्रकार के अन्नों के भोजन करने वाले आपको मेरा नमस्कार है।६५। सहस्र शीर्षों वाले-सहस्र चरण-युक्त-सहस्रोद्योत शूल और सहस्र आभरण वाले आपको नमस्कार है।६६। बालामुचर गोत्र, बाल लीला के विलास वाले बाल, वृद्ध, क्षुब्ध और क्षोभण के लिये नमस्कार हैं ॥६७॥ गंगा से अंगुलित केशों वाले और मुञ्जकेश आपको मेरा प्रणाम है। षट्कर्म्म से तुष्ट होने वाले त्रिकर्म्म में निरत के लिये नमस्कार है।६८।

नग्नप्राणाय चण्डाय कृशायास्फोटनाय च।
धर्मार्थकाममोक्षाणां कथ्याय कथनाय च ॥६९
साङ्ख्याय साङ्ख्यमुख्याय साङ्ख्ययोगमुखाय च।
नमो विरथरथ्याय चतुष्पथरथाय च ॥१००

कृष्णाजिनोत्तरीयाय हरिकेश नमोऽस्तु ते ।
त्र्यम्बिकाम्बिकनाथाय व्यक्ताव्यक्ताय वेधसे ॥१०१
काम कामद कामघ्न तृप्तातृप्त विचारिणे ।
नमः सर्वदयापघ्न कल्पसंध्याविचारिणे ॥१०२
महासत्त्वमहाबाहो महाबल नमोऽस्तु ते ।
महामेघधरप्रख्य महाकाल महाद्युते ॥१०३
मेघावर्त्त युगावर्त चन्द्रार्कपतये नमः ।
त्वमन्नमन्नभोक्ता च पक्वभुक्पावनोऽनलः ॥१०४
जरायुजाश्चाण्डजाश्च स्वदोद्भिज्जाश्च ते नमः ।
त्वमेव देवदेवेश भूतग्रामश्चतुर्विधः ॥१०५

नग्न प्राणों वाले, चण्ड, कृश, आस्फोटन, धर्म अर्थ काम मोक्षों के कथ्य और कथन के लिये नमस्कार है ।९९। साङ्ख्य, साङ्ख्य, मुख्य-साङ्ख्य योग मुख्य विरथरथ्य और चतुष्पथ रथ के लिये मेरा नमस्कार है ।१००। कृष्णमृग चर्म के उत्तरीय वाले हे हरिकेश ! आपको नमस्कार है । त्र्यम्बिकाम्बिक नाथ-व्यक्ताव्यक्त और वेधा के लिये नमस्कार-है ।१०१। काम, कामद, कामघ्न, तृप्ता तृप्त, विचारी, सर्वदयापघ्न, कल्पसन्ध्या विचारी के लिये मेरा नमस्कार है ।१०२। हे महासत्व ! हे महाबाहो ! हे महाबल ! आपको मेरा नमस्कार है । हे महा मेघ-धर प्रख्य ! हे महाकाल ! हे महाद्युति वाले ! मेधा वर्त्त, युगा वर्त्त और चन्द्र तथा सूर्य के स्वामी आपको मेरा प्रणाम है । आप ही अन्न हैं और आप ही अन्न के भोक्ता भी हैं तथा आप पक्व भोजी-पावन और अनल हैं ।१०३-१०४। आप ही जरायुज, अण्डज, स्वेदज और उद्भिज्ज हैं ऐसे आपकी सेवा में मेरा नमस्कार समर्पित है । हे देव देवेश ! आप ही चार प्रकार के भूतग्राम हैं ।१०५।

स्रष्टा चराचरस्यास्य पाता हन्ता तथैव च ।
त्वामाहुर्ब्रह्मविद्वांसः परं ब्रह्मविदां गतिः ॥१०६
मनसः परमं ज्योतिर्ज्योतिस्त्वं ज्योतिषामपि ।
हंसो वृक्षे मधुकरः प्राहुस्त्वां ब्रह्मवादिनः ॥१०७

यज्ञ ेष्ठकाः श्रेष्ठकश्च त्वामाहुमुनयस्तथा ।
पठ्यसे स्तुतिभिर्नित्यं वेदोपनिषदां गणैः ।।१०८
ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा वर्णावराश्च ये ।
त्वमेव मेघसंघाश्च विद्युतोऽशनिगर्जितम् ।।१०६
संवत्सरस्त्वमृतवो मासो मासार्धमेव च ।
युगानि मेषाःकाष्ठाश्च नक्षत्राणि ग्रहाबलाः ।।११०
वृक्षाणां ककुभोऽसि त्वं गिरीणां हिमवान्गिरिः ।
व्याघ्रो मृगाणां पततां ताक्ष्योऽनन्तश्च भोगिनाम् ।।१११
क्षीरोदोऽस्युदधीनां च यन्त्राणां धनुरेव च ।
वज्रं प्रहरणानां च व्रतानां सत्यमेव च ।।११२

इस चराचर विश्व के सृजन करने वाले पालक और हन्ता आप ही हैं। ब्रह्म के ज्ञाता लोग आपको ही ब्रह्म वेत्ताओं की परम गति कहते हैं ।१०६। आप मन की परम ज्योति हैं तथा ज्योतियों की भी ज्योति हैं। ब्रह्मवादी लोग आपको हंस-वृक्ष और मधुकर कहा करते हैं ।१०७। मुनिगण आपको यज्ञ ेष्ठक श्रेष्ठक कहा करते हैं। वेदों और उपनिषदों के समूहों के द्वारा आपका ही नित्य प्रति स्तवन पढ़ा जाया करता है ।१०८। ब्राह्मण, क्षत्रिय, वैश्य, शूद्र और जो भी वर्णावर हैं वे सभी आपकी ही स्तुति किया करते हैं। आप ही मेघों के संघ रूप हैं आप ही विद्युत तथा वज्र का गर्जित हैं ।१०६। आप ही सम्वत्सर हैं—ऋतुऐं हैं—मास, मासार्ध भी आप ही हैं। युग, मेष, नक्षत्र और ग्रह वल भी आप ही का स्वरूप है ।११०। आप वृक्षों में ककुभ हैं और गिरिवरों में आप हिमवान् गिरि हैं। मृगों में आप ही व्याघ्र का स्वरूप धारण करने वाले हैं। पतन शीलों में ताक्ष्य आप ही हैं और भोगियों में अनन्त आपका ही स्वरूप है ।१११। उदधियों में क्षीर सागर आप ही हैं तथा यन्त्रों में धनु आप हैं। प्रहरणों में वज्र आपका ही रूप है। तथा व्रतों में सत्य आप हैं ।११२।

त्वमेव द्वेष इच्छा च रागो मोक्षः क्षमाक्षमे ।
व्यवसायो धृतिर्लोभः कामक्रोधो जयाजयौ ।।११३

त्वं शरी त्वं गदी चापि खट्वाङ्गी च शरासनी।
छेत्ता भेत्ता प्रहर्ताऽसि मन्ता नेता सनातनः ॥११४
दशलक्षणसंयुक्तो धर्मोऽर्थः काम एव च।
समुद्राः सरितो गङ्गा पर्वताश्च सरांसि च ॥११५
लतावल्लयस्तृणौषध्यः पशवो मृगपक्षिणः।
पृथुकर्मगुणारम्भः कालः पुष्पफलप्रदः ॥११६
आदिश्चान्तश्च वेदानां गायत्री प्रणवस्तथा।
लोहितो हरितो नीलः कृष्णः पीतः सितस्तथा ॥११७
कद्रुश्च कपिलश्चैव कपोतो मेचकस्तथा।
सवर्णश्चाप्यवर्णश्च कर्त्ता हर्त्ता त्वमेव हि ॥११८
त्वमिन्द्रश्च यमश्चैव वरुणो धनदोऽनिलः।
उपप्लवस्तत्र भानुः स्वर्भानुर्भानुरेव च ॥११९

हे भगवन् ! आप ही द्वेष-इच्छा, राग, मोक्ष, क्षमा, अक्षमा है। आप ही व्यवसाय, धृति, लोभ, काम, क्रोध, जय और अजय हैं ।११३। आप ही शरों वाले, गदा से युक्त, खट्वांगी और शरासन धारी हैं। आप छेदन कर्त्ता, भेदनकारी, प्रहरण करने वाले, मन्ता, नेता और सनातन हैं ।११४। दश लक्षणों से समन्वित धर्म-अर्थ और काम भी आप ही का स्वरूप है। सब समुद्र-समस्त नदियाँ, गंगा, पर्वत समुदाय सब सरोवर, लता वल्ली, तृणौषधियाँ, पशुगण, मृग पक्षी ये सभी आपका ही स्वरूप हैं। पृथु कर्म्म, गुणारम्भ, पुष्प और फलों के प्रदान करने वाला काल भी आप ही हैं ।११५-११६। आदि, अन्त, वेदों की गायत्री-प्रणव, लोहित, हरित, नील, कृष्ण, पीत, सित ये वर्ण भी आपके ही स्वरूप हैं ।११७। कद्रु, कपिल, कपोत, मेचक, सवर्ण, अवर्ण और कर्त्ता तथा हर्त्ता भी आप ही हैं ।११८। आप ही इन्द्र हैं आप ही यम भी हैं। वरुण, धनद, अनिल, उपप्लव, भानु, स्वर्भानु और भानु भी आप ही हैं ।११९।

शिष्या हौत्रं त्रिसौपर्णं यजुषां शतरुद्रियम्।
पवित्रं च पवित्राणां मङ्गलानां च मङ्गलम् ॥१२०

तिन्दुको गिरिजौ वृक्षो मुद्गं चाखिलजोविनाम् ।
प्राणाः सत्त्वं रजश्चैव तमश्च प्रतिपप्रतिः ॥१२१
प्राणोऽपानः समानश्च उदानो व्यान एव च ।
उन्मेषश्च निमेषश्च क्षुतं जृम्भितमेव च ॥१२२
लोहितान्तर्गतोदृष्टिर्महावक्रो महोदरः ।
शुचिरोमा हरिश्मश्रु रूर्ध्वकेशश्चलाचलः ॥१२३
गीतवादित्रनृत्यज्ञो गीतवादित्रकप्रिय ।
मत्स्यो जालो जलौकाश्च कालकेलिः कलाकलिः ॥१२४
अकालश्च विकालश्च दुष्कालः काल एवच ।
मृत्युश्च मृत्युकर्त्ता च यज्ञो यज्ञभयंकरः ॥१२५
संवर्त्तकोऽन्तकश्चैव संवर्त्तकवलाहकः ।
घण्टो घण्टी महाघण्टी चरी माली च मातलिः ॥१२६

शिष्यगण, होत्र, त्रिसौपर्ण, यजुर्वेदियों का शत रुद्रिय, पवित्रों में परम पवित्र और मंगलों में अतीव मंगल भी आप हैं ।१२०। तिन्दुक, गिरिज, वृक्ष, मुद्ग, समस्त जीव धारियों के प्राण, सत्य, रज, तम, प्रतिपत्तित आप ही हैं ।१२१। प्राण, अपान, समान, उदान, व्यान, उन्मेष, निमेष, क्षुत, जृम्भित भी आप ही का स्वरूप है ।१२२। लोहितान्तर्गत, दृष्टि, महावक्त्र, महोदर, शुचिरोमा, हरिश्मश्रु, ऊर्ध्वकेश, चलाचल आप हैं ।१२३। गीत और वादित्र तथा नृत्य के ज्ञाता और गीत वादित्र को प्यार करने वाले आप हैं । मत्स्य, जाल (मछलियों को फँसाने वाला) जलौका, काल केलि, कलाकेलि, अकाल, विकाल, दुष्काल काल, मृत्यु, मृत्यु के करने वाले, यज्ञ और यज्ञ के भयंकर संवर्त्तक, वलाहक, घण्ट, घण्टी, महाघण्टी, चारी, माली और मातलि भी आप ही है । १२४-१२६।

ब्रह्म कालयमाग्नीनां दण्डी मुण्डी त्रिमुण्डधृक ।
चतुर्युगश्चतुर्वेदश्चातुर्होत्रप्रवर्त्तकः ॥१२७
चातुराश्रम्यनेता च चातुर्वर्ण्यकरस्तथा ।
नित्यलक्षप्रियो मूर्तो गणाध्यक्षो गणाधिपः ॥१२८

रक्तमाल्याम्बरधरो गिरिको गैरिकप्रियः ।
शिल्पी च शिल्पिनां श्रेष्ठः सर्वशिल्पप्रवर्त्तकः ॥१२९
भगनेत्राङ्कुशः शंभुः पूष्णो दन्तविनाशनः ।
स्वाहा स्वधावषट्कारो नमस्कारो नमो नमः ॥१३०
गूढव्रतो गुह्यतपास्तारकस्तारकामयः ।
धाता विधाता संधाता पृथिव्या धरणे परः ॥१३१
ब्रह्मा तपश्च सत्यं च व्रतचर्यमथार्जवम् ।
भूतात्मा भूतकृद्भूतिर्भूतभव्यभवोद्भवः ॥१३२
भूर्भुवः स्व ऋतश्चैव ध्रुवो दंतो महेश्वरः ।
दीक्षितोऽदीक्षितः कान्तो दुर्दान्तो दान्तसंभवः ॥१३३

ब्रह्म, काल, यम और अग्नि को दण्ड देने-मुण्डी त्रिमुण्डों को धारण करने वाले-चारों युग-चार वेद-चातुर्होत्र प्रवर्त्तक आप हैं ॥१२७॥ चारों आश्रमों के नेता-चारों वर्णों के रचने वाले नित्य लक्ष प्रिय-मूर्त्त-गुणों के अध्यक्ष और गणों के अधिप भी आप ही हैं ॥१२८॥ एकवर्ण की माला तथा अम्बर के धारण करने वाले-गिरिक तथा गैरक पर प्रीति रखने वाले-शिल्पी-शिल्पकला के ज्ञाताओं में श्रेष्ठ और समस्त प्रकार के शिल्पों के प्रवर्त्तक आप ही हैं ॥१२९॥ भगनेत्र के अङ्कुश-शम्भु-पूष्ण के दन्तों का विनाश करने वाले-स्वाहा-स्वधा-वषट्कार-नमस्कार और नमोनम भी आपही का स्वरूप हैं ॥१३०॥ गूढ़ व्रत वाले-गुह्यतपा, तारक, तारकामय, धाता, विधाता, सन्धाता और पृथिवी का धारण करने में पर भी आप ही हैं ॥१३१॥ ब्रह्मा, तप, सत्य व्रत चर्य, आजर्व, भूतात्मा, भूत कृत्, भूति, भूत, भव्य और भवोद्भव भी आप ही हैं ॥१३२॥ भूः, भुवः, स्वः, ऋतु, ध्रुव, दन्त, महेश्वर दीक्षित, अदीक्षित, कान्त दुर्दान्त और दान्तसंभव भी आप हैं ॥१३३॥

चन्द्रावर्तो युगावर्त्तः संवर्त्तः संप्रवर्त्तकः ।
विन्दुः कामो ह्यणुः स्थूलः कर्णिकारस्रजप्रियः ॥१३४
नन्दिमुखो भीममुखः सुमुखो दुर्मुखस्तथा ।
हिरण्यगर्भः शकुनिर्महोरगपतिर्विराट् ॥१३५

अधर्महा महादेवो दण्डधारो गणोत्कटः ।
गोनर्दो गोप्रातारश्च गोवृषेश्वरवाहनः ॥१३६
त्रैलोक्यगोप्ता गोविन्दो गोमार्गो मार्ग एव च ।
स्थिरः श्रेष्ठश्च स्थाणुश्च विकोपः कोप एव च ॥१३७
दुर्वारणो दुर्विषहो दुःसहो दुरतिक्रमः ।
दुर्द्धर्षो दुष्प्रकाशश्च दुर्दर्शो दुर्जयो जयः ॥१३८
शशाङ्कनलशीतोष्णक्षुत्तृषाश्च जरामयाः ।
आधयो व्याधयश्चैव आधिहा व्याधिनाशनः ॥१३९
समूहश्चासमूहश्च हन्ता देवः सनातनः ।
शिखण्डी पुण्डरीकाक्षः पुण्डरीकवनालयः ॥१४०

चन्द्रावर्त्त–युगावर्त्त–संवर्त्त–संप्रवर्त्तक–विन्दु–काम–अणु-स्थूल–कर्णिकार स्रज को प्यार करने वाले आप है ॥१३४॥ नन्दि मुख, भीम मुख, सुमुख, दुर्मुख, हिरण्यगर्भ, शकुनि, महोरग पति, विराट, अधर्महा महादेव, दण्डधार, गणोत्कट, गोमर्द, गोप्रतार, गो वृषेश्वर वाहन आपका स्वरूप है ॥१३५-१३६॥ आप त्रैलोक्य के गोप्ता हैं। गोविन्द, गोमाग, मार्ग, स्थिर, श्रेष्ठ, स्थाणु, विकोप, कोप आपके ही रूप हैं ॥१३७॥ दुर्वारण-दुर्विषह-दुःसह-दुरति क्रम-दुर्धर्ष-दुष्प्रकाश, दुर्दर्श, दुर्जय, जय आप ही हैं ॥१३८॥ शशांक, नल, शीत, उष्ण, क्षुत, तृषा, जरा, आमय, आधि (मानसिक व्यथा) व्याधियाँ, आधियों को हरण करने वाले व्याधियों के नाशक आप ही हैं ॥१३९॥ समूह, असमूह, हन्ता और सनातन देव आप ही हैं। शिखण्डी, पुण्डरीकाक्ष, पुण्डरीक वनालय आपका ही स्वरूप है ॥१४०॥

त्र्यम्बको दण्डधारश्च उग्रदंष्ट्रः कुलान्तकः ।
विषाग्र्यैयः सुरश्रेष्ठः सोमपास्त्व मरुत्पते ॥१४१
अमृताशी जगन्नाथो वेददेवगणेश्वरः ।
विषाग्निपाः सोमपाश्चक्षीरपा आज्यपास्तथा ॥१४२
मधुश्च्युतानां मधुपा ब्रह्मवांस्त्वं घृतच्युतः ।
सर्वलोकस्य भोक्ता त्वं सर्वलोकपितामहः ॥१४३

हिरण्यरेताः पुरुषस्त्वमेकस्त्वं स्त्रीपुमांस्त्वं हि नपुंसकं च ।
बालो युवास्थविरो जीर्णदंष्ट्रस्त्वन्ते गिरिर्विश्वकृद्विश्वकर्त्ता ।।
त्वं वै धाता विश्वकृतो वरेण्यस्त्वां पूजयन्ति प्रणताः सदैव ।
चन्द्रादित्यौ चक्षुषी ते भवानी त्वमेव चाग्निःप्रपितामहश्च ।
सरस्वती वाग्बलमूलभूता अहोरात्रे निमिषोन्मेषकर्त्ता ।।१४५
न ब्रह्मा न च गोविन्दः पौराणा ऋषयो न ते ।
माहात्म्यं वेदितुं शक्ता याथातथ्येन शंकर ।।१४६
पुंसां शतसहस्राणि यत्समावृत्य तिष्ठति ।
महतस्तमसः पारे गोप्ता मन्ता भवान्सदा ।।१४७

त्र्यम्बक, दण्डधार, उग्रदष्ट्र, कुलान्तक, विश्वगण गणों से जो सुर श्रेष्ठ सोमपा हैं हे मरुत्पते ! वह आप ही हैं ।।१४१।। आप अमृताशी, जगन्नाथ, वेद और देवगण के ईश्वर है। विषाग्निपा, सोमपा, क्षीर पान करने वाले और आज्य (घृत) पीने वाले भी आप ही हैं ।।१४२।। मधुश्च्युतों के मधुपा, ब्रह्मवान् और घृतच्युत आप हैं। समस्त लोक के भोक्ता तथा सब के पितामह भी आप ही हैं ।।१४३।। आप हिरण्य रेता पुरुष हैं, आप एक हैं, आप ही पुमान् हैं, स्त्री भी आप ही हैं तथा नपुंसक भी आप ही हैं। बाल, युवा स्थविर, जीर्ण दंष्ट्र, अन्तेगिरि, विश्वकृत्, विश्व कर्त्ता आप ही हैं ।।१४४।। आप ही धाता हैं और विश्व कर्त्ता वरेण्य भी आप ही हैं आपको सब प्रणत होकर सदा ही पूजते है। आपके नेत्र ही चन्द्र तथा आदित्य हैं। आप ही भवानी हैं तथा अग्नि और प्रपितामह भी आप ही हैं। सरस्वती जो वाग्बल की मूल भूत है वह आप ही का स्वरूप है, अहोरात्र, निमिषोन्मेष कर्त्ता भी आप हैं ।।१४५।। ब्रह्मा, गोविन्द और पुराणों के ज्ञाता ऋषि गण हे शंकर ! यथातथ रूप से आपके माहात्म्य को जानने में समर्थ नही होते हैं ।।१४६।। जो शत सहस्र पुरुषों को समावृत करके स्थित रहते हैं महान् तम से परे गोप्ता, मन्ता सदा आप ही हैं ।।१४७।।

यं विनिद्रा जित श्वासाः सत्त्वस्थाः संजितेन्द्रियाः ।
ज्योतिः पश्यन्ति युञ्जानास्तस्मै योगात्मने नमः ।।१४८

या मूर्त्तयश्च सूक्ष्मास्ते न शक्या या निर्दशितुम् ।
याभिर्मां सतत रक्ष पिता पुत्रमिवौरसम् ॥१४६
रक्ष मां रक्षणीयोऽयं तवानघ नमोऽस्तुते ।
भक्तानुकम्पी भगवान्भक्तश्चाह सदात्वयि ॥१५०
जटिने दण्डिने नित्यं लम्बोदरं तथा क्रतो ।
दोघजिह्वा महाद्रष्ट्र तस्मै रुद्रात्मने नमः ॥१५१
यस्य केशेषु जीमूता नद्यः सर्वाङ्गसन्धिषु ।
कुक्षौ समुद्राश्चत्वारस्तस्मै तोयात्मने नमः ॥१५२
सभक्ष्य सर्वभूतानि युगान्तेपर्युपस्थिते ।
यः शेते जलमध्यस्थस्तं प्रपद्येऽम्बुशायिनम् ॥१५३
प्रविश्य वदनं राहोर्यः सोमं पिबते मिशि ।
ग्रसत्र्कं च स्वर्भानु रक्षितस्ते च तेजसा ॥१५४

जिसको निद्रा से रहित तथा श्वासों को जीतने वाले सत्त्व में स्थित और भली भाँति जितेन्द्रिय लोग युञ्जान होकर ज्योति को देखा करते हैं। उस योगात्मा के लिये नमस्कार है ॥१४८॥ जो मूर्त्तियाँ सूक्ष्म हैं वे देखी नहीं जा सकती है उनसे निरन्तर औरस पुत्र को पिता के समान मेरी रक्षा करो ॥१४६॥ मेरी रक्षा करो, मैं आपके द्वारा रक्षा करने के योग्य हूँ। हे अनघ ! आपके लिये मेरा नमस्कार है। आप तो अपने भक्तों पर अनुकम्पा करने वाले भगवान् हैं और मैं सदा आपका परम भक्त हूं ॥१५०॥ जटाधारी, दण्डी, नित्य लम्बोदर तथा क्रतु, दीर्घ जिह्वा वाले, महान् दंष्ट्रा से युक्त रुद्रात्मा आपके लिये नमस्कार है ॥१५१॥ जिसके केशों में जीमूत (मेघ) है तथा सर्वांग सन्धियों में जिसके नदियाँ है, कुक्षि में चारों समुद्र हैं उस तोयात्मा प्रभु के लिये मेरा नमस्कार है ॥१५॥ समस्त भूतों का भली भाँति भक्षण करके युगान्तक के पर्युपस्थित होने पर जो जल के मध्य में स्थित होकर शयन किया करते हैं उन अम्बुशायी प्रभु की मैं शरण में जाता हूं ॥१५३॥ जो राहु के मुख में प्रवेश करके रात्रि में सोम का पान करता है, अर्क को ग्रसता हुआ स्वर्भानु आपके तेज से रहित होता है ॥१५४॥

ये चानुपतिता गर्भा रुद्रतोकस्य रक्षिणः ।
नमस्तेऽस्तु स्वधा स्वाहा प्राप्नुवन्ति मुदं तु ते ।।१५५
येऽङ्गुष्ठमात्राः पुरुषा देहस्थाचरदेहिनाम् ।
रक्षन्तु देहिनां नित्यं ते ममाप्याययन्तु वै ।।१५६
ये नदीषु समुद्रेषु पर्वतेषु गुहासु च ।
वृक्षमूलेषु गोष्ठेसु कान्तारगहनेषु च ।।१५७
चतुष्पथेषु रथ्यासु चत्वरेषु सभासु च ।
हस्त्यश्वरथशालासु जीर्णोद्यानालयेषु च ।।१५८
ये च पञ्चसु भूतेषु दिशासु विदिशासु च ।
चन्द्रार्कयोर्मध्यगता ये च चन्द्रार्करश्मिषु ।।१५९
रसातलगता ये च ये च तस्मात्परं गताः ।
नमस्तेभ्यो नमस्तेभ्यो नमस्तेभ्यश्च नित्यशः ।।१६०
येषांन विद्यते संख्या प्रमाणं रूपमेव च ।
असंख्या ये गणा रुद्रा नमस्तेभ्योऽस्तु नित्यशः ।।१६१
प्रसीद मम भद्रं ते तव भावग तस्य च ।
त्वयि मे हृदयं देव त्वयि बुद्धिर्मतिस्त्वयि ।।१६२
स्तुत्वैवं स महादेवं विरराम द्विजोत्तमः ।।१६३

रुद्रलोक के रक्षी जो गर्भ में अनुपतित हुए उन के लिये नमस्कार है। स्वाहा, स्वधा वे मुद को प्राप्त होते हैं। जो एक अंगुष्ठ मात्र पुरुष स्थावर देह के धारण करने वाले देही हैं वे देहियों की नित्य ही रक्षा करें और मुझे भी तृप्त करें ।।१५६।। जो सरिताओं में—समुद्रों में—पर्वतों, गुफाओं में, वृक्षों के मूलों में, गोष्ठों में-गहन जंगलों में-चतुष्पथों में रथ्याओं में, चत्वरों में, सभाओं में, हस्ती, अश्व और रथ शालाओं में तथा जीर्ण उद्यान और आलयों में एवं जो पाँचों भूतों में, दिशाओं और विदिशाओं, जो चन्द्र और सूर्य के मध्य में गत हैं और जो चन्द्र, सूर्य की रश्मियों में स्थित हैं-जो रसातल में गत हैं और जो उससे भी परे गत हैं उन सबके लिये नमस्कार है उन समस्तों की सेवा में मेरा नित्य ही प्रणाम समर्पित है ।।१५७-१६०।। जिनकी कोई भी संख्या विद्यमान नहीं

है, न कोई प्रमाण ही है और न कुछ रूप है तथा जो असंख्य गण एवं रुद्र हैं उन सबके लिये मेरा नमस्कार है ।।१६१।। आप के भाव में गत मुझ पर आप प्रसन्न होइए । आपका भद्र हो । हे देव ! आप के चरणों में मेरा हृदय है, आप में ही मेरी बुद्धि है और आप ही में मेरी मति है ।।१६२।। इस प्रकार से उन महादेव की स्तुति करके वह द्विजोत्तम विरत हो गया था ।।१६३।।

४८—वेन वर प्रदान वर्णन

अथैनमब्रवीद्देवस्त्रैलोक्याधिपतिर्भवः ।
आश्वासनकरं चास्य वाक्यविद्वाक्यमुत्तमम् ।।१
अहो तुष्टोऽस्मि ते राजन्स्तवेनानेन सुव्रत ।
बहुनाऽत्र किमुक्तेन मत्समीपे वसिष्यसि ।।२
उषित्वा सुचिरं कालं मम गात्रोद्भवः पुनः ।
असुरो ह्यन्धको नाम भविष्यसि सुरान्तकृत् ।।३
हिरण्याक्षगृहे जन्म प्राप्य वृद्धिं गमिष्यसि ।
पूर्वाधर्मेण घोरेण वेदविन्दाकृतेन च ।।४
साभिलाषो जगन्मातुर्भविष्यसि यदा तदा ।
देहं शूलेन हत्वाऽहं पातयिष्ये समार्बुदम् ।।५
तत्रापि कल्मषं त्यक्त्वा दृष्ट्वा मां भक्तितः पुनः ।
ख्यातो गणाधिपो भत्वा नाम्ना भृङ्गरिटिः स्मृतः ।।६

महामुनीन्द्र सनत्कुमारजी ने कहा—इसके अनन्तर त्रैलोक्य के अधिपति भवदेव इससे बोले जो वाक्यों के पूर्ण वेत्ता थे और जो कुछ भी उन्होंने कहा था वह वाक्य अत्युत्तम एवं आश्वासन प्रदान करने वाला था ।।१।। भगवान् शिव ने कहा—हे सुन्दर व्रत वाले राजन् ! मैं आपके इस स्तवन से परम सन्तुष्ट होगया हूं । अब अधिक क्या कहूं यही कहता हूँ अब तुम मेरे ही समीप में निवास करोगे ।।२।। बहुत अधिक समय पर्यन्त मेरे निकट निवास करके फिर मेरे ही गात्र से

उद्भव प्राप्त करके अन्धक नामक असुर होओगे जो सुरों का अन्त करने वाला होगा ॥३॥ हिरण्याक्ष के घर में जाकर अर्थात् जन्म ग्रहण कर वृद्धि को प्राप्त होओगे। यह फल पूर्व में किये हुए घोर अधर्म और वेदों की निन्दा करने से ही प्राप्त होगा ॥४॥ जब कभी जगदम्बा का हृदय साभिलाष होगा तब मैं शूल के द्वारा देह का हनन करके समावुंद पातन करूंगा ॥५॥ वहाँ पर भी कलमष का त्याग करके पुनः मेरा भक्ति पूर्वक दर्शन प्राप्त करके परम प्रसिद्ध गणों का स्वामी होकर भृंगिरिटि नाम से कहा जायेगा ॥६॥

मत्संनिधाने स्थित्वां त्वं ततः सिद्धि गमिष्यसि ।
वेनप्रोक्तं स्तवमिमं कीर्त्तयेद्यः श्रृणोति च ॥७
नाशुभ प्राप्नुयात्किचिद्दीर्घमायुरवाप्नुयात् ।
यथा सर्वेषु देवेषु विशिष्टो भगवाञ्छिवः ॥८
तथा स्तवो वरिष्ठोऽयं स्तवानां वेननिर्मितः ।
यशोराज्यसुखैश्वर्यधनमानार्थकांक्षिभिः ॥९
श्रोतव्यो भक्तिमास्थाय विद्याकामैश्च यत्नतः ।
व्याधितो दुःखितोदीनश्चोरराजभयान्वितः ॥१०
राजकार्यविसुक्तो वा मुच्यते महतो भयात् ।
अनेनैव ते देहेन वर्णानां श्रेष्ठतां व्रजेत् ॥११
तेजसा यशसा चैव युक्तो भवति निर्मलः ।
न राक्षसा पिशाचा वा न भूता न विनायकाः ॥१२
विघ्नं कुर्युर्गृहे तत्र यत्राय पठ्यते स्तवः ।
श्रृणुयाद्या स्तवं नारी अनुज्ञां प्राप्य भर्तृतः ॥१३
मातृपक्षे पितुः पक्षे पूज्या भवति देववत् ।
श्रृणुयाद्यः स्तवं दिव्यं कोर्त्तयेद्वा समाहितः ॥१४

इस प्रकार से मेरे सन्निधान में स्थिति प्राप्त करके फिर आप सिद्धि की प्राप्ति करेंगे। वेन के द्वारा कहे इस स्तव को जो कोई भी कहता है अथवा श्रवण किया करता है वह कुछ भी अशुभ की प्राप्ति नहीं करता है और अति दीर्घ आयु प्राप्त करता है। जिस तरह से

सब देवों में भगवान् शिव विशिष्ट हैं ॥७-८॥ उसी प्रकार से वेन के द्वारा निर्मित यह स्तव समस्त स्तोत्रों में अत्यन्त श्रेष्ठ है। जो पुरुष यश, राज्य, सुख, ऐश्वर्य, धन, मान और अर्थ की आकाङ्क्षा रखने वाले हैं उन्हें भक्ति की भावना में समास्थित होकर इसका श्रवण करना चाहिए। जो विद्या की कामना वाले हैं उन्हें भी यत्नपूर्वक सुनना चाहिए व्याधित, दुःखित, दीन तथा चोर और राजा के भय से समन्वित हो तथा राजकार्य से विमुक्त हो वह महान् भय से विमुक्त हो जाता है और इसी देह से वर्णों की श्रेष्ठता प्राप्त किया करता है ॥९-११॥ वह पुरुष तेज और यश से युक्त होकर निर्मल हो जाता है। राक्षस, पिशाच भूत और विनायक इनमें कोई भी उसके घर में कभी भी विघ्न नहीं किया करते हैं जहाँ पर इस स्तव का पाठ किया है। जो नारी इस स्तव का श्रवण करती है यह अपने स्वामी से अनुज्ञा प्राप्त कर मात पक्ष में तथा पितृ पक्ष में देवी की भाँति पूज्या होती है। जो कोई भी पुरुष समाहित होकर इस दिव्य स्तव का कीर्त्तन करता है अथवा सुनता है वह सर्वत्र सफल होता है ॥१२-१४॥

तस्य सर्वाणि कार्याणि सिद्धिं गच्छन्ति नित्यशः।
मनसा चिन्तितं यच्च वाचाऽनुकीर्त्तितम् ॥१५
सर्वं संपद्यते तस्य स्तवनस्यानुकीर्त्तनात्।
मनसा कर्मणा वाचा कृतमेनो विनश्यति।
वरं वरय भद्रं ते यत्त्वया मनसेप्सितम् ॥१६
अस्य लिङ्गस्य माहात्म्यात्तथा लिङ्गस्य दर्शनात्।
मुक्तोऽहं पातकैः सर्वैस्तव दर्शनतः किल ॥१७
यदि तुष्टोऽसि देवेश यदि देयो वरोमम।
देवस्वभक्षणाज्जातं श्वयोनौ देव सेवकम् ॥१८
एतस्यापि प्रसादं त्वं कर्त्तुमर्हसि शंकर।
एतस्यापि भवान्मध्य सरसोऽहं निमज्जितः ॥१९
दैवैर्निवारितः पूर्वः तीर्थेऽस्मिन्स्नानकारणात्।
अयं कृतोपकारश्च एतदर्थे वृणोम्यहम् ॥२०

तस्यैतद्वचनं श्रुत्वा तुष्टः प्रोवाच शंकरः।
एषोऽपि पापनिर्मुक्तो भविष्यति न संशयः॥२१

वेन–रचित इस स्तव श्रोता तथा वक्ता जो भी कार्य करना चाहता है उसके वे सभी कार्य सिद्ध हो जाया करते हैं चाहे वह मन से किसी कार्य का चिन्तन करे या वाणी से कथन करे वे सभी इस स्तव का कीर्त्तन करने से सम्पन्न हो जाया करते हैं तथा मानसिक और वाचिक पाप एवं कर्म द्वारा कृत पाप तुरन्त नष्ट हो जाता है। तुम्हारा कल्याण हो। जो भी तुम्हारे मन में अभीष्ट हो उस वरदान को अब मुझसे प्राप्त करलो॥१५-१६॥ वेन ने कहा—हे भगवन्! इस लिंग के माहात्म्य से और दर्शन से मैं समस्त पातकों से मुक्त हुआ हूँ तथा आपके दर्शन से मेरी मुक्ति हुई है॥१७॥ हे देवेश! यदि आप मुझ पर पूर्णतया संतुष्ट हैं और आप मुझे कोई वरदान देना चाहते हैं तो हे देव! देवस्व के भक्षण करने से आपका सेवक कुत्ते की योनि में समुत्पन्न होगया है॥१८॥ हे शंकर! इस पर भी आपका प्रसाद होना चाहिए। इसके भी मध्य सर में मैंने निमज्जन किया है॥१९॥ पहिले देवों ने इस तीर्थ में स्नान करने के लिये निवारण किया था किन्तु इसने मेरा उपकार किया था। इसीलिये मैं इसके लिए वरदान चाहता हूं॥२०॥ उसके इस वचन को सुनकर सन्तुष्ट होकर शकर बोले—यह भी पापों से निर्मुक्त होकर छुटकारा पा जायगा—इसमें कुछ भी संशय नही है॥२१॥

प्रसादान्मे महाबाहो शिवलोकं गमिष्यति।
तथा स्तवमिमं श्रुत्वा मुच्यते सर्वपातकैः॥२२

कुरुक्षेत्रस्य माहात्म्यं सरसोऽस्य महीपते।
मम लिङ्गस्य चोत्पत्तिं श्रुत्वा पापैः प्रमुच्यते॥२३

इत्येवमुक्त्वा भगवान्सर्वलोकनमस्कृतः।
पश्यतां सर्वलोकानां तत्रैवान्तरधीयत॥२४

स च श्वा तत्क्षणादेव स्मृत्वा जन्म पुरातनम्।
दिव्यमूर्त्तिधरो भूत्वा त राजानमुपस्थितः॥२५

कृत्वा स्नानं ततो वैन्यः पितृदर्शनलालसः ।
स्थाणुतीर्थे कुटीं शून्यां दृष्ट्वा शोकसमन्वितः ॥२६
दृष्ट्वाऽब्रवीत्ततो वाक्यं हर्षेण महताऽन्वितः ।
सत्पुत्रेण त्वया वत्स त्रातोऽहं नरकार्णवात् ॥२७
त्वयाऽभिषिञ्चितो नित्यं तीर्थस्थपलिने स्थितः ।
अस्य साधोः प्रसादेन स्थाणोवस्य दर्शनात् ॥२८

हे महान् बाहुओं वाले ! मेरे प्रसाद से तुम शिव लोक को चले जाओगे । इस स्तव का श्रवण करके समस्त पातकों से मनुष्य युक्त हो जाता है ॥२२॥ हे महीपते ! कुरुक्षेत्र के इस सर का माहात्म्य और मेरे लिंग की उत्पत्ति को भी सुनकर मानव पापों से छुटकारा पाजाया करता है ॥२३॥ सनत्कुमार जी ने कहा—इस प्रकार से समस्त लोकों के द्वारा नमस्कृत भगवान् ने राजा से कहकर सम्पूर्ण लोगों के देखते रहने पर वहाँ ही वे अन्तर्धान हो गये थे ॥२४॥ और वह कुत्ता अपने पुराने जन्म का स्मरण करके दिव्य मूर्त्ति को धारण करने वाला होकर उस राजा के समीप में उपस्थित हुआ था ॥२५॥ राजा वेन का पुत्र स्नान करके अपने पिता के दर्शन की लालसा वाला हो गया था किन्तु उसने उस स्थाणु तीर्थ में कुटिया को सूनी देखा था और फिर वह शोक से समन्वित हो गया था ॥२६॥ इसके पश्चात् उसने अपने पुत्र को वहाँ पर देखकर यह वाक्य कहा था और महान् हर्ष से युक्त हो गया था हे वत्स ! तू मेरा बहुत ही सुपात्र पुत्र है । तुमने मुझको इस नरक रूपी सागर से उद्धार करके सुरक्षित बना दिया है ॥२७॥ तुमने इस तीर्थ के पुलिन पर संस्थित होकर नित्य ही अभिषिञ्चित किया था । इस साधु के प्रसाद से और स्थाणु देव के दर्शन से मैं सब पापों से छुटकारा पागया हूं ॥२७॥

मुक्तपापश्च स्वर्लोकं यास्ये यत्र शिवः स्थितः ।
इत्येवमुक्त्वा राजानं प्रतिष्टाप्य महेश्वरम् ॥२९
स्थाणुतीर्थे ययौ सिद्धिं तेन पुत्रेण तारितः ।
स च श्वा परमां सिद्धिं स्थाणुतीर्थप्रभावतः ॥३०

विमुक्तः कलुषैः सर्वैर्जगाम भवमन्दिरम् ।
राजा पितृऋणैर्मुक्तः परिपाल्य वसुंधराम् ।।३१
पुत्रानुत्पाद्य धर्मेण कृत्वा यज्ञं निरर्गलम् ।
दत्त्वा कामांश्च विप्रेभ्यो भुक्त्वा भोगान्पृथग्विधान् ।।३२
सुहृदो द्रविणैर्युक्तान्कामैः सतर्प्य च स्त्रियः ।
अभिषिच्य सुतंराज्ये कुरुक्षेत्रं ययो नृपः ।।३३
तत्र तप्त्वा तपो घोरं पूजयित्वा च शंकरम् ।
आत्मेच्छया तनुं त्यक्त्वा प्रयातः परमं पदम् ।।३४
एतत्प्रभाव तीर्थस्य स्याणोर्यः शृणुयान्नरः ।
सर्वपापविनिर्मुक्तः प्रयाति परमां गतिम् ।।३५

अब आप मुक्त होकर में स्वर्गलोक में जाऊंगा जहाँ पर भगवान् शिव साक्षात् विराजमान हैं। इस प्रकार से राजा को कहकर और महेश्वर को प्रतिष्ठापित करके उस पुत्र के द्वारा तारित वह स्थाणु तीर्थं में सिद्धि को प्राप्त हो गया था। और वह कुत्ता भी स्थाणु तीर्थ के प्रभाव से परम सिद्धि को प्राप्त हो गया था ।।२६-३०।। समस्त कलुषों से विमुक्त होकर वह भी शिव के मन्दिर को चला गया था। राजा भी पितृगण का जो ऋण था उससे वसुन्धरा का परिपालन कर मुक्त होगया था ।।३१।। धर्म्म पूर्वक अपने पुत्रों को उत्पन्न करके और निरर्गल यज्ञ करके तथा विप्रों की कामनाओं के अनुसार दान करके एवं पृथक् प्रकार के सुखोय भोगों का भोग करके मित्रगण को भूरिधन धान्य से समन्वित करके-स्त्रियो को कामों से भलीभाँति तृप्त करके और अपने राज्यासन पर पुत्र को अभिषिक्त करके राजा फिर अन्त में कुरुक्षेत्र को चला गया था ।।३२-३३।। वहां पर अत्यन्त घोर तपश्चर्या करके और भगवान् शंकर की समर्चा करके तथा अपनी इच्छा से ही शरीर का त्याग करके परम पद को प्रयाण कर गया था ।।३४।। इस स्थाणु तीर्थ के इस प्रभाव को जो भी कोई मनुष्य श्रवण करता है वह सभी प्रकार के पातकों से छुटकारा पाकर परम गति को प्राप्त हो जाया करता है ।।३५।।

———

४९--चतुर्मुख कृत शिव-स्तुति

चतुर्मुखानामुत्पत्तिं विस्तरेण ममानघ ।
पृथ्वीश्वराणां च तथा श्रोतुमिच्छा प्रवर्त्तते ॥१
शृणु सर्वमशेषेण कथयिष्यामि तेऽनघ ।
ब्रह्मणः स्रष्टुकामस्य यद्वृत्तं पद्मजन्मनः ॥२
उत्पन्न एव भगवान्ब्रह्मा लोकपितामहः ।
ससर्ज सर्वभूतानि स्थावराणि चराणि च ॥३
पुनश्चिन्तयतः सृष्टिं जज्ञे कन्या मनोरमा ।
नीलोत्पलदलश्यामा तनुमध्या सुलोचना ॥४
तां दृष्ट्वाऽभिमतां ब्रह्मा मैथुनाया जुहावताम् ।
तेन पापेन महता शिरोऽशीर्यत वेधसः ॥५
तेन शीर्णेन स ययौ तीर्थं त्रैलोक्यविश्रुतम् ।
सान्निहत्यं सरः पुण्यं सर्वपापक्षयावहम् ॥६
तत्र पुण्ये स्थाणुतीर्थे ऋषिसिद्धनिषेविते ।
सरस्वत्युत्तरे तीरे प्रतिष्ठाप्य चतुर्मुखः ॥७

मार्कण्डेय मुनि ने कहा—चतुर्मुखों की उत्पत्ति हे अनघ ! मुझे विस्तार के साथ कहिए तथा पृथिवी के ईश्वरों की उत्पत्ति भी श्रवण करने की मेरी इच्छा है। तब महा मुनीन्द्र सनत्कुमार जी ने कहा—हे अनघ ! सभी कुछ पूर्ण रूप से सुनो। मैं यह अशेष रूप से कहूंगा। सृष्टि की रचना करने की इच्छा वाले पद्मजन्मा को जो भी कुछ हुआ था। भगवान् लोक पितामह ब्रह्माजी ने समुत्पन्न होते ही समस्त स्थावर और चार भूतों का सृजन किया था ॥१-३॥ इसके अनन्तर फिर जब ब्रह्माजी ने सृष्टि की रचना करने का चिन्तन किया तो एक मनोरमा कन्या उत्पन्न हुई थी जो नील कमल के दल के तुल्य श्याम वर्ण वाली थी, जिसका मध्यभाग कृश था और दोनों सुन्दर नेत्र थे ॥ ४ ॥ उस अत्यन्त सुन्दरी अभिमत कन्या को देखकर ब्रह्माजी ने उसके साथ मैथुन करने के लिये उसे अपने निकट बुलाया था। उस महान् पाप से ब्रह्माजी का शिर शीर्ण हो गया था

॥५॥ उस क्षीण से वह फिर त्रैलोक्य में विख्यात तीर्थ में गया था। सन्निहत्या सर परम पुण्यमय है और समस्त पापों के क्षय करने वाला है ॥६॥ ऋषि और सिद्धों के द्वारा निषेवित उस पुण्यस्थाणु तीर्थ में वहाँ पर सरस्वती के उत्तर भाग के तटपर चतुर्मुख ने शिव को प्रतिष्ठापित किया था ॥७॥

आराधयामास तदा धूपैर्गन्धैर्मनोरमैः।
उपहारैस्तथा हृद्यै रुद्रसूक्तैर्दिनेदिने ॥८
तस्यैवं भक्तियुक्तस्व शिवपूजारतस्य च।
स्वयमेवाजगामाथ भगवान्नीललोहितः ॥९
समागतं शिवं दृष्ट्वा ब्रह्मा लोकपितामहः।
प्रणम्य शिरसा भूमौ स्तुतिं तस्य चकार ह ॥१०
नमस्तेऽस्तु महादेव भूतभव्यभवाश्रय।
नमस्तेऽस्तु स्तुतिनित्याय नमस्त्रैलोक्यपालिने ॥११
नमः पवित्रदेहाय सर्वकल्मषनाशिने।
चराचरगुरो गुह्य गुह्यानां च प्रकाशकृत् ॥१२
रोगा न यान्ति भिषजः सर्वरोगविनाशन।
रौरवाजिनसंवीत वीतशोक नमोऽस्तु ते ॥१३
वारिकल्लोलसंक्षुब्धमहाबुद्धिविघट्टन।
त्वन्नामजापिनो देव न भवन्ति भवा श्रयाः ॥१४

उस समय में मनोरम धूप–गन्ध तथा परम सुन्दर उपहारों के द्वारा और प्रतिदिन रुद्र सूक्तों से शिव की समाराधना की थी ॥८॥ इस तरह से भक्ति की भावना में समास्थित और शिव के पूजन अनुरत उसके होने पर उसके समीप में नील लोहित भगवान् स्वयमेव आ गये थे ॥९॥ लोक पितामह ब्रह्माजी ने आये हुए उन प्रभु शिव को देखकर भूमि में मस्तक टेककर प्रणाम किया और स्तुति की थी ॥१०॥ ब्रह्माजी ने कहा—हे महादेव ! आप तो भूत-भव्य भव के आश्रम हैं। आपको मेरा नमस्कार है। स्तुति नित्य और त्रैलोक्य पाली आपके लिये नमस्कार है ॥११॥ पवित्र देह वाले तथा समस्त कल्मषों के नाशक आपको

मेरा प्रणाम हैं। आप चराचर के गुरु हैं परम गोपनीय है तथा जो गुह्य पदार्थ हैं उनको प्रकाश में लाने वाले है ॥१२॥ भिषजों के द्वारा रोग नहीं जाया करते हैं और आप सभी रोगों के विनाश करने वाले हैं, आप कृष्ण मृग के चर्म से संवीत है तथा शोक से रहित हैं ऐसे प्रभु आपकी सेवा में मेरा प्रणाम समर्पित है ॥१३॥ जल की तरंगों से संक्षोभ को प्राप्त हुई महाबुद्धि की विघटन करने वाले आप हैं। हे देव ! आपके नाम का जो जाप किया करते हैं उनको फिर भव का आश्रय नहीं होता है ॥१४॥

नमस्ते नित्यनित्याय नमस्त्रैलोक्यनाशिने ।
शंकरायाप्रमेयाय व्याधीनां शमनाय च ॥ ५
परायापरिमेयाय सर्वभूतप्रियाय च ।
योगेश्वराय देवाय सर्वपापक्षयाय च ॥१६
नमः स्थाण्वे प्रसिद्धाय सिद्धबन्दिस्तुताय च ।
भूतसंसारदुर्गाय विश्वरूपाय ते नमः ॥१७
फणीन्द्रोक्तमहाम्ने ते फणीन्द्राङ्गदधारिणे ।
फणीन्द्रवरहाराय भास्कराय नमो नमः ॥१८
एवं स्तुतो महादेवो ब्रह्माणं प्राह शंकरः ।
न च मन्युस्त्वया कार्यो भाविन्यर्थे कदाचन । १९
पुरा वाराह कल्पे ते यन्मयाऽपकृतं शिरः ।
चतुर्मुखं च तदभून्न कदाचिन्न शिष्यति ॥२०
अस्मिन्सन्निहिते तीर्थे लिङ्गानि मम भक्तितः ।
प्रतिष्ठाप्य विमुक्तस्त्वं सर्वपापैर्भविष्यसि ॥२१

नित्य ही नित्य रूप से स्थित आपको नमस्कार है। त्रैलोक्य के नाश करने वाले आपके लिये मेरा प्रणाम है। शंकर, अप्रमेय और व्याधियों के शमन करने वाले आपको नमस्कार है ॥१५॥ पर, अपरिमेय, समस्त भूतों के प्रिय, योगेश्वर, सब पापों के क्षय करने वाले, देव के लिये नमस्कार है ॥१६॥ सिद्ध वन्दियों के द्वारा स्तुति किये गये प्रसिद्ध, भूतों के संसार के लिये दुर्ग रूप तथा विश्व के स्वरूप वाले

आपके लिये नमस्कार है ॥१७॥ फणियों के स्वामी शेष नाग द्वारा कही गई महिमावाले और फणीन्द्र के अंगद धारण करने वाले-फणीन्द्र के श्रेष्ठ हार वाले, भास्कर आपके लिये बारम्बार नमस्कार है ॥१८॥इस प्रकार से स्तुति किये गये महादेव जी ब्रह्माजी से बोले—आपको होने वाले अर्थ में कभी भी क्रोध नहीं करना चाहिए ॥१९॥ पहिले वाराह कल्प में जो आपका शिर मैंने अपकृत किया था वह चतुर्मुख हो गया है। वह कदाचित् शेष नहीं रहेगा ॥२०॥ इस सन्निहित तीर्थ में मेरे लिंगों को भक्ति भाव से प्रतिष्ठापित करके आप समस्त पापों से विमुक्त हो जायेंगे ॥२१॥

सृष्टिकामेन च त्वया यतोऽहं प्रेरितः किल ।
तेनाह त्वां तथेत्यु क्त्वा भूतेभ्यो दर्शनं गतः ॥२२
दीर्घकालं तपस्तत्वा मग्नः संनिहिते स्थितः ।
सुमहान्तं ततः कालं त्वं प्रतीक्षां ममा करोः ॥२३
स्रष्टाऽहं सर्वभूतानां मनसा कल्पितस्त्वया ।
सोऽब्रवीत्त्वां तदा दृष्ट्वा मां मग्नं च ततोऽम्भसि ॥२४
यदि नैवाग्रजस्त्वेभ्यस्ततः स्रक्ष्यामहे प्रजाः ।
त्वयैवोक्तश्च नैवास्ति त्वदन्यः पुरुषोऽग्रजः ॥२५
स्थाणुरेष जले मग्नो विवशः कुरुमद्धितम् ।
स सर्वभूतानसृजद्दक्षादींश्च प्रजापतीन् ॥२६
यैरिमं प्राकरोत्सर्वं भूतग्रामं चतुर्विधम् ।
ताः सृष्टमात्राः क्षुधिताः प्रजाः सर्वाः प्रजापतिम् ॥२७
जिघत्सवस्त दाब्रह्मन्सहसा प्राद्रवंस्तदा ।
संभक्ष्यमाणस्त्राणार्थी पितामहमुपाद्रवत् ॥२८

सृष्टि की रचना करने वाले आपने जो मुझे प्रेरित किया है उससे मैंने' तथास्तु'—अर्थात् ऐसा ही हो यह कह कर भूतों के लिये दर्शन को प्राप्त हुआ हूं ॥२२॥ दीर्घ काल तक तप करके सन्निहित में मग्न होकर स्थित हो। बहुत समय के पश्चात् तुमने मेरी प्रतिक्षा की थी ॥२३॥ मैं समस्त भूतों का स्रष्टा हूँ आपने मन से ही कल्पित किया है।

उस समय में जल में मग्न मुझ को देखकर वह तुमसे बोला था ॥२४॥ यदि कोई इनमें अग्रज नहीं है तो हम प्रजा का सृजन करते हैं। उस समय में आपने कहा था—आपसे अन्य कोई भी अग्रज नहीं है ।२५। यह स्थाणु विवश जल में मग्न है इसे मेरे लिये कर देवें। उसने ही समस्त भूत और दक्ष आदि प्रजापतियों का सृजन किया था ॥२६॥ जिन्होंने यह सब चार प्रकार का भूत ग्राम किया था। सृजन की हुई वह समस्त प्रजा क्षुधित होकर प्रजापति को ही खाने के लिये समुत्सुक हो हे ब्रह्मन्! उसी समय दौड़ी थी। संभक्ष्यमाण त्राण चाहने वाला पितामह के पास दौड़ा था ॥२७-२८॥

अथासां च महावृत्तिः प्रजानां संविधायताम् ।
दत्तं ताभ्यस्त्वया ह्यन्नं स्थावराणां महौषधो ॥२९
जङ्गमानि च भूतानि दुर्बलानि बलीयसाम् ।
विहितान्नाः प्रजाः सर्वाः पुनर्जग्मुर्यथागतम् ॥३०
ततो ववृधिरे सर्वाः प्रीतियुक्ताः परस्परम् ।
भूतग्रामे विवृद्धे तु तुष्टे लोकगुरौ त्वयि ॥३१
समुत्तिष्ठञ्जलात्तस्मात्प्रजाः सदृष्टवानहम् ।
ततोऽहं ताः प्रजा दृष्ट्वा विहिताः स्वेन तेजसा ॥३२
क्रोधेन महता युक्तो लिङ्गमुत्पाट्य चाक्षिपम् ।
तत्क्षिप्तं सरसो मध्ये ऊर्ध्वमेव यदा स्थितम् ॥३३
तदा प्रभृति लोकेऽस्मिन्स्थाणुरित्येष विश्रुतः ।
सकृद्दर्शनमात्रेण विमुक्तः सर्वकिल्बिषैः ॥३४
प्रयाति परमं मोक्षं यस्मान्नावर्तते पुनः ।
यश्चेह तीर्थे निवसत्कृष्णाष्टम्यां समाहितः ॥३५

इसके पश्चात् प्रजाओं की महावृत्ति का संविधान करो, उन समय में आपने उनके लिये अन्न दिया था स्थावरों को महौषधि दी थी ॥२९॥ बलवानों में जंगम भूत दुर्बल थे। इस तरह विहित अन्न वाली समस्त प्रजा फिर यथागत चलने लगी थी ॥३०॥ इसके अनन्तर समस्त प्रजा प्रीति से युक्त होती हुई परस्पर में वृद्धि को प्राप्त हुई थी। जब यह

भूतों का समुदाय विशेष रूप से वृद्धि को प्राप्त हो गया तो लोकों के गुरु आप पूर्णतय सन्तुष्ट हो गये थे ।।३१।। उस जल से मैं उठा था इसके अनन्तर मैंने उस प्रजा को देखकर अपने तेज से विहित किया ।।३२।। महान् क्रोध से युक्त होकर उस लिंग को उखाड़कर प्रक्षिप्त कर दिया था। सर के मध्य में प्रक्षिप्त किया हुआ वह जब ऊर्ध्व में ही स्थित होगया था ।।३३।। तभी से लेकर इस लोक में यह 'स्थाणु' इस नाम से विख्यात होगया था। इसके एक बार के ही केवल दर्शन करने से सब पापों से विमुक्त हो जाता है ।।३४।। फिर वह विमुक्त मानव परम मोक्षपद को प्राप्त किया करता है। जहां से फिर प्राणी पुनर्जन्म प्राप्त नहीं किया करता है। जो पुरुष इस तीर्थ में समाहित होकर मास के कृष्ण पक्ष की अष्टमी में निवास किया करता है वह विमुक्ति प्राप्त करता है ।।३५।।

स मुक्तः पातकैः सर्वैरगम्यागमनोद्भवैः ।
इत्युक्त्वा भगवान्देवस्तत्रैवान्तरधीयत ।।३६
ब्रह्मा विशुद्धपापस्तु पूज्य देव चतुर्मुखम् ।
लिङ्गानि देवदेवस्य ससृजे शरमध्यतः ।।३७
आद्य ब्रह्मसरः पुण्यं हरेः पाश्व प्रतिष्ठितम् ।
द्वितीयं ब्रह्मसदन स्वकोये ह्याश्रमे कृतम् ।।३८
तस्यव पूर्वदिग्भागे तृतीयं च प्रतिष्ठितम् ।
चतुर्थ ब्रह्मणो लिङ्गं सरस्वत्यास्तटे स्थितम् ।।३९
कृतमेतानि तीर्थानि पुण्यानि पावनानि च ।
ये पश्यन्तिनिराहारास्ते यान्ति परमां गतिम् ।।४०
कृते युगे हरेः पार्श्वे त्रतायां ब्रह्मणाश्रमे ।
द्वापरे तस्य पूर्वेण सरस्वत्यास्तटे कलौ ।।४१
एतानि पूजयित्वा तु दृष्ट्वा भक्तिसमन्वितताः ।
विमुक्ताः कलुषैः सर्वैः प्रयान्ति परमां गतिम् ।।४२

वह प्राणी अगम्या में गमन करके से समुत्पन्न पातकों से भी मुक्त होकर विशुद्ध हो जाया करता है। इतना कहकर भगवान् देव वहीं

पर अन्तर्धान होगये थे ॥३६॥ पापों से विशुद्ध ब्रह्माजी ने चतुर्मुख देव की पूजा थी और सरके मध्य में देव देव लिंगों का सृजन किया था ॥३७॥ आद्य परम पुण्य ब्रह्म सर है जो हरि के पार्श्व में प्रतिष्ठित है। द्वितीय ब्रह्म सदन है जो अपने ही आश्रम में किया है ॥३८॥ उसी के पूर्व दिग्भाग में तृतीय की प्रतिष्ठा की है। चौथा ब्रह्म का लिंग सरावती के तट पर स्थित है ॥३९॥ ये तीर्थ पुण्य और पावन करने वाले किये हैं। जो पुरुष निराहार होकर इनका दर्शन करते हैं वे परम गति की अवश्य ही प्राप्ति किया करते हैं ॥४०॥ सत्ययुग में हरि पार्श्व में त्रेता में ब्रह्मा के आश्रम में द्वापर में उसके पूर्व भाग में और कलयुग में सरस्वती के तट पर स्थित है ॥४१॥ भक्ति भाव से समन्वित होकर इनका दर्शन और पूजन करके समस्त कलुषों से विमुक्त हो कर परम गति को प्राप्त किया करते हैं ॥४२॥

सृष्टिकाले भगवता पूजितस्तु महेश्वरः।
सरस्वत्युत्तरे तीरे नाम्ना ख्यातश्चतुर्मुखः ॥४३
तं पूज यत्वा यत्नेन सोपवासो जितेन्द्रियः।
अगम्या गमनैर्दोषैर्मुच्यते नात्र संशयः ॥४४
ततस्त्रेतायुगे प्राप्ते स्थाणोर्देवसमीपतः।
पूजितं सुमहल्लिङ्गं तत्रापि च चतुर्मुखम् ॥४५
तं प्रणम्य श्रद्दधाना मुच्यते सर्वकिल्बिषैः।
लीलाशंकरसभूतं तथा वै भानुशंकरम् ॥४६
तथैव द्वापरे प्राप्ते स्वाश्रमे प्रार्च्यशकरम्।
विमुक्तो राजसैर्भावैर्वसकरसंभवैः ॥४७
ततः कृष्णचतुर्द्दश्यां पूजयित्वा तु मानवः।
विमुक्तः पातकैः सर्वैरभोज्यल्यान्नसभवैः ॥४८
कलिकाले तु सप्राप्ते वसिष्ठाश्रममास्थितः।
चतुर्मुखं स्थापयित्वा ययौ सिद्धिमनुत्तमाम् ॥४९
तत्रापि ये निराहाराः श्रद्दधाना जितेन्द्रियाः।
पूजयन्ति महादेवं ते यन्ति परमं पदम् ॥५०

इत्येतत्स्थाणुतीर्थस्य माहात्म्यं कीर्त्तितं तव ।
यच्छ्रुत्वा सर्वपापेभ्यो मुक्तो भवति मानवः ॥५१

सृष्टि के काल में भगवान् के द्वारा महेश्वर पूजित हुए थे । सरस्वती के उत्तर तीर पर चतुर्मुख-इस नाम से प्रसिद्ध हुए थे ॥४३॥ उनका यत्न पूर्वक पूजन करके उपवास के सहित तथा इन्द्रियों को जीतने वाला पुरुष अगम्या स्त्री के गमन करने के दोषों से मुक्त हो जाया करता है—इसमें बिल्कुल भी संशय नहीं है ॥४४॥ इसके पश्चात् त्रेतायुग के प्राप्त होने पर स्थाणु देव की समीपता हुई । वहाँ पर भी चतुर्मुख सुमहान् लिंग पूजित है । उसको प्रणाम करके श्रद्धा भाव वाला पुरुष सम्पूर्ण किल्विषों से मुक्ति पा जाता है । यह लीला शंकर सम्भूत तथा भानु शंकर है ॥४५ ४६॥ उसी भाँति द्वापर प्राप्त हो जाने पर अपने आश्रम में शंकर की समर्चना करके वर्ण संकर सम्भव राजस भावों से विमुक्त हो गया था ॥४७॥ इसके पश्चात् कृष्ण पक्ष की चतुर्दशी में मानव पूजन करके अभोज्य अन्न से समुत्पन्न समस्त पातकों से विमुक्त होता है ॥४८॥ कलिकाल के प्राप्त होने पर वसिष्ठाश्रम में आस्थित होकर चतुर्मुख की स्थापना कर सर्वोत्तमा सिद्धि को प्राप्त होगया था ॥४९॥ वहाँ पर जो निराहार रखकर श्रद्धा से परिपूर्ण हृदय वाले जितेन्द्रिय पुरुष महादेव की पूजा किया करते है वे परम पद को प्राप्त होते है ॥५०॥ यह स्थाणु तीर्थ का माहात्म्य आपको बतला दिया है जिसको श्रवण कर मनुष्य सब पापों से मुक्त हो जाता है ॥५१॥

५०—कुरुक्षेत्र माहात्म्य वर्णन

ततोऽब्रवीद्देववरस्तु तीर्थं यस्माद्भवानेकतया प्रयाति ।
पृथूदकेत्येव च नाम तुभ्यं भविष्यते तीर्थवरः पृथिव्याः ॥१
एवं पृथूदकं देवाः पुण्यं पापभयापहम् ।
तं गच्छध्वं महातीर्थं यास्यिष्यन्तो निबोधत ॥२

यदा मृगशिरोऽऋक्षे शशिसूर्यौ बृहस्पतिः ।
तिष्ठन्ति सा तिथिः पूर्वा त्वक्षया परिगीयते ।।३
तद्गच्छध्व सुरश्रेष्ठा यत्र प्राची सरस्वती ।
पितृनाराधयध्वं च तत्र श्राद्धेन भक्तितः ।।४
ततो मुरारिवचनं दृष्ट्वा देवाः सवासवाः ।
समाजग्मुः कुरुक्षेत्रे पुण्यं तीर्थं पृथूदकम् ।।५
तत्र स्नात्वा सुराः सर्वे बृहस्पतिमचोदयन् ।
विवस्वन्भगवन्नृक्षमिदं मृगशिरः कुरु ।।६
पुण्यां तिथिं पापहरां तव कालोऽयतागतः ।
प्रवर्त्तते रविस्तत्र चन्द्रमाऽपि विशत्यसौ ।।७

महामुनीन्द्र श्री सनत्कुमार जी ने कहा इसके अनन्तर देवकर ने तीर्थ से कहा था जिससे आप एकतया प्रयाण करते हैं। पृथिवी के श्रेष्ठ वर तीर्थ आप पृथूदक इसी नाम वाले होंगे ।।१।। इस प्रकार से परम पुण्य और पापों के भय का अपहरण करने वाले हे देवगण ! यह पृथूदक तीर्थ है। उसी महान् तीर्थ पर जाइये और याचना करें समझे ।।२।। जिस समय में मृगशिरा नक्षत्र में चन्द्र, सूर्य और वृहस्पति स्थित होते हैं वही तिथि पूर्वा और अक्षयप परिगीत होती है ।।३।। सो हे सुरों में श्रेष्ठ गण ! आप लोग वहाँ पर जाइये जहां प्राणी सरस्वती है। वहां पर भक्ति भाव से श्राद्ध के द्वारा अपने पितृगण का समाराधन करो ।।४।। इसके अनन्तर मुरारि के वचन को श्रवण कर इन्द्र के सहित समस्त देवगण कुरुक्षेत्र में जो पृथूदक पुन्य क्षेत्र है वहां आगए थे ।।५।। वहाँ सब सुरगण स्नान करके वृहस्पति को प्रेरित करने लगे। हे भगवन् ! हे विवस्वन् ! यह मृगशिरा नक्षत्र करदो ।।६।। पुण्य पापों के हरण करने वाली तिथि करो। अब आपका यह काल आगया है। वहाँ रवि प्रवृत्त होते हैं और यह चन्द्र भी प्रवेश कर रहे हैं ।।७।।

तवायत्त गुरो कार्यं सुराणां तत्कुरुष्व वः ।
इत्येवमुक्तो देवैस्तु देवाचार्योऽब्रवीदिदम् ।।८

यदि वर्षाधिपोऽहं स्यां ततो यास्यामि देवताः ।
बाढमूचुः सुराः सर्वे ततोऽसौ प्राक्रमन्मृगम् ॥९
आषाढे मासि मार्गक्षे चन्द्रक्षयतिथिर्हि या ।
तस्यां पुरन्दरः प्रीतः पिण्डं पितृषु भक्तितः ॥१०
प्रादात्तिलमधून्मिष्टं हविष्यान्नं कुरुष्व च ।
ततः प्रीतास्तु पितरस्तां प्राहुस्तनयां निजाम् ॥११
मेनां देवाश्च शैलाय हिमयुक्ताय वै ददुः ।
तां मेनां हिमवाँल्लब्ध्वा प्रमादाद्दे वतेष्वथ ।
प्रीतिमानभवच्चासौ रेमे स तु यथेच्छया ॥१२
ततो हिमाद्रिः पितृकन्यया समं संतर्पयन्वै विषयान्यथेष्टम् ।
अजीजनत्सा तनयाश्च तिस्रो रूपातियुक्ताः सुरयोषितस्तु ॥१३

हे गुरो ! यह सुरों का कार्य आपके ही आधीन है वह आप हमारा कार्य कर देवें । इस प्रकार से देवों के द्वारा कहे जाने पर देवाचार्य यह वचन बोले ॥८॥ यदि मैं वर्ष का अधिप होऊं तो हे देवगण ! मैं चला जाऊंगा । तब सब सुर गणों ने कहा—'बहुत अच्छा' और सब देवगणों के कहने पर मृगशिर पर प्रक्रान्त हुए थे ॥९॥ आषाढ़ मास में मृगशिरा नक्षत्र में जो चन्द्रक्षय तिथि थी उसमें प्रसन्न होकर इन्द्र ने भक्ति से पितृगण को पिण्ड दिया था ॥१०॥ तिल मधु से उन्मिष्ट हविष्यान्न करिये, इस तरह पिण्ड दिया था । इसके पश्चात् पितृगण ने प्रसन्न होकर उस अपनी तनया से कहा था ॥११॥ देवों के हिम से युक्त शैल के लिये मेना देदी थी । उस मेना को हिमवान् ने प्राप्त करके देवतों के विषय में प्रमाद युक्त हो गया था । और यह प्रीतिवाला हो गया था । उसने यथेच्छा से रमण किया था ॥ १२ ॥ इसके पश्चात् हिमवान् पितृकन्या के साथ यथेष्ट विषयों को संतृप्त करता हुआ रहने लगा था । उसने भी तीन तनयाओं को जन्म दिया था जो रूप से अतियुक्त थी और सुरयोषित थीं ॥१३॥

—— ——

५१—शिव-उमा संवाद वर्णन

मेनायां कन्यकास्तिस्रो जाता रूपगुणान्विताः ।
सुनाभ इति च ख्यातश्चतुर्थस्तनयोऽभवत् ।।१
रक्ताङ्गी रक्तनेत्रा च रक्ताम्बरविभूषिता ।
रागिणी नाम संजाता ज्येष्ठा मेनासुता मुने ।।२

शुभाङ्गी पद्मपत्राक्षी नालकुञ्चितमूर्धजा ।
श्वेतमाल्याम्बरधरा कुटिला नाम चापरा ।।३
नीलाञ्जनचयप्रख्या नीलेन्दीवरलोचना ।
रूपेणानुपमा काली जघन्या मेनकासुता ।।४
जातास्ताः कन्यकास्तिस्रः षडब्दात्पुरतो मुने ।
कर्तुं तपः प्रयाताश्च देवास्ता ददृशुः शुभाः ।।५

ततो दिवाकरः सर्वैर्वसुभिश्च तपस्विनी ।
कुटिला ब्रह्मलोकं तु नीता शशिकरप्रभा ।।६
अथोचुर्देवताः सर्वाः किं त्वियं जनयिष्यते ।
पुत्रं महिषहन्तारं ब्रह्मन्व्याख्यातुमर्हसि ।।७

पुलस्त्य मुनि ने कहा—मेना में तीन कन्यओं ने जन्म लिया था जो रूप-लावण्य के गुणों से समन्वित थीं। सुनाभ—इस शुभ नाम से विख्यात चौथा एक तनय उत्पन्न हुआ था ।।१।। हे मुने ! रक्त अंगों वाली रक्त नेत्रों से युक्त तथा रक्त वस्त्रों से विभूषित रागिणी नाम वाली ज्येष्ठ मेना की सुता समुत्पन्न हुई थी ।।२।। शुभ अंगों वाली पद्मपत्र के समान नेत्रों वाली तथा नील एवं कुञ्चित केशों वाली-श्वेत माल्य और वस्त्र धारिणी कुटिला नाम वाली दूसरी कन्या थी ।।३।। नीलाञ्जन चय के समान प्रख्या और नील इन्दीवर के तुल्य नेत्रों वाली रूप सौन्दर्य में अनुपम जघन्य काली नाम वाली मेनका की सुता थी ।।४।। वे समुत्पन्न तीनों कन्याएँ छै वर्ष से पहिले ही हे मुने ! तपस्या करने के लिये चली गईं थी। देवगण ने उन शुभाओं को देखा था ।।५।। इसके अनन्तर सब दिवाकर तथा वसुगण के द्वारा तपस्विनी

कुटिला ब्रह्मलोक को ले जाई गयी थी जो शशिकर के समान प्रभा वाली थी ।।६।। इसके अनन्तर सब देवगण ने कहा क्या यह हे ब्रह्मन् ! महिषासुर के हनन करने वाला पुत्र पैदा करेंगी ? आप इसकी व्याख्या करने के योग्य होते हैं ।।७।।

ततोऽब्रवीत्सुरपतिर्नेयं शक्ता तपस्विनी ।
शार्वं धारयितुं तेजो वराकीमुच्यतां त्वियम् ।।८
ततस्तु कुटिला क्रुद्धा ब्रह्माणं प्राह नारद ।
तथा यतिष्ये भगवन्यथा शार्वं सुदुर्धरम् ।।६
धारयिष्याम्यहं तेजस्तथैव शृणु सत्तम ।
तपसाऽहं सुतप्तेन समाराध्य जनार्द्दनम् ।।१०
यथा हरस्य मूर्धानं नमयिष्ये पितामह ।
तथा देव करिष्यामि सत्यं सत्यं मयोदितम् ।।११
ततः पितामहः क्रुद्धः कुटिलां प्राह दारुणाम् ।
भगवानादिकृद्ब्रह्मा सर्वंशोऽपि महामुने ।।१२
यस्मान्मद्वचनं पापे न क्षान्तं कुटिले त्वया ।
तस्मान्मच्छापनिर्दग्धा सर्वास्वापो भविष्यसि ।।१३
इत्येवं ब्रह्मणा शप्ता हिमवद्दुहितामुने ।
आपोमयी ब्रह्मलोक प्लावयामास वेगिनी ।।१४

इसके उपरान्त सुरपति ने कहा था—यह विचारी तपस्विनी भगवान् शिव के तेज को धारण करने में समर्थ नहीं है । इसको छोड़ दो ।।८।। फिर हे नारद ! कुटिला क्रुद्ध होकर ब्रह्माजी से बोली-मैं वैसा ही यत्न करूंगी हे भगवन् ! जिससे भगवान् शिव का सुदुर्धर तेज धारण कर लूंगी । हे सत्तम ! आप मेरा कथन श्रवण करें । मैं भली भाँति किये तप से भगवान् जनार्दन का समाराधन करूंगी ।।६-१०।। हे पितामह ! जिससे मैं हरके मूर्धा को नमित करदूंगी । हे देव ! मैं वैसा ही सब कुछ करूंगी यह सब मैंने बिल्कुल सत्य-सत्य ही कहा है ।।११।। पुलस्त्य मुनि ने कहा—इसके पश्चात् पितामह क्रोधित होकर उस दारुण कुटिला से बोले जो भगवान् आदिकृत हे महामुने! और सर्वंश

थे ॥१२॥ ब्रह्माजी ने कहा—हे कुटिले ! हे पाये ! क्योंकि तूने मेरे कथित वचन को सहन नहीं किया था इसीलिये मेरे शाप निर्दग्धा होकर सब में आप स्वरूपा हो जायगी ॥१३॥ इस प्रकार से ब्रह्माजी के द्वारा शाप दी हुई वह हिमवान् की दुहिता हे मुने ! आपोमयी (जल स्वरूपा) होगई थी और वेग वाली उसने सम्पूर्ण ब्रह्मलोक को प्लावित कर दिया था ॥१४॥

तामुद्धतजलां दृष्ट्वा प्रबवन्ध पितामहः ।
ऋक्सामाथर्वयजुर्भिर्बन्धनैः सर्वतो दृढम् ॥१५
सा बद्धा संस्थिता ब्रह्मंस्तत्रैव गिरिकन्यका ।
आपोमयी प्लावयन्ती ब्रह्मणो विमलालयम् ॥१६
या सा रागवती नाम साऽपि नीता सुरैर्दिवम् ।
ब्रह्मण तां निवेद्यैव तामप्याह प्रजापतिः ॥१७
साऽपि क्रुद्धाऽब्रवीच्चैन तथा तप्स्ये महत्तपः ।
यथा मन्नामसंयुक्तो महिषघ्नो भविष्यति ॥१८
तां शशापाथ स ब्रह्मा संध्यारागो भविष्यति ।
या मद्वाक्यमलङ्घ्यं वै सुरैर्लङ्घयसे बलात् ॥१९
साऽपि जाता मुनिश्रेष्ठ संध्यारागवती ततः ।
प्रतीच्छन्कृत्तिकाभागे शैलेय्या विग्रहं दृढम् ॥२०
ततो गते कन्यके द्वे ज्ञात्वा मेना तपस्विनी ।
तपसो वारयामस उमेत्येवाब्रवीच्च सा ॥२१

अत्यन्त उद्धत जल वालीं उसको देखकर पितामह ने ऋक्—साम अथर्व और यजु के बन्धनों से सब ओर से दृढ़ता पूर्वक उसको बांध दिया था ।१५॥ हे ब्रह्मक ! वह गिरि कन्या वद्ध होकर वहीं पर संस्थित होगई थी जो कि जलमयी ब्रह्मा जी के विमल आलय का प्लावन कर रही थी ।॥१६॥ जो दूसरी रागवती नाम वाली एक कन्या थी वह भी देवों के द्वारा दिव लोक में ले जायी गई थी । जैसे ही ब्रह्मा जी को उसे निवेदन किया था वैसे प्रजापति ने उससे कहा था ॥१७॥ वह भी अत्यन्त क्रुद्ध होकर इनसे बोली थी कि मैं महान तपश्चर्य्या

करूंगी जिससे मेरे नाम से संयुक्त महिषासुर का हनन करने वाला होगा ॥१८॥ उसको भी ब्रह्मा जी ने शाप दिया था कि सन्ध्या राग होगी क्योंकि जो तू मेरे वाक्य का उल्लङ्घन करके सुरों के द्वारा बल पूर्वक लङ्घित की जा रही है ॥१९॥ हे मुनिश्रेष्ठ,! वह भी फिर रागवती संन्ध्या हो गई थी जो कृत्तिका भाग में शैलेयी के दृढ़ विग्रह की देर ही थी ॥२०॥ इसके अनन्तर तपस्विनी मेना ने यह जान लिया था कि दो कन्याऐ तो गईं। फिर उसने तप से वारण कर दिया था। और वह उमा यह बोली थी ॥२१॥

तदेव माता नामास्याश्चके पितृश्रुता शुभा ।
उमेत्येव हि कन्यायाः सा जगाम तपोवनम् ॥२२
ततः सा मनसा देवं शूलपाणिं वृषध्वजम् ।
रुद्रं चेतसि संधार्य तपस्तेपे सुदुष्करम् ॥२३
ततोब्रह्माऽब्रवीद्देवान्गच्छध्वं हिमवत्सुताम् ।
इहानयध्वं तत्कालं तपस्यन्तीं हिमालये ॥२४
ततो देवाः समाजग्मुर्ददृशुः शैल नन्दिनीम् ।
तेजसा विजितास्तस्या न शेकुरुपसर्पितुम् ॥२५
इन्द्रो मरुद्गणैः सार्धं निद्धूतस्तेजसा तया ।
ब्रह्मणोऽधिकतेजोऽस्या विनिवेद्य प्रतिष्ठितः ॥२६
ततो ब्रह्माऽब्रवीद्देवान्ध्रुवं शंकरवल्लभा ।
यूयं सतेजसो नूनं विक्षिप्तास्तु हतप्रभाः ॥२७
तस्माद्व्रजध्वं स्व स्वं हि स्थानं भो विगतज्वराः ।
सतारकं हि महिषं विदध्वं निहतं रणे ॥२८

वह ही नाम इसकी माता ने कर दिया था जो पितृश्रुता और शुभा थी। कन्या का उमा–यही नाम था। वह तपोवन में चली गई थी ॥२२॥ इसके पश्चात् उसने अपने मन में वृषध्वज-शूलपाणि-रुद्रदेव को भली भाँति धारण करके महान कठिन तप किया था ॥२३॥ इसके उपरान्त ब्रह्मा जी ने देवगण से कहा था कि तुम सब हिमवान् की पुत्री के पास में जाओ। हिमालय में तपश्चर्य्या करती हुई उस को

यहां ले आओ ।।२४।। तब सब देवगण वहाँ पर आ गये थे और सबने शैलनन्दिनी को देखा था। तपस्या के कारण प्रवृद्ध तेज से वे सब विजित हो गये थे और आगे उसके समीप में उपसर्पण करने की शक्ति उसमें नहीं रही थी। ।।२५।। मरुद्गण के साथ इन्द्र को उसने अपने तेज से निर्धून कर दिया था। इसके अति अधिक तेज को ब्रह्मा जी से निवेदन करके इन्द्र वहीं प्रतिष्ठित हो गया था ।।२६।। इसके अनन्तर ब्रह्मा जी ने देवों से कहा निश्चय ही वह शंकर की वल्लभा है। आप तेज से युक्त होते हुए भी निश्चय ही विक्षिप्त और हत प्रभ हो गये हैं ।।२७।। इसलिये आप लोग अपने स्थानों को चले जाइये और अब अपने सन्ताप का त्याग कर दीजिए। अब तो यही समझ लो कि तारक के सहित महिष रण में निहत ही हो गया है ।।२८।।

इत्येवमुक्ता देवेन ब्रह्मणा सेन्द्रकाः सुराः ।
जग्मुः स्वान्येव धिष्ण्यानि सद्यो वै विगतज्वराः ।।२९
उमामपि तपस्यन्तीं हिमवान्पर्वतेश्वरः ।
निवर्त्य तपसस्तस्मात्सदारो ह्यनयद् गृहान् ।।३०
देवोऽप्याश्रित्य तद्रौद्रं व्रतं नाम निराश्रयम् ।
विचचार महाशैलान्मेरुप्राग्र्यान्महामतिः ।।३१
स कदाचिन्महाशैलं हिमवन्तं समायतः ।
तेनार्चितः श्रद्धयाऽसौ तां रात्रिमवसद्धरः ।।३२
द्वितीयेऽह्नि गिरीशेन महादेवो निमन्त्रितः ।
इहैव तिष्ठस्व विभो तपः साधनकारणात् ।।३३
इत्येवमुक्तो गिरिणा हरश्चक्रे मतिं च ताम् ।
तथा चाश्रममाश्रित्य त्यक्त्वा स स्वं निराश्रमम् ।।३४
वसतोऽप्याश्रमे तस्य देवदेवस्य शूलिनः ।
त देशमगमत्काली गिरिराजसुता शुभा ।।३५

इस प्रकार से देव ब्रह्माजी के द्वारा कहे गये समस्त देवगण जिनमें इन्द्रदेव भी थे अपने-अपने स्थानों को तुरन्त ही विगत सन्ताप वाले होकर चले गये थे ।।२९।। पर्वतों का ईश्वर हिमवान् भी

तपश्चर्य्या करती हुई उमा को भी उस तप से निवृत्त कराकर अपनी स्त्री के सहित गृह में ले आये थे ॥३०॥ महान् मतिवाले देव भी निराश्रय उस रौद्र वन का आश्रय लेकर मेरुप्राग्य अर्थात् जिन में मेरु सर्वशिरो मणि है ऐसे महान् शैलों पर विचरण किया करते थे ॥३१॥ वही देवेश्वर एक वार किसी समय में महाशैल हिमवान पर आ गये थे। हिमवान् के द्वारा बहुत ही अधिक श्रद्धा से इन देवेश का अर्चन किया था और हरने वहाँ पर उनमें निवास किया था ॥३२॥ दूसरे दिन में गिरीश ने महादेव जी को निमन्त्रित किया था और प्रार्थना की थी—हे विभो ! तपस्या करने का साधन होने के कारण से आप यहीं पर ठहरिए ॥३३॥ इस प्रकार से गिरि के द्वारा कहे हुए भगवान् हर ने उसी तरह की बुद्धि बना ली तथा अपने निराश्रय का त्याग कर के उन्होंने आश्रम का आश्रय ग्रहण कर लिया था ॥३४॥ देवों के भी देव शूली उनके आश्रय में निवास करने भी उसी देश में गिरिराज की पुत्री शुभा—काली चली गई थी ॥३५॥

तामागतां हरो दृष्ट्वा भूयोजातां प्रितां सतीम् ।
स्वागतेनाभिसंपूज्य तस्थौ योगरतो हरः ॥३६

सा चाभ्येत्य वरारोह कृताञ्जलिपरिग्रहा ।
ववन्दे चरणौ शैले सखीभिः सह भामिनी ॥३७

ततस्तु सुचिराच्छर्वः समीक्ष्य गिरिकन्यकाम् ।
न युक्तं चवमुक्त्वाऽथ सगणोऽन्तर्दधे ततः ॥३८

साऽपि शर्वं वचो रौद्रं श्रुत्वा ज्ञानसमन्विता ।
अन्तर्दुःखेन दह्यन्तो पितरं प्राह पार्वती ॥३९

तात यास्ये महारण्ये तप्तुं घोर महत्तपः ।
आराधनाय देवस्य शंकरस्य पिनाकिनः ॥४०

तथेत्युक्तं वचः पित्रा पादे तस्यैव विस्तृते ।
ललिताख्या तप स्तेपे हराराधनकाम्यया ॥४१

तस्याः सख्यस्तदा देव्याः परिचर्यां तु कुर्वते ।
समित्कुशफलं चापि मूलाहरणमादितः ॥४२

